सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

२९ वर्षे
३ अङ्कः

मार्गशीर्षपूर्णिमा, वै० सं० २०३१
दिसम्बर, १९७४ ई०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुसंग्राह्याः केचन शोधप्रबन्धाः

ग्रन्थनाम		मूल्यम्
१. अथर्ववेदे शान्तिपुष्टिकर्माणि—	श्रीमत्या मायामालवीयया वैदिकवाङ्मयस्यानुशीलनं कृत्वा विरचितो विविधैरानुसन्धानिकनिष्कर्षैः समेधितोऽयं प्रबन्ध.—	८-००
२. पाणिनीयधातुपाठसमीक्षा—	डॉ० भागीरथप्रसादत्रिपाठिना विरचिता। लेखकेन प्रायः समस्तसंस्कृतधातुपाठा उपजीव्यत्वेनोरीकृत्य समीक्षिताः। आधुनिकगवेषणापूर्णैर्निर्णयैः प्रबन्धोऽयं समुल्लसति। प्रबन्धस्यास्य महत्त्वमङ्गीकृत्यैवोत्तरप्रदेशीयशासनेनेयं पुरस्कृता—	१८-५०.
३. पाणिनीयव्याकरणे प्रमाणसमीक्षा—	प्राचीनव्याकरणविभागाध्यक्षेण श्रीमता रामप्रसादत्रिपाठिना विरचिता। इयं गवेषणाप्रधानैस्तात्त्विकैरथ च शास्त्रीयगभीरानुशीलनतथ्यैः समेधिता, उत्तरप्रदेशीयराज्यशासनेन पुरस्कृता च—	२६-२५
४. प्रक्रियाकौमुदीविमर्शः—	श्री-आद्याप्रसादमिश्रेण लिखितः। श्रीरामचन्द्राचार्यविरचितां 'प्रक्रियाकौमुदीम्' उपजीव्यत्वेनाधारीकृत्य लेखकेन गवेषणापूर्णबहुविधानुसन्धानिकनिष्कर्षा इह सन्निवेशिताः—	८-००
५. ग्रहगणितमीमांसा—	श्रीमुरारिलालशर्मणा विरचिता। इह भारतीयग्रहगणितस्य पाश्चात्यग्रहगणितस्य च तुलाबोधकमनुशीलनं कृतं वर्तते। अस्यास्तात्त्विकं महत्त्वमङ्गीकृत्यैव राज्यशासनेन पुरस्कृता—	५-५०
६. सूर्यग्रहणम्—	श्रीकृष्णचन्द्रद्विवेदिना विरचितम्। इह सूर्यग्रहणस्यार्वाचीनां पद्धतिमनुसृत्यानुसन्धानिकाः सिद्धान्ता समुपन्यस्ता लेखकेन। अस्य वैज्ञानिकं महत्त्वमूरीकृत्यैव उत्तरप्रदेशीयशासनेनेदं पुरस्कृतम्—	१२-००
७. प्राच्यभारतीयम् ऋतुविज्ञानम्—	श्रीधुनीरामत्रिपाठिना संरचितम्। इह लेखकेनानुसन्धानिकं पर्यवेक्षणं कृतम् ऋतुविज्ञानस्य। अस्याभिनवं मूल्यमाकलय्यैव राज्यशासनेन पुरस्कृतम्—	१८-००

प्रकाशकः—निदेशकः, गवेषणालयस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२
मुद्रकः—मुद्रणालय-व्यवस्थापकः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

प्रधानसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

सह-सम्पादकः

डॉ० हरिश्चन्द्रमणित्रिपाठी

२९ वर्ष
३ अङ्कः

वार्षिकमूल्यम् १० रूप्यकाणि
प्रत्यङ्कमूल्यम् ३ रूप्यकाणि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

१. महाभारतस्यैतिहासिकत्वसमीक्षा—डॉ० श्रीकृष्णमणित्रिपाठी १९५-२०२

२. न्यासविज्ञानम्—कविरत्न-श्रीगोविन्दशास्त्री चतुर्वेदः २०३-२०७

३. पूर्णाहन्ताविमर्शः—कौलो जानकीनाथः २०८-२११

४. सम्भविनो लक्षणाभेदाः काव्ये तदुपयोगश्च—
प० श्रीवायुनन्दनपाण्डेयः २१२-२३१

५. प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्—डॉ० विद्याधरशुक्लः २३२-२४२

६. सूर्यनमस्कारो व्यायामः—डॉ० नरेशझाः २४३-२६३

७. परमाणुविचारः—प० श्रीफुलेश्वरपाठकः २६४-२६७

८. महाभारते तीर्थभावनाविकासः—डॉ० सरयूप्रसादगुप्तः २६८-२७०

९. गोत्रप्रवरभास्करः—श्रीमद्भट्टोजिदीक्षितविरचितः (लघुग्रन्थमाला) १-२३

सम्पादकः—श्री-उमाशङ्करत्रिपाठी, अनुसन्धानसहायकः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

२९ वर्षः	मार्गशीर्षपूर्णिमा, वि० सं० २०३१	३ अङ्कः

महाभारतस्यैतिहासिकत्वसमीक्षा

डॉ० श्रीकृष्णमणित्रिपाठी, पुराणविभागाध्यक्षचरः
सं० सं० वि० वि०, वाराणसी

भारतीयसंस्कृतेर्मूलाधारोऽस्ति वेद एव, यतो हि वेदस्याक्षुण्णा विचारधारा भारतीयसंस्कृतिद्वारा नित्यं निरन्तरं च प्रवहति। वेदस्य व्यापकप्रभावेणैव जातेषु अनेकेषु आक्रमणेष्वपि भारतीया संस्कृतिस्सुदृढा शिलेव पूर्ववद् अचला विराजते। वेदस्यानुशीलनेन मानवा लौकिकं पारलौकिकं वाऽभ्युदयं साधयन्तो जीवनं सर्वविधसमुन्नतिशीलं विधातुं शक्नुवन्ति। मनुष्यजीवनस्य कर्तव्यविषये वैदिकविचारधाराया दृष्टिरेकदेशीया नास्ति, अपि तु सर्वाङ्गीणा सर्वदेशीया चास्ति। अत एव सा विभिन्नस्थितावपि अनष्टा सती निरन्तरमुपदिशति जीवलोकं स्वकीयं सार्वभौममादर्शम्। अत एव च भारतीयसंस्कृतेर्विकासक्रमेऽनादिकालान्निर्बाधं प्रवहन्त्या वैदिकविचारधाराया व्यापकः प्रभावः परिलक्ष्यते।

संस्कृतवाङ्मये वेदानां वैभवं बहुभिः प्रकारैर्वर्णितं विद्यते। समेषां प्राणिनां कर्तव्यविषये वेदास्सृष्टेरादिकालत एव उपजीव्यास्सन्ति। वेदाः कालत्रयेऽपि आदर्शमयजीवनयापनाय शुभां प्रेरणां प्रददति। वैज्ञानिकदृष्ट्या वैदिकविचारधारा हि ऐतिहासिकस्यान्वेषणस्यास्ति विषयः। उत्तरकालीनाभिर्भिन्नाभिर्धाराभिर्भारतीयसंस्कृतेः समये समये महानुपकारो जातः। भारतीयसंस्कृतौ वैदिकविचारधाराया भव्यभावना मानवजीवनस्य कर्तव्यविषये तद्व्यापकदृष्टिश्चास्ति अनुपमा। मानवीयादर्शजीवननिर्वाहदृष्ट्या लौकिकाभ्युदयसफलतादृष्ट्या च वैदिकविचारधाराया व्यापिका दृष्टिर्न केवलं भारतीयानामेव कृते गौरवस्यास्ति विषयः, प्रत्युत सार्वभौममानवसमाजस्य कृतेऽपि सन्देशवाहिका विद्यते। अत एव विभिन्नप्रतिकूलस्थितावपि सा अक्षुण्णा प्रवहन्ती भारतीयसंस्कृतिविकासे नैजं प्रभावमुपस्थापयति। वैदिकविचारधाराया व्यापिका दृष्टिर्विश्वशान्तेर्विश्वबन्धुत्वस्य चोदात्ताभिर्भावनाभिरोतप्रोताऽस्ति। अतो वैदिकमन्त्रेषु मानवमात्रस्य परस्परं सौहार्दभावनायास्सङ्केतः स्वाभाविक एव विद्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राष्ट्रस्य सर्वविधसमुन्नतय इदमत्यन्तमावश्यकमस्ति यत् तस्य समेषामङ्गानां विकासो भवेत्, तथा समस्ताया जनतायास्सुखसमृद्धिभावना जागरूका स्यात्। अत एव वेदेषु सहैव शारीरिकस्वास्थाय दीर्घायुष्ट्वाय च पदे पदे प्रार्थनं विद्यते।

एवं सर्वासु स्थितिषु मनुष्यः सफलतापूर्वकं स्वकीयजीवनस्य सर्वाङ्गीणं विकासं कुर्यादित्येव वैदिकविचारधाराया वर्तते प्रधानं लक्ष्यम्। वैदिकविचारधाराया इदमपि मुख्यं लक्ष्यं विद्यते यन्मानवो धर्मार्थकाममोक्षाख्यानां चतुर्णां पुरुषार्थानामभ्युदयनिःश्रेयसयोर्वोपलब्धि विदध्यात्।

वेद एव एकमात्रं धर्मस्य मूलमभिमतम्—"वेदोऽखिलो धर्ममूलम्"[1], "वेदो मूलं हि धर्माणां वर्णाश्रमविवेकिनाम्"[2] धर्मविदां वेदः सर्वोत्कृष्टमस्ति साधनम्। भगवता मनुनापि धर्माचरणस्य मूलमाधारो वेद एव स्वीकृतः। तेन यस्य धर्मस्य प्रतिपादनं कृतं स वेदमूलक एवास्ति, यतो हि स सर्वज्ञानमयो विद्यते।[3] सर्वज्ञतयासौ उत्सन्नविप्रकीर्णपठ्यमानवेदार्थं ज्ञात्वा लोकहितायोपनिबद्धवान् मानवं धर्मशास्त्रम्।

परम्परागतप्राचीनदृष्ट्यनुसारमपौरुषेयवेदवदेव वेदमूलकस्सनातनधर्मोऽपि अपरिवर्तनशीलो विद्यते। तदर्थं कस्यापि क्रमिकविकासस्य ह्रासस्य वा किमपि स्थानं न विद्यते। तथा च वेदप्रतिपादितधर्ममनुतिष्ठन् मानव इह लोके धार्मिकत्वेनानुपङ्क्तिकीं कीर्तिं परलोके च धर्मफलमुत्कृष्टं स्वर्गापवर्गादिसुखस्वरूपं च प्राप्नोतीत्यत्र नास्ति काचित् संशीतिः[4]। तस्माद् धर्मप्रियाणां प्राणिनां कृते वेद एव सर्वोत्कृष्टं सकलतत्त्वानुगमकं सर्वमान्यश्च प्रमाणं वर्तते।

अतो भारतीयतत्त्वज्ञानस्य धर्मस्य चोद्भवविकासयोरनुसन्धानार्थं वेदानां परिशीलनं नितान्तमस्ति आवश्यकम्, यतो हि वेदाः सन्ति भारतीयधर्मदर्शनयोः स्रोतांसि। विश्ववाङ्मये वेदानां स्थानमस्त्यप्रतिमं विश्वबन्धुत्वप्रतिष्ठायै। यथा यजुर्वेदे—"मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे" (३६।१८); अर्थादहं न केवलं मनुष्यमात्रम्, अपि तु सर्वान् प्राणिनो मित्रदृष्ट्या

१. म० स्मृ० २।६।
२. प० पु० पा० ख० ५।१४।
३. यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥
(म० स्मृ० २।७)
४. श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्॥
(म० स्मृ० २।८)

भविष्यपुराणेऽपि—
धर्मश्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्षणम्।
स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः॥
अस्य सम्यगनुष्ठानात् स्वर्गो मोक्षश्च जायते।
इह लोके सुखैश्वर्यमतुलञ्च खगाधिप॥ (३२।१२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पश्येयम् । तथा च ऋग्वेदे—"पुमान् पुमांसं परिपातु विश्वतः" (६।७५।१४); अर्थादिकेन द्वितीयस्य सर्वदा रक्षणं मानवमात्रस्यास्ति पवित्रं कर्तव्यम् । एवमथर्ववेदे–"तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः" (३।३०।४) । भो जनाः । सर्वे वयं मिलित्वा एवं प्रार्थनां कुर्याम येन मनुष्येषु सुमतेः सद्भावनायाः सौहार्दस्य च प्रतिपादका अनेके मन्त्रा वेदेषूपलभ्यन्ते ।

यथा सौमनस्य सूक्ते सामाजिकोत्कृष्टभावनाया उपदेशप्रसङ्गे लिखितमस्ति यद् यथा सनातनशक्तिसम्पन्नाः चन्द्र-सूर्य-वाय्वग्न्यादयो देवाः परस्परं प्रेम्णा स्वं स्वं कार्यं कुर्वन्ति, तथैव हे मानवा यूयमपि परस्परमविरोधभावेन समष्टिभावनया सहैव कार्येषु प्रवृत्ता भवत, ऐकमत्येन तिष्ठत, सद्भावनया च व्यवहरत ।[1]

मनुष्याणां व्यवहारः प्रायः सिद्धान्तवादतो दूरे तिष्ठति । तथा च—विश्वशान्तेः, विश्वबन्धुत्वस्य च मार्गे गन्तुकामैः सिद्धान्तानां रक्षायै आत्मरक्षायै च दमनस्यावलम्बनं नितरामपेक्षितं भवति । अतो वेदमन्त्रेषु स्पष्टतया प्रतिपादितमस्ति यत्त्वया नूनमवधेयं यत् तव समुन्नतेर्बाधकाः शत्रवस्त्वां न जयेयुः–"मा त्वा परिपन्थिनो विदन्" (यजुर्वेदः ४।३४) इति ।

भारतीयमध्ययनं वेदत एवारभ्यते । अतो वेदो भारतीयसंस्कृतेर्मूलमाधारः । विश्व-वाङ्मये वेदात् प्राक्तनं किमपि साहित्यं नोपलभ्यत इति सर्वैः पौरस्त्यैः पाश्चात्त्यैश्च विद्वद्भि-रैकमत्येन मन्यते । वेदात्परं पुराणेतिहासयोरेकं विशिष्टं स्थानमस्ति । वेदस्मृत्योरनन्तरं पुराणेतिहासयोरेव आस्तिकैर्जगति प्रामाण्यमङ्गीक्रियते, यतो वेदार्थमेव स्पष्टीकर्तुं ज्ञानकर्मो-पासनानां सिद्धान्ता अतिसरलया भावगम्यया सुन्दरभाषया विविधाभिर्भक्तशिरोमणीनां मानवमणीनां कथाभिः सम्यगववोधिताः सन्ति, येषां मननद्वारा मानवं जीवनं सफलं भवितुमर्हति ।

एवंविधस्य सर्वाभ्यर्हितस्य सर्वोपयोगिनोऽत्यन्तमुपादेयस्य वेदस्योपबृंहणार्थमितिहासस्य पुराणस्य च निर्माणमजायत । यत्र मनोहारिणोर्ज्ञानविज्ञानयोः प्रचुरा चर्चा विद्यते । वेदेषु सूक्ष्मरूपेण प्रतीकरूपतया प्रोक्तानां लोकोपयोगिनां विषयाणां विस्तारः सुरुचिपूर्णपद्धत्या इतिहासे महाभारते पुराणेषु च कृतो वर्तते । अत एव इतिहासपुराणाभ्यां वेदार्थस्य समुप-बृंहणसङ्केतः कृतोऽस्ति–"इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्" (म० भा०, आ० प० १।२६७) ।

पुराणमितिहासश्च

पुराणसाहित्यस्येतिहासेन सहास्ति घनिष्ठतमः सम्बन्धः । प्राचीनग्रन्थेषु द्वयोः पुराणे-तिहासयोर्नाम सम्मिलितरूपेणोपलभ्यते । छान्दोग्योपनिषदि इयं कथाऽस्ति यत्—एकदा यदा देवर्षिर्नारदो ब्रह्मविद्यामध्येतुं सनत्कुमारसविधे उपस्थितः, तदा तेन पृष्टो यद् भवता इतः पूर्वं किं किमधीतमस्ति ? ततः स स्वाधीतविद्यासु इतिहासपुराणयोर्नाम गृहीत्वा तं पञ्चमं वेदं प्रावोचत्[2] ।

---

१. सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सं जानाना उपासते ॥
(ऋ० वे० १०।१९१।२)

२. ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणमितिहासपुराणं पञ्चमं वेदानां वेदम् । (७।१।२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायभाष्ये वात्स्यायनेनापि मुनिना विषयभेदात् साहित्यस्य त्रयो भेदाः स्वीकृताः सन्ति - (१) यज्ञः, (२) लोकचरितम्, (३) व्यवहारव्यवस्थापनं च । एषु यज्ञो मन्त्रब्राह्मणात्मकस्य वेदस्य विषयः । लोकचरितमितिहासपुराणस्य विषयः । तथा व्यवहारव्यवस्थापनम्, मानवानां पुण्यपापादीनां निर्धारणञ्च धर्मशास्त्रस्यास्ति विषयः ।

यास्काचार्येण स्वनिरुक्ते पुराणेतिहासयोर्निरुक्तिः कुर्वता प्रोक्तं यत्—पुराणं कस्मात् ? पुरा नवं भवति पुराणम्, तथा इति + ह + आस = इतिहासः (इति-एवं प्रकारम्, ह=निश्चयरूपेण आस=वर्तमानमासीत्) ।

दुर्गाचार्योऽपि निरुक्तवृत्तौ 'निदानभूतः' इति ह एवमासीत् इति यउच्यते स इतिहासः (२।३।१) इति प्रोक्तवान् ।

स्वामिशङ्कराचार्येण स्वकीये छान्दोग्योपनिषद्भाष्ये—''उर्वशी हाप्सराः पुरूरवसं चकमे'' (११।५।१।१) इति शतपथब्राह्मणाधारेण उर्वशीपुरूरवसोः संवादसूचकोऽश इतिहासो मन्यते, 'असद्वा इदमग्र आसीत्' इत्यनुसारं सृष्टिप्रक्रियाघटितविवरणं पुराणं प्रोच्यते इत्युर्वशी-पुरूरवसोः संवादादिः, उर्वशी हाप्सरा इत्यादि ब्राह्मणमेव इतिहासः । पुराणम् 'असद्वा इदमग्र आसीत्' इत्यादि । (छा० उ० शा० भा० ७।१) । एवं शङ्कराचार्यमते प्राचीनाख्यानोपाख्यानसूचको भाग इतिहासोऽस्ति, तथा सृष्टिप्रक्रियाया वर्णनं पुराणं विद्यते, किन्तु सायणाचार्येण स्वकीये शतपथ-ब्राह्मणभाष्ये एतद्विपरीतं सृष्टिप्रक्रियाप्रतिपादको ब्राह्मणभाग इतिहासः, तथा उर्वशीपुरूरवसोराख्यानं पुराणं प्रोक्तं वर्तते—''आपो ह वा इदमग्रे सलिलमेवास'' इत्यादिसृष्टिप्रतिपादकं ब्राह्मणमितिहासः । 'उर्वशी हाप्सरा पुरूरवसमैडं चकमे' इत्यादीनि पुरातनपुरुषवृत्तान्तप्रतिपादकानि पुराणम्'' । (सा० भा० ११।५।६।८) ।

शुक्रनीतावितिहासपुराणयोर्लक्षणमित्थं कृतं विद्यते—

प्राग्वृत्तकथनं चैकराज्यकृत्यमिपादितः ।
यस्मिन् स इतिहासः स्यात् पुरावृत्तं स एव हि ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं यस्मिन् पुराणं तद्धि कीर्त्तितम् ॥

(शु० नी० ४।९२-९३)

एवं स्कन्दपुराणे लिखितमस्ति यल्लोकगौरवादितिहासपुराणं भिन्नं भिन्नं वर्तते—''इतिहासपुराणानि भिद्यन्ते लोकगौरवात् ।'' (कु० ख० ४०।१९८) । एवमितिहासपुराणशब्दौ परस्परं प्रयुक्तौ भवतः स्म । पुराणेतिहासशब्दौ कदाचिद् भिन्नेषु अर्थेषु प्रयुज्येते स्म, कदाचिच्चैकस्मिन्नेवार्थे उभयोः प्रयोगो भवति स्म । अतो द्वयोः पुराणेतिहासयोः परिभाषायां न कश्चन भेदो लक्ष्यते । अत एवामरसिंहेन अमरकोशे इतिहासस्य यल्लक्षणं कृतं वर्तते तदेव लक्षणं नीलकण्ठेन स्वकीयायां महाभारतटीकायां पुराणस्य कृतेऽपि कृतं विद्यते । ''इतिहासः पुरावृत्तम्'' (अ० को० १।५), ''पुराणं पुरावृत्तम्'' (म० भा० टी० नी० क० १।५।१) इति च ।

यद्यपि समालोचकाः केवलं महाभारतमेवेतिहासं ब्रुवन्ति, तथा रामायणं महाकाव्यं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कथयन्ति, यतो हि स्वयं महाभारते महाभारतमितिहासनाम्नाभिहितमस्ति ।[१] देवीभागवतेऽपि कर्तुः श्लोकसंख्यायाश्चोल्लेखपूर्वकं महाभारतमितिहासः प्रोक्तोऽस्ति ।[२]

तथा वाल्मीकीये रामायणे प्रतिसर्गपुष्पिकासु "इत्यार्षे वाल्मीकीये महाकाव्ये…अमुकः सर्गः" इत्युल्लिखितमस्ति । ब्रह्मवैवर्तपुराणमपि अस्य समर्थनं कुर्वत् सिद्धान्तयति यत् महाभारतमितिहासोऽस्ति वाल्मीकीयं रामायणञ्च महाकाव्यमस्ति ।[३]

तथापि संस्कृतसाहित्यपरम्परायां रामायणमहाभारतयोरुभयोरेवेतिहासनाम्ना ख्यातिरस्ति । अत एव राजशेखरेण द्वयोस्सङ्ग्रहदृष्ट्या स्वकाव्यमीमांसायामितिहासो द्विप्रकारकः प्रोक्तोऽस्ति, परिक्रिया पुराकल्पश्च, यथा—परिक्रिया = एकनायिकाकथा, यथा रामायणम्, (२) पुराकल्पः = बहुनायिकाकथा, यथा महाभारतम् ।[४]

अतो रामायणमितिहासान्तर्गतमिति स्वीकारः प्राचीनशास्त्रीयमर्यादानुकूल एवास्ति ।

यथा पुराणं सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितैरेभिः पञ्चभिर्विषयैः सह दान-व्रत-तीर्थ-धर्म-वर्णाश्रमभवत्यवतारादीनामपि पर्याप्तं वर्णनं करोति, किञ्च विभिन्नव्यवहारिविषयाणामपि शिक्षां प्रदाय मानवहृदयेभ्यो मोहान्धकारमपि निवारयति, यस्य सङ्केतो महाभारते कृतोऽस्ति ।[५]

---

१. (क) तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ॥
(आ० प० १।५४)

(ख) भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः ।
(आ० प० २।४१)

(ग) इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः ।
(आ० प० २।३८५)

(घ) जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ।
(स्व० प० ५।५१)

२. सपादलक्षं च तथा भारतं मुनिना कृतम् ।
इतिहास इति प्रोक्तं पञ्चमं वेदसम्मितम् ॥
(दे० भा० १।२।२६)

३. इतिहासो भारतं च वाल्मीकं काव्यमेव च ।
(ब्र० वै० १३१।२३)

४. परिक्रिया पुराकल्प इतिहासगतिर्द्विधा ।
स्यादेकनायिका पूर्वा द्वितीया बहुनायिका ॥
(का० मी० २)

५. इतिहासप्रदीपेन मोहवारणघातिना ।
लोकगर्भगृहं कृत्स्नं यथावत् सम्प्रकाशितम् ॥
(म० भा०, आ० प० १।८७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं संस्कृतसाहित्यस्येतिहासो यद्यपि प्राचीनानामाख्यानानां वर्णनं करोति, तथापि आधुनिकेतिहासवत् तस्य क्षेत्रं सीमितं नास्ति, किन्तु विविधविषयकलोकव्यवहारशिक्षां प्रदाय मानवहृदयेभ्योऽज्ञानावरणमपसार्य एकस्या अभिनवचेतनाया अपि प्रकाशं प्रददाति । इत्थमितिहासपुराणयोस्सत्यपि भेदे वायुपुराणमात्मानं पुरातनमितिहासं कथयति, तथा महाभारतमितिहासस्सन्नपि आत्मानं पुराणं प्रख्यापयति ।[1]

अपि च सत्यवतीसूनुः पराशरनन्दनो भगवान् वेदव्यासो मनसि महाभारतं निर्माय तत्प्रचारोपायं चिन्तयन् सहसोपस्थितं लोकपितामहं ब्रह्माणं वीक्ष्य कुशासने समुपवेश्य सत्कृत्य च यदा निवेदयामास—भगवन् ! लोककल्याणार्थं मयैकं महाकाव्यं विरचितम्, परन्तु अस्य लेखकः पृथिव्यां न कोऽप्युपलभ्यते, तदा तन्निशम्य सर्वज्ञो विधिरादिष्टवान्—वत्स ! त्वयात्मीया रचना काव्यमित्युक्तम् । आजीवनं ते ब्रह्मवादिनी वाणी मिथ्या नाभवत् । अत इतः परमिदं ते चिन्तितं काव्यनाम्ना प्रसिद्धिं यास्यति । मुनिवर ! एतस्य लेखनाय गणेशस्य स्मरणं कुरुष्व, स एवास्य लेखको भविष्यति ।[2]

अत एव याज्ञवल्क्यस्मृतौ चतुर्दशविद्यानां स्थाननिर्देशप्रसङ्गे केवलं पुराणस्यैव गणना अस्ति, यत्रेतिहासस्याप्यन्तर्भावो मन्यते विद्वद्भिः ।[3] गर्गसंहितायाञ्च महाभारतं पुराणान्तर्गत-

---

१. इमं यो ब्राह्मणो विद्वान् इतिहासं पुरातनम् ।
शृणुयाच्छ्रावयेद् वापि तथाध्यापयतेऽपि च ॥
स्थानेषु स महेन्द्रस्य मोदते शाश्वतीः समाः ।
(वा० पु० ४।१०३।४८½)

द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा ।
सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा तदभिपूजितम् ॥
(म० भा०, आ० प० १।१७)

२. उवाच स महातेजा ब्रह्माणं परमेष्ठिनम् ।
कृतं मयेदं भगवन् काव्यं परमपूजितम् ॥
परं न लेखकः कश्चिदेतस्य भुवि विद्यते ।
जन्मप्रभृति सत्यां ते वेद्मि गां ब्रह्मवादिनीम् ॥
त्वया च काव्यमित्युक्तं तस्मात् काव्यं भविष्यति ।
अस्य काव्यस्य कवयो न समर्था विशेषणे ॥
काव्यस्य लेखनार्थाय गणेशः स्मर्यतां मुने !
(आ० प० १।६१-७३)

३. पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(या० स्मृ० १।१३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मभिमतमस्ति—यथा तिथिषु एकादशी, नागेषु शेषनागः, पक्षिषु च गरुडः श्रेष्ठो गण्यते, तथैव पुराणेषु महाभारतं श्रेष्ठमस्ति।[1]

नारदीयपुराणानुसारं तु पुराणशब्दस्यार्थो बहुव्यापकोऽस्ति। न केवलमितिहास एव पुराणमस्ति, अपि तु मानवकल्याणकारकं समस्तं संस्कृतवाङ्मयमध्यात्मसात् कुर्वाणं पुराण-साहित्यं सर्वहितसाधनं साहित्यं वर्तते।[2]

एवं पुराणस्य विशाले वाङ्मये त्रयाणां पुराण-रामायण-महाभारतानां समन्वयो जायते। अत एव मत्स्यपुराणे महाभारतस्य श्लोकसंख्या एकं लक्षम्, पुराणानां श्लोकसंख्या चत्वारि लक्षाणि, रामायणस्य च श्लोकसंख्या पञ्चविंशतिसहस्राणि, सङ्कलनया सपादपञ्चलक्षश्लोकाना-मिदं विशालं साहित्यं पुराणनाम्ना प्रोक्तमस्ति।[3]

एतदतिरिक्तानामष्टादशानामुपपुराणोपपुराणादीनाम्, यानि महापुराणानां परिशिष्टानि सन्ति तेषां संख्या सपादपञ्चलक्षात् पृथगेवास्ति। इत्थं पुराणं वाङ्मयं विषयविस्तरदृष्ट्या विश्वस्मिन्नद्वितीयं वर्तते। परन्तु कौटल्येन स्वकीयेऽर्थशास्त्रे पुराणानां गणना इतिहासस्याभ्यन्तरे कृताऽस्ति। तस्य दृष्टौ इतिहासस्य क्षेत्रं पुराणक्षेत्रापेक्षयातिविस्तृतमस्ति। अत एव तेन पुराणेति-वृत्ताख्यानोदाहरणधर्मशास्त्रार्थशास्त्राणि इतिहासस्याभ्यन्तरेऽभिमतानि—"**पुराणमितिवृत्तमाख्या-यिकोदाहरणं धर्मशास्त्रमर्थशास्त्रञ्चेतिहासः**" (५।१४)।

स्वयं भगवता व्यासेनापि महाभारतं धर्मशास्त्रमर्थशास्त्रं कामशास्त्रं च स्वीकृतमस्ति।[4]

प्रतिदिनं प्रातरुत्थाय कृताह्निककृत्यो भगवान् कृष्णद्वैपायनो महर्षिर्वेदव्यासोऽतिविशाल-कलेवरं महाभारतनामकमितिहासग्रन्थं त्रिभिर्वर्षैरपूरयत्।[5] तद्विषये तस्य समुद्घोषोऽस्ति

---

१. यथा तिथीनां हरिवासरो हि यथा हि शेषः फणिनां फणीन्द्रः।
यथा गरुत्मान् दिवि पक्षिणां च तथा पुराणेष्विह भारतं च॥
(ग० सं०, गो० ख० ६।२१।२६)

२. शृणु वत्स प्रवक्ष्यामि पुराणानां समुच्चयम्।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम्॥
(ना० पु० १।९२।२१)

३. एवं सपादाः पञ्चैते लक्षा मर्त्ये प्रकीर्तिताः।
पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः॥
(म० पु० ५३।७)

४. धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम्।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना॥
(म० भा०, आ० प० ३।३८३)

५. त्रिभिर्वर्षैरिदं पूर्णं कृष्णद्वैपायनः प्रभुः।
अखिलं भारतं चेदं चकार भगवान् मुनिः॥
(म० भा०, स्व० रो० प० ५।४८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यच्चतुर्णां धर्मार्थकाममोक्षाणां विषये यदत्राङ्कितमस्ति तदेवान्यत्रापि दृश्यते, यो हि विषयोऽत्र न विचारितोऽस्ति स न कुत्राप्युपलभ्यते ।[1]

मानवसमाजस्य स एवेतिहासः पूर्णो मन्तुं शक्यो यस्मिन् सृष्टेरारम्भकालत एव सृष्टि-विकासस्य क्रमबद्धं विवरणमुपस्थापितं स्यात्, किन्तु आधुनिकैरितिहासलेखकैः प्रणालीयं सर्वथो-पेक्षिता, परं महतो हर्षस्य विषयोऽस्ति यत् प्रसिद्धेन विदुषा एच्० जी० विल्सन-महोदयेन स्वकीये ग्रन्थे[2] इतिहासस्वरूपस्य व्यवस्थापने पौराणिक्याः शैल्या एवानुसरणं कृतम् । तेन स्वकीये इतिहासे मानवसमाजस्येतिहासलेखनात् पूर्वं सृष्टेरारम्भकालत एव मानवविकासस्ये-तिहासो लिखितो वर्तते । वास्तविकरूपेण इतिहासलेखनस्यायमेवास्ति पौराणिकः प्रकारः । तस्माद् महाभारतस्यैतिहासिकत्वं निर्बाधं सिद्धयति, न तत्रास्ति काप्यनुपपत्तिः ।

साम्प्रतं समाचारपत्रेषु डी० सी० सरकारमहोदयेन महाभारतस्यैतिहासिकतायां यो हि आपातरमणोयस्सन्देह उपस्थापितोऽस्ति, तदवलोकनेन प्रतीयते यत् तेन तर्कप्रधानबुद्धिवादि-पाश्चात्योपनेत्रद्वारा महाभारतस्य निरीक्षणं कृतम् । यदि तेन परम्पराप्राप्तया भारतीयदृष्टया महाभारतस्य पर्यवेक्षणं कृतं स्यात् तर्हि तस्य नैवंविधः सन्देहाभास उपस्थितः स्यात् ।

---

१. धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।।

२. आउट लाइन आफ हिस्ट्री, पृ० १ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यासविज्ञानम्

"न्यासप्रिया तु श्रीविद्या"

कविरत्न—गोविन्दशास्त्री चतुर्वेदः, मथुरा ।

न्युपसर्गकात् क्षेपणार्थकादस्धातोर्घञि प्रत्यये कृते 'न्यसनं न्यासः' इति सिद्ध्यति ।

अकारादिक्षकारान्ता मातृका वर्णरूपिणी ।
देवी पातु न्यासविधौ न्यासलोलकराङ्गुली ॥

न्यासेषु चित्तस्थैर्यार्थं संवित्सेवनं प्रशस्तम् । समयाचारतन्त्रोक्तविधिना विजयापानमपि कर्त्तव्यम्, तत्रैवोक्तम्—

संविदासवयोर्मध्ये संविदेव गरीयसी ।
भक्षिता भवनाशाय निर्गन्धा बोधरूपिणी ॥

मूर्तिप्राणप्रतिष्ठायां यथा न्यासैनैव देवत्वमापद्यते, तथैव स्वशरीरे प्राणप्रतिष्ठायां कृतायां सत्यां न्यासजालं न्यसनीयमिति सम्प्रदायः ।

प्रथममन्तर्मातृका, ततश्च बहिर्मातृकान्यासो विधीयते । जपेन वाक्सिद्धिः, न्यासेन देहे देवत्वं प्रभावाधिक्यञ्च, पूजनेनार्थप्राप्तिर्देवताभावसिद्धिश्च सञ्जायते । तथा च पारायणेन जीवन्मुक्तिरवस्था, स्तवेन देवताप्रसादप्राप्तिश्च भवति । एतद्गुरुमुखतः श्रुतमस्ति । बहिर्मातृकान्यासस्य ब्रह्मचारिकृते सृष्टिस्थितिसंहृतिसृष्टिरिति चतुर्विधः क्रमः, गृहस्थाश्रमिणां कृते तु सृष्टिस्थितिसंहृतिसृष्टिस्थितिरिति पञ्चप्रकारता । तथा च संन्यासिनां कृते सृष्टिस्थितिसंहृतिरिति त्रैविध्यमेव । आदिक्षान्तं सृष्टिः, थादिक्षान्तमादितान्तं स्थितिः, क्षादि-आन्तं संहृतिरिति न्यासा अवगन्तव्याः । एवं शुद्धमातृकान्यासे कृते 'अः नमः' इत्यादिविसर्गमातृकानन्तरम् 'ह्रीं अं नमः' इति हृल्लेखामातृका, 'श्रीं अं नमः' इत्यादि लक्ष्मीमातृका, पश्चाद् बालासम्पुटितामातृका, परापुटितामातृका, श्रीविद्यामातृका, 'हंसः अं नमः सोऽहम्' इत्यजपामातृका भवति । वामकेश्वरीये तु 'हंसः सोऽहं अं नमः' इत्यादि अजपामातृकान्यासो ज्ञेयः । 'ऐं क्लीं सौः ईं मालिन्यै अं नमः' इति मालिनीमातृका ज्ञेया । विद्याया एकैकेन कूटाक्षरेण त्रिकूटमातृका । 'ॐ अं नमः' इत्यादि प्रणवमातृका, पञ्चबाणबीजैः प्रत्येकं मातृकाक्षरयोगेन बाणावृत्त्या वा बाणमातृका, त्रिबीजैस्त्रितारमातृका, प्रणवयोगेन चतुस्तारमातृका, 'क्रीं अं नमः' इत्यादि कालीमातृका, स्त्रीमिति तारामातृका, हूमिति छिन्नामातृका, ह्लीमिति बगलामातृका 'ह् स् क्ष् म् ल् व् र् य्ँ' इत्यादि भैरवमातृका, 'स् ह् क्ष् म् ल् व् र् य्ँ' इत्यादि भैरवीमातृका, 'क्ष्रौं अं नमः' इत्यादि नृसिंहमातृका, 'क ५ अं नमः, ह ६ अं नमः, स ४ अं नमः' इति कूटन्यासाः सृष्टिस्थितिसंहारभेदास्त्रिविधा भवन्ति । ऊर्ध्वाम्नायोपासकानां तु पराप्रासादमातृका, महामालिनीमातृका, परमहंसमातृका, न्यासा गुरुमुखादवगम्या एव संहृत्य द्विपञ्चाशन्मातृकान्यासाः प्रकीर्तिताः । श्रीकण्ठादिमातृका, केशवादिमातृका, कलामातृका, 'ॐ ह्लीं अं नमः हंसः सोऽहं स्वाहा' इत्यादिप्रपञ्चयागमातृकान्यासे कृते ऋष्यादिकरहृदयषडङ्गन्यासाः कर्त्तव्याः, ते च बालाक्षरश्रीविद्याकूट-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुरःसरं त्रिपुरसुन्दरी मां रक्ष रक्षान्ता भवन्ति। षोडश्युपासकानां तु पञ्चाक्षरत्र्यक्षरकूटत्रय-पञ्चाक्षरैः षडङ्गं न्यसनीयम्। 'अं विद्या नमः' इत्यादि कस्तूरीमातृका द्वितीयकूटादौ, 'अं नमः' इत्यादिकर्पूरन्यासस्तृतीयकूटादौ 'अं नमः' इत्यादि कुंकुमन्यासः। 'अं आं सौ' द्विरावृत्त्या करशुद्धिन्यासः। 'द्रां द्रीं क्लीं ब्लूं सः' व्यस्तैः समस्तैश्च षडङ्गन्यासे कृते बाणन्यासः। कामबीजाक्षरैः कामन्यासः। दीपिनीविद्याया द्विरावृत्त्या षडङ्गन्यासे कृते दीपिनीन्यासः, ततश्च चतुरासनषडासननवासनन्यासा न्यस्यन्ते। शृङ्गारपीठे त्रिकोणं सञ्चिन्त्य तत्र तार्तीयं विचिन्त्य कामकलाधिष्ठितं चिच्चन्द्रं विभाव्य भ्रूमध्यादुद्यन्तीं कुण्डलिनीं चिच्चन्द्रेण संयोज्य तत्सम्पर्कगलितामृतधारयात्मानमाप्लुत्य कामकलारूपं ध्यायेदिति परान्यासः। स्वशिरसि त्रिकोणं ध्यात्वा रेखात्रयेषु तत्तद्देवता न्यसेदिति पश्यन्तीन्यासः। ब्रह्मरन्ध्रसीमन्तललाटभ्रूमध्यविशुद्धानाहतमणिपूरस्वाधिष्ठानमूलाधारेष्वविकृतभूतशून्यस्पर्शनादबिन्दुशक्तिबीजाक्षरनाथान् न्यसेदिति मध्यमान्यासः। आधारादिब्रह्मरन्ध्रान्तं चक्रेषु 'ह्र्यौं ह्र्यैं ह्र्यी ह्र्यीं ह्र्यैं ह्र्यौंम्' इति बीजपुरःसराणि तत्तच्चक्राक्षराणि विन्यसेदिति वैखरीन्यासः। मूलहृद्भालब्रह्मरन्ध्रेषु लिङ्गचतुष्टयं न्यसेदिति लिङ्गन्यासः, ततो भूषणन्यासः, वाग्देवतान्यासः, करन्यासः, नवयोनिन्यासाष्टयोनिन्यासौ न्यसनीयौ। ब्रह्मरन्ध्रसीमन्ताज्ञा विशुद्धानाहतमणिपूरस्वाधिष्ठानमूलाधारेषु तदधस्त्रिकोणानि सञ्चिन्त्य मूलं न्यसेदित्यन्तर्योनिन्यासः। नित्यान् मन्त्रानुच्चार्य स्वरस्थानेषु षोडश नित्या न्यसेदिति नित्यान्यासः। तत्तन्मन्त्रपुरःसर नव चक्राणि नवचक्रेषु न्यसेदिति श्रीचक्रन्यासः। अयमपि सौभाग्यरत्नाकरे सृष्ट्यादिभेदेन पञ्चधा प्रदर्शितः, पूजारत्ने त्वेक एव। प्रकट-गुप्त-गुप्ततर-सम्प्रदाय-कुल-कौल-निगर्भ-रहस्यातिरहस्य-परापररहस्य-योगिनीरेतेषु स्थानेषु न्यसेदिति योगिनीन्यासः। त्रिपुरा त्रिपुरेशी त्रिपुरसुन्दरी त्रिपुरवासिनी त्रिपुराश्रीः त्रिपुरमालिनी त्रिपुरासिद्धा त्रिपुराम्बा महात्रिपुरसुन्दरी समन्त्रा इमाः चक्रेश्वरीस्तेष्वेव स्थानेषु न्यसेदिति चक्रेश्वरीन्यासः।

ततश्च शृङ्खलान्यासः, पीठन्यासस्तत्त्वन्यासो मूले हृदि भाले ब्रह्मरन्ध्रे च न्यस्तव्यः। पञ्चदशी पञ्चदशवर्णान् पञ्चदशस्वरस्थानेषु विन्यस्य सर्वं मूलं ब्रह्मरन्ध्रे न्यसेदिति वर्णन्यासः। विद्यया करशुद्धिन्यास-भूषणन्यास-योगिनीन्यास-वर्णन्यास-दशेश्वरीन्यास-विद्यान्यासा न्यसनीयाः। शुक्लकृष्णपक्षविभेदेन लघुकामकलान्यासो वर्णन्यासश्च आद्यः। द्वितीयो मुखमण्डल-स्तनमण्डल-सपरार्धकलात्मकयोनिरेखाङ्कितपूर्णावयवव्यापकत्वेन कामकलान्यासो विधीयते, यस्य वर्णनम्—

मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम्।

इत्यादि प्रकारेण सौन्दर्यलहर्यामिव वर्त्तते। पुनश्च पञ्चधा षोडशीन्यासे कामरतिमातृकाख्ये न्यासे च कृते लघुषोढान्यासाधिकारप्राप्तिः सञ्जायते। तत्र —

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम्।
देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम्॥

महागणपतिमन्त्रपुरस्सरं प्रथमो गणेशमातृकान्यासः, द्वितीयो ग्रहन्यासः, तृतीयो नक्षत्रन्यासः, तुरीयो योगिनीन्यासः, पञ्चमो राशिन्यासः, षष्ठः पीठमातृकान्यास इति षड्विधो न्यासो विधीयते इति पीठन्यासस्य विषये यद्गुरुमुखैः श्रुतं तद्वच्मि—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सतीचरित्रे भगवता शङ्करेणोद्धृत्य तच्छरीरं प्रवृत्ते ताण्डवे सतीशरीरावयवानि पृथिव्यां पञ्चाशतस्थानेषु यत्र यत्र निपतितानि, तत्र तत्रैव स्थानेषु पीठानां स्थितिरिति श्रूयते वृद्धवचनैः, तदेव पीठानान्तत्त्वम् । अनन्तरञ्च गुरुमुखैकगम्यो महाषोढान्यासो विधीयते, तत्र ध्यानम्—

विधिविष्णुशङ्करसरस्वतीन्दिरागिरिजादिमूर्तिपरिकल्पनाश्रयाम् ।
जगदादिमध्यविरतिक्रियाक्षमां प्रणमामि शम्भुवपुरर्थभूषणाम् ॥

महाषोढाख्यं न्यासं ततः कुर्यात् समाहितः ।
वक्ष्यमाणेन विधिना देवताभावसिद्धये ।
यस्य कस्यापि नैवोक्तं तव स्नेहाद् वदाम्यहम् ।
प्रपञ्चो भुवनं मूर्ति मन्त्रदैवतमातरः ॥
महाषोढाह्वयो न्यासः सर्वन्यासोत्तमोत्तमः ।

प्रासादपरा पराप्रासादबीजत्रयमादौ सर्वत्र योजनीयम् । प्रपञ्चन्यासः, भुवनन्यासः, मूर्तिन्यासः, मन्त्रन्यासः, देवतान्यासः, भैरवमातृकान्यासश्च षड्विधो न्यस्यते, तस्मादेव महाषोढा-न्यासः, षडङ्गीपरः, यत्र मुद्रादशकम्, तद् यथा—योनिलिङ्ग-सुरभि-कपाल-ज्ञान-त्रिशूल-पुस्तक-वनमाला-नभोमुद्रा-महामुद्राः प्रदर्श्यन्ते कृते न्यासे—

महाषोढान्यासस्य महिमा यथा—

यथाशक्ति जपेन्मूलमन्त्रं श्रीपादुकामपि ।
णागुरु कृतं नाम मूलाधारे विचिन्तयेत् ॥
एवं न्यासे कृते देवि साक्षात् परशिवो भवेत् ।
मन्त्री चात्र न सन्देहो निग्रहानुग्रहक्षमः ॥
महाषोढाह्वयं न्यासं यः करोति हि पार्वति ।
देवाः सर्वे नमस्यन्ति तन्नमामि न संशयः ॥
महाषोढाह्वयं न्यासं यत्र मन्त्री न्यसेत् ततः ।
दिव्यक्षेत्रं समुद्दिष्टं समन्ताद् दशयोजनम् ॥
कृत्वा न्यासमिमं देवि यत्र गच्छति मानवः ।
तत्र श्रीर्विजयो लाभः सन्मानं पौरुषं प्रिये ॥
महाषोढाकृतन्यासो यस्तदाज्ञां च निन्दति ।
मासान्मृत्युमवाप्नोति यदि त्राता शिवः स्वयम् ॥
वज्रपञ्जरनामानमेवं न्यासं करोति यः ।
दिव्यन्तरिक्षभूशैलजलारण्यनिवासिनः ॥
भयग्रस्तेन मनसा नेक्षन्ते साधकं प्रिये ।
महाषोढाह्वयं न्यासं ब्रह्मविष्णुशिवादयः ॥
देवाः सर्वेऽपि कुर्वन्ति ऋषियोगिमुनीश्वराः ।
बहुनोक्तेन किं देवि सुशिष्याय प्रकाशयेत् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आज्ञासिद्धिमवाप्नोति रहस्यं न्यासमाचरन् ।
अनेकजन्मपुण्येन न्यासोऽयं प्राप्यतेऽनघे ।।
ऊर्ध्वाम्नायप्रवेशश्च पराप्रासादचिन्तनम् ।
महाषोढापरिज्ञानं नान्यस्य तपसः फलम् ।।

इत्थं महाषोढान्यासं विधाय महाकामकलान्यासमाचरेत्, यथा—

बिन्दुरूपशिवाकारां स्वयं शक्तिस्वरूपिणीम् ।
हरार्धाभ्यां हंसरूपां भजे कामकलां पराम् ।।

महाकामकलान्यासस्तु श्रीगुरुमुखैकगम्यः, नान्यथा । अनन्तरञ्च महाशक्तिन्यासो विधीयते, तत्र ध्यानम्—

बीजं वाग्भवसंज्ञकं निगदितं तन्त्रेषु सिद्धिप्रदं
तद्रूपं कुसुमेषु वासभुवनं लोकत्रयोत्पादकम् ।
यस्याश्चेतसि भावनाभिरसकृन्मोक्षैकमार्गप्रदं
तां शक्तिं प्रणमामि शङ्करवधूसायुज्यसम्प्राप्तये ।।

नहि बीजमबिन्दुकं भवेन्न विना बिन्दुरसौ भगोद्भवम् ।
शिवशक्तिसमागमादिह प्रभवेन्मुक्तिपदं निरामयम् ।।

तत्र प्रथमं जगच्छून्याकारं निरालम्बं ध्यायेदासनाधः पृथ्वीं सम्पूज्य स्वासनं वामहस्तेन स्पृशन् भुवनेश्वरीबीजं सप्तवारं जपित्वा स्वासने सप्तशक्तीः सम्पूज्य मूलेन प्राणायामत्रयं कृत्वा, ऋष्यादिकरषडङ्गन्यासान् स्मृत्वा न्यासं कुर्यात् । तत्रोक्तमन्त्रैरात्मरक्षां कृत्वा—

त्रिपुराख्या महादेवी भुक्तिमुक्तिफलप्रदा ।
न गुरोः सदृशं यस्तु न देवाः शङ्करोपमाः ।।
न च कौलात् परो योगो न विद्या त्रैपुरीसमा ।
न च शक्तेः परं ज्ञानं न च क्षान्तेः परं सुखम् ।।
न वै शक्तिसमो न्यासो न विद्या त्रैपुरीसमा ।
दर्शनेषु समस्तेषु पाषण्डेषु विशेषतः ।
दिव्यरूपा महादेवी सर्वत्र परमेश्वरी ।।

इति मन्त्रविद्याया महिमानं स्मृत्वा परमेश्वरीमन्त्रं सकृज्जपित्वा त्रैपुरमन्त्रस्य पूजां विधाय त्रयोदशमहाविद्याः पूजयेत् ।

'ॐ ऐं क्लीं सौः आत्मदेहाय नमः' इति स्वं सप्तधा सम्पूज्य देहे वनिताक्षोभकरीं महाकामकलां ध्यायेत् । ततश्च श्लोकशतं न्यासानुसन्धानेन पठेत् । तत्रैव फलस्तुतिर्यथा —

कामिनी कुरुते चापि या न्यासं शक्तिनिर्मितम् ।
तां देवीं दिव्यरूपस्थां संसारे त्रिपुरे विदुः ।।
पुत्राणाञ्च तथा देयं भक्तानाञ्च विशेषतः ।
शक्तिन्यासमिमं देयं न देयं यस्य कस्यचित् ।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मनुष्याणां महीलोके वाञ्छितार्थफलप्रदम् ।
यः करोति महान्यासं षोढान्यासादिकं प्रभोः ॥
स जीवन्मुक्तरूपो वै त्रैलोक्योन्मूलनक्षमः ।
शक्तिन्यासे कृते जीवे यः कश्चिच्छेदको भवेत् ॥
कर्मणा मनसा वाचा तस्य पापं भविष्यति ।

इति महाशक्तिन्यासः ।

ततश्च श्रीविद्यामूलषोडशाक्षरन्यासः, पञ्चाम्बान्यासः, दिव्यौघसिद्धौघमानवौघन्यासाः, पारम्पर्यन्यासः, षोडशमूलविद्यान्यासः, षडाधारमूलविद्यान्यासः, मालिनीन्यासः, षडन्वयन्यासः कर्त्तव्यः । शाम्भवदीक्षायुक्तश्चेत् पञ्चरत्नन्यासः, वक्त्रादिन्यासः, बीजषोढान्यासः, महामालिन्यादिषोढान्यासः, पञ्चरत्नपरादित्रिविधो न्यासः, गुरुपारम्पर्यन्यासः, षडन्वयरश्मिन्यासो न्यस्तव्यः । चरमस्तावदयं न्यासो भवति सौन्दर्यलहर्याम्—

'क्षितौ षट्पञ्चाशत्' इति पद्ये रश्मिन्यासस्यैव स्मृतिर्दृश्यते । एतन्न्यासपर्यन्तमेव विज्ञैर्विज्ञायते न्यासविज्ञानम् । यावत्पर्यन्तं न्यासं तावती सपर्याऽपि कार्या । न्यासे कृते देहस्यैव देवत्वसिद्धिरिति प्रतिमाप्रतिष्ठादावपि न्यासेनैव तत्र देवत्वं स्फुरति, कृते च न्यासे जपाधिकारः सञ्जायते । कृत्वा न्यासात्मकं जपं पश्चाद् गुरुभैरवं गणपतिं बालां पञ्चदशीं षोडशीं कामेश्वरं पराप्रासादं कामकलां मालिनीं परां चरणविद्यां षट्शाम्भवीं विद्यां निर्वाणविद्याञ्च जपेत् । इत्यलं पल्लवितेन ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

[1]पूर्णाहन्ताविमर्शः

कौलो जानकीनाथः,
७७–द्रावीयार, श्रीनगरम्, कश्मीरः ।

या काचिद्वै क्वचिदपि दशा कश्चिदभ्यासपूरा-
दानन्दाख्या गुरुकरुणया यस्य कस्या भवेन्नः ।
सिद्धिस्सैवा सुरपितृनृणां यस्यभक्त्या भवेत् तत्
तं स्वात्मानं विभववपुषं साध्यसिद्धं प्रपद्ये ॥

पूर्णाहन्ताया विमर्शोऽतीव दुरूहोऽस्ति यतः पूर्णाहन्ता 'स्वानुभूत्येकमाना' एव काचिद्दशा भवति, ततस्तस्यानुसन्धानं मोक्षकाङ्क्षिभिर्यतिभिरेवानुमेयमस्ति । तथापि सज्जनोपस्थित्या समलङ्कृतेऽस्मिन्तन्त्रसम्मेलने स्वान्तःसुखाय विद्वज्जनपरितोषाय च एतस्मिन्विषये किंचिद्वर्णयितुं साहसः क्रियते ।

अहन्तास्वरूपम्—

अहन्ता द्विप्रकारा । तत्र एकाऽनुलोमप्रकृत्या निमित्तोपादानेन निर्मिते दृश्यप्रपञ्चे जीवस्य जाग्रदवस्थायां सङ्कल्पविकल्पात्मिका स्थूलदेहपर्यन्ता 'इदमहम्, इदं मम' इति रूपेण वर्तते । एतज्जीवस्याज्ञावस्था, यतोऽस्माद् द्वैतप्रथाप्रथनमेव दृढतां याति । अस्यामवस्थायां जीवोऽनेकासु यातनासु त्रिविधतापयुते संसारे पीडितो भवति । मोहिन्या माययाभिभूतो जीवो जन्ममरणदुःखमेवानुभवति ।

द्वितीयप्रकाराऽहन्ता साधनचतुष्टयानन्तरम् ऋतम्भराख्यायाः प्रज्ञाया वर्धनादेव साधकस्य परमार्थपथे विचरतः प्रतिलोमप्रकृत्या स्थूलसूक्ष्मप्रपञ्चस्य प्रविलापनाभ्यासेन शून्यभावमापन्ने ब्रह्मणि प्रथमं प्रविलापनरूपा तदनन्तरं साक्षिरूपब्रह्मणि शिष्यमाना 'ज्ञाननिर्धूतकल्मषा' शिवस्वरूपलाभरूपा एव भवति ।

शक्तिपात एवात्र मुख्यं कारणम्, यतः—

ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
महद्भयपरित्राणा विप्राणामुपजायते ॥

अन्यच्च,

"यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।"
(कठोपनिषद्)

भगवद्दर्शनमनुप्रविश्यापि तत्र ये विप्रतिपन्नास्तेषामनर्गलोऽपि शक्तिपातो नायातः । यथोक्तं शैवतन्त्रेषु—

१. अयं निबन्धः वाराणसेयसंस्कृतविश्वविद्यालये तन्त्रसम्मेलने विदुषा लेखकेन पठित आसीत् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ये यौष्माके शासनमार्गे कृतदीक्षाः
संगच्छन्तो मोहवशाद्विप्रतिपत्तिम् ।
नूनं तेषां नास्ति भवद्भ्रानुनियोगः
सङ्कोचः किं सूर्यकरैस्तामरसानाम् ॥

अतोऽनुग्रहोपलब्धा ये त्वहोरात्रोदयसंहारपूरकरेचकप्रशम आरूढाः, प्रातःसन्ध्यारूपकुम्भकभावे स्थिताः 'न द्वयोऽस्येककस्थितः', "यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते", "सर्वसङ्कल्पसन्न्यासी" इति भावेन लोकोत्तरा अग्राध्वप्रकाशनपरा एव योगिनः, त एव पूर्णाहन्ताया अवगाहने क्षमाः ।

एतदेवास्मिता समावेशाभ्यासरूपा ।

"इदं सर्वं यदयमात्मा", "शिव एव गृहीतपशुभावः" इति क्रमशः श्रुत्या काश्मीरशैवमतोक्त्या च ज्ञानिनो यदा—

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

इति प्रत्यग्दृष्ट्या "सर्वं ब्रह्मैव" इति दर्शनेन कर्माणि नित्यनैमित्तिकादीनि सर्वाणि सर्वात्मनि ब्रह्मणि संन्यस्य सर्वं ब्रह्मैवेत्यनेन प्रविलापनं कुर्वन्ति, यथा—

यथा जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषो भवेत् तद्वज्जीवात्मपरमात्मनोः ॥

तदैव तेषां ज्ञानिनां पूर्णाहन्ता केवलमात्रानुभवरूपा "न शक्यते वर्णयितुं गिरा तदा" भवितुमर्हति । ते ज्ञानिनस्तदैव प्रकाशैक्यमापन्ना भवन्ति ।

ततः पूर्णाहन्ता समावेशारूढा परप्रमात्रेकरूपा, सजातीयवृत्तिप्रवाहविजातीयतिरस्कारतैलधारावदिति दृढाभ्यासानन्तरमेवानुभवरूपा भवति । साक्षिभावेऽपि शान्ते सति, निष्कलं परिच्छेदशून्यं शिवं परिशिष्यति । यथात्मोपनिषद्—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥

अन्यच्च—

अन्तर्लक्ष्यं वहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।
सा भवेच्छाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

(शैवदर्शने) आगमशास्त्रेष्वपि—

शिवनभसि विगलिताक्षः
कौण्डिल्युन्मेषविकसितानन्दः ।
प्रज्वलितसकलरन्ध्रः
कामिन्या हृदयकुहरमधिरूढः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

योगी शून्य इवास्ते
तस्य स्वयमेव योगिनी हृदयम् ।
हृदयनभोमण्डलगं
समुच्चरत्यनलकोटिशतदीप्तम् ॥

एतदेवास्मितात अहन्ताया वैलक्षण्यप्रदर्शनम् । अस्या अवस्थाया अभ्यासाय गुरुः शिष्यमुपदिशति (गातव्यमिदम्)—

तस्मिन्नेव ब्रह्मणि—तस्मिन् ब्रह्मणि
रे चित् ! विचर विगतदर्पेण
नाभिभूतः कन्दर्पेण । —तस्मिन्नेव०
त्यक्त्वा मायामोहावेशं
भावय कोऽहं भज सर्वेशम् ॥ —तस्मिन्नेव०
विचरन्नप्यस्मिन् संसारे
पश्यात्मानं स्फुटविस्तारे । —तस्मिन्नेव०
रे चित् ! चेतय चिन्तातीतं
चारुचमत्कृतचञ्चलत्वम् । —तस्मिन्नेव०
'त्वं'पदलक्ष्यार्थं तं श्रुत्वा
स्वच्छन्दश्चर 'तद्' विदित्वा । —तस्मिन्नेव०
जानकीनाथं जगन्मायेशं
भज तं त्यक्त्वा त्रिगुणावेशम् ॥ —तस्मिन्नेव०

सच्छिष्यः स्वानुभवं वदति (एतदपि गातव्यम्)—

अजोऽनामयोऽहमनाख्योऽचलोऽह–
मसंगोऽमयोऽहमव्यक्तोऽखिलोऽहम् ।
अशेषोऽक्रियोऽहमलिप्तोऽतुलोऽहम्,
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अनाद्योऽक्षयोऽहमदूरोऽमरोऽह–
मपारोऽपरोऽहमनन्तोऽजरोऽहम् ।
अकर्ताऽच्युतोऽहमभोक्ताऽमलोऽहं
निजानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अहं नित्यमुक्तो निराकारधीरोऽ-
स्म्यहं निर्विकल्पो निराधारतृप्तः ।
अहं निष्क्रियो निर्विबन्धः परेशः
सदानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अहं निश्चलो निरपेक्ष उदारोऽ-
स्म्यहं नित्यशुद्धो निरालम्बभद्रः ।
अहं निर्मलो निरवद्यः खकारो
महानन्दरूपश्शिवोऽहं शिवोऽहम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अहं ज्ञानगम्यो गिरातीतशम्भु-
रहं ज्ञानरूपः परातीतसाक्षी ।
अहं चिद्विमर्शः कलातीतव्यापी
शिवानन्दरूपः शिवोऽहं शिवोऽहम् ॥
अहमद्भुतः सद्घनः सर्वरूपोऽ-
स्म्यहमूर्ध्वाधः चिद्घनः चित्स्फुरः ।
अहं सदसत्सर्वगस्सर्वरूपो
निरानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
अहं निर्विवादो निराधारगूढोऽ-
स्म्यहं व्यापको बोधभानुश्च गुप्तः ।
अहं कारणं केवलः कर्मकर्ता
परानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
प्रकृष्टः प्रगल्भः प्रतप्तः परोऽह-
मकार उकारो मकारेश्वरोऽहम् ।
स्वतन्त्रोऽवितर्कोऽविकारोऽक्षरोऽहं
दयानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
अहं परमप्रेमास्पदं प्रेमकर्ताऽ-
स्म्यहं ज्ञानज्ञेयस्वरूपः परात्मा ।
अहं चिन्मयो नित्यचैतन्यरूपः
चिदानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
गगनाम्बरोऽहं च संतृप्तस्वस्थोऽ-
स्म्यहं पूर्णरूपश्च शान्तिस्वरूपः ।
अहं शक्तिसन्दोहविजृम्भितात्मा
गिरानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
अहमादिमध्यान्तहीनः पुरात्माऽ-
स्म्यहं युक्तप्रत्यक्षरूपः, शिवात्मा ।
अहं ब्रह्मास्मीति बोद्धाऽचलात्मा
स्थिरानन्दरूपश्शिवोऽहं शिवोऽहम् ॥
परामर्शसाराहंनामशतक-
मिदं यः पठेदहं पराऽस्मीति ध्यात्वा ।
अहङ्कारनिर्मूलनं चेति कृत्वा
स नन्दति नन्दति नन्दत्येव ॥

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्भविनो लक्षणाभेदाः काव्ये तदुपयोगश्च

पं० श्रीवायुनन्दनपाण्डेयः, साहित्यविभागप्राध्यापकः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

विदग्धगोष्ठीगरिष्ठा ललितोचितशब्दसन्निवेशलब्धप्रतिष्ठाः कवयो बुधाश्च प्रायो लाक्षणिकान् शब्दान् प्रयुञ्जाना दृश्यन्ते। अष्टादशप्रस्थानभिन्नानां विद्यानामनवद्योद्भवस्थानेऽपौरुषेये वेदेऽपि "यजमानः प्रस्तरः, वायुर्वै क्षेपिष्ठा देवता, आयुर्घृतम्" इत्यादि बहुशो लाक्षणिकाः प्रयोगा उपलभ्यन्ते। अत एव वाक्यार्थविचारचतुरा मनीषिणो मीमांसका लक्षणां सप्रभेदां लक्षयामासुः। पदलक्षणाग्रा वाचोऽन्वाख्याने निपुणा विद्वद्वरेण्या वैयाकरणास्तर्ककर्कशशाणोल्लीढपरिणतनिशितमतयस्तार्किका अपि यथोपयोगमनेकप्रभेदप्रभिन्नां लक्षणां समाम्नासिषुः। महावाक्यार्थविदो वेदान्तिनोऽपि बाहुल्येन लक्षणां सामान्यतो विशेषतश्चोचुः। परं वाग्देवताऽलङ्करणविन्यासविकसितप्रातिभप्रकाशाः साहितीसुधासुहितमानसास्सभ्यजनानुरञ्जनलालसाः प्रकटितवाग्विलाससुमेधसः साहित्यिका एव बाहुल्येनानेकप्रभेदप्रभिन्नां लक्षणां वृत्तिं लक्षयाञ्चक्रुः।

तत्रभवान् साहित्यार्णवकर्णधारः प्रतिभासनाथः श्रीविश्वनाथकविराजश्चतुर्दशभाषावारविलासिनीभुजङ्गः स्वकृतसाहित्यदर्पणे द्वितीयपरिच्छेदे सहृदयसमाजसभाजितां चतुरजनोपासितां लक्षणां वृत्तिं लक्षयित्वा विशेषजिज्ञासायां तद्भेदानुपवर्णयन् कामपि नवीनां दिशमुन्मीलयाञ्चक्रे। तद्यथा—प्रथमतो लक्षणा स्वहेतुभूतरूढिप्रयोजनवशाद् द्विविधा—रूढिः प्रयोजनवती च। तत उपादानलक्षणलक्षणाभ्यां प्रत्येकं द्विधेति चतुर्विधा। सा चतुर्विधाप्यारोपाध्यवसानाभ्यां भेदादष्टविधा। ताः सकलाः शुद्धगौण्योर्भेदयोर्विभक्ता षोडशविधा। तत्राष्टौ रूढयः, अष्टौ प्रयोजनवत्यः। तत्राष्टविधप्रयोजनवतीषु प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया षोडशभेदाः, पुनस्तेषु प्रयोजनस्य धर्मिधर्मगतत्वेन च प्रत्येकं द्विधेति द्वात्रिंशद्विधाः। एवं प्रयोजनवत्यो द्वात्रिंशद्विधा लक्षणाः। ताश्च प्रत्येकं पदगता वाक्यगताश्चेति पुनर्द्विधाभूत्वाऽशीतिप्रकारतां यान्ति।

अथ तासामुदाहरणानि—

१. रूढावुपादानलक्षणायाः—श्वेतो धावति।
२. प्रयोजनवत्युपादानलक्षणायाश्च—कुन्ताः प्रविशन्ति।
३. रूढिलक्षणलक्षणायाः—कलिङ्गः साहसिकः।
४. प्रयोजनवल्लक्षणलक्षणायाः—गङ्गायां घोषः।
५. रूढावुपादानलक्षणसारोपायाः—अश्वः श्वेतो धावति।
६. प्रयोजनवत्युपादानलक्षणसारोपायाः—एते कुन्ताः प्रविशन्ति।
७. रूढौ लक्षणलक्षणसारोपायाः—कलिङ्गपुरुषो युध्यते।
८. प्रयोजनवल्लक्षणलक्षणसारोपायाः—आयुर्घृतम्।

एतान्येवोदाहरणानि शुद्धायास्सन्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गौण्याश्च—

१. रूढावुपादानलक्षणा सारोपा गौणी यथा—एतानि तैलानि हेमन्ते सुखानि ।

२. प्रयोजनवत्युपादानलक्षणसारोपा गौणी यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु एते राजकुमारा गच्छन्ति ।

३. रूढावुपादानलक्षणा साध्यवसाना गौणी यथा—तैलानि हेमन्ते सुखानि ।

४. प्रयोजनवत्युपादानलक्षणा साध्यवसाना गौणी यथा—राजकुमारा गच्छन्ति ।

५. रूढौ लक्षणलक्षणा सारोपा गौणी यथा—राजा गौणेन्द्रं कण्टकं शोधयति ।

६. प्रयोजनवल्लक्षणलक्षणा सारोपा गौणी यथा—गौर्वाहीकः ।

७. रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा—राजा कण्टकं शोधयति ।

८. प्रयोजनवल्लक्षणलक्षणा साध्यवसाना गौणी यथा—गौर्जल्पति ।

अत्रोदाहृतास्वष्टविधासु प्रयोजनवतीषु प्रयोजनस्य व्यञ्जनावृत्तिवेद्यस्य गूढागूढताभ्यां द्वैविध्यम् । तत्र गूढत्वं वाक्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यत्वम्, अगूढत्वं सर्वजनसंवेद्यत्वम् ।

तत्र गूढव्यङ्ग्यस्योदाहरणं यथा—

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमस्व ततः शरदां शतम् ।।इति ।

बहुभिरपकारैस्तप्यमानस्य कस्यचिदुक्तिरियं यत्—हे सखे ! त्वया बहूपकृतम्, तत्र विषये किमपि वक्तुं न शक्यते । भवता केवलं सौजन्यं प्रथितम्, न पुनः प्रत्युपकारापेक्षयोपकारो विहितः । ततः (यस्मात् सुजनता प्रथिता तस्मात्) ईदृशमेव सदा कुर्वाणो वर्षाणां शतं यावत् सुखितं यथा स्यात् तथा आस्स्वेति मुख्योऽर्थः । स च प्रकरणादिना ज्ञातापकारिणं प्रति बाधितो वैपरीत्य-सम्बन्धेनान्यथा लक्षयति । तद्यथा–उपकृतमित्यनेनापकृतम्, सुजनतेत्यनेन दुर्जनता, सखे इत्यनेन च शत्रो, सुखितमित्यनेन दुःखितम्, शरदां शतमास्स्वेत्यनेन चाद्यैव म्रियस्वेत्यादयो लक्ष्यन्ते । अपकारातिशयो (तवापकारो वचनानर्हं इति) व्यङ्ग्यं प्रयोजनम् । इदं च प्रयोजनं सूक्ष्ममतिमात्रवेद्यतया गूढम् ।

अगूढव्यङ्ग्यस्योदाहरणं यथा—

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ।। इति ।

अस्यार्थः–लक्ष्म्याः प्राथमिकसम्बन्धाद् अनभिज्ञा अपि चतुरजनचरित्राणां ज्ञातारो भवन्ति । (वस्त्विदम् विशेषेण सामान्यसमर्थनरूपार्थान्तरन्यासेन समर्थयति यत्—) यौवनभार एव कामिनीनाम् (अत्र चतुर्थ्यर्थे षष्ठी) कामिनीभ्यः सुकुमारतयाङ्गविन्यासादीनि रतिचेष्टितादीनि (हावभावविब्वोकविलासादीनि वा) उपदिशति—इति । उपदेशपदार्थश्च ज्ञानानुकूलशब्द-प्रयोगः, स चाचेतने यौवनमदे बाधितः सामान्यविशेषभावसम्बन्धेन आविष्करोतीत्यर्थं लक्षयति । आविष्कारातिशयश्च प्रयोजनम्, तच्च सर्वजनसंवेद्यतया स्फुटमिति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

फलस्य धर्मिगतस्योदाहरणं यथा—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि ! धीरा भव ॥ इति ।

पद्ये "रामोऽस्मि सर्वं सहे" इति वाक्यघटकराम इति पदस्य वक्तृत्वादस्मीति क्रियापदेन च लाभाद् रामशब्दो बाधितमुख्यार्थः सन् दुःखसहिष्णुरूपं रामं लक्षयति । अत्यन्तदुःखसहिष्णुराम इति दुःखसहिष्णोरतिशयः फलम् ।

धर्मगतस्योदाहरणं यथा—गङ्गायां घोषः । अत्र तटे शीतत्वपावनत्वरूपस्य धर्मस्यातिशयः फलम् । सर्वासामनन्तरोक्तानां चत्वारिंशद्विधानां लक्षणानां पदवाक्यगतत्वेन चाशीतिप्रकारा लक्षणा । तत्र पदगतस्योदाहरणम्—गङ्गायां घोषः । वाक्यगतस्योदाहरणम्—उपकृतं बहु तत्र किमुच्यते, सुजनता प्रथितेत्यादिपद्यम् । अन्येषां भेदानामुदाहरणं स्वयं मृग्यमिति ।

इत्थमशीतिप्रकारा लक्षणा साहित्यदर्पणकृतैव प्रतिपादिता, नान्यैः कैरप्यालङ्कारिकैः, न वा मीमांसकैस्तार्किकैः शाब्दिकैर्वेति क्रमशस्तेषां मतानि यथोपलब्धान्युद्ध्रियन्ते । तत्रालङ्कारिकाणां मतानि बहुविवेच्यत्वात् पुरस्ताद् मीमांसकादीनां मतानि सूचीकटाहन्यायेनोपस्थाप्यन्ते ।

तत्र श्रीभट्टमहोदयास्तन्त्रवार्त्तिके जगदुर्यत्—

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् ।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः ॥ इति ।

भाट्टचिन्तामणौ गागाभट्टोऽपि जहल्लक्षणाऽजहल्लक्षणेति भेदमूचे । 'यजमानः प्रस्तरः' इत्यत्र यजमानशब्दस्य गौणीवृत्त्या यजमानसदृशोऽर्थः । पुनश्च लक्षणया 'प्रशस्तः प्रस्तरः' इत्यर्थ उपपादित इत्येषा लक्षणा गौणीगर्भलक्षणेति भाट्टदीपिकायामुक्ता । एवञ्च प्रायो निरूढा लक्षणा, साम्प्रतिकी लक्षणा असाम्प्रतिकी लक्षणा, साम्प्रतिक्याश्च जहल्लक्षणा, अजहल्लक्षणा, गौणीगर्भलक्षणा, अथवा लक्षितलक्षणेति भेदाः । गौणी चान्या वृत्तिरिति ।

वेदान्तिनोऽपि प्रायो यथोपयोगं लक्षणां विभेजिरे । तथाहि धर्मराजाध्वरीन्द्रो वेदान्तपरिभाषायामागमपरिच्छेदे लक्षणाभेदं निरूपयन्नाह—लक्षणा द्विविधा—केवललक्षणा लक्षितलक्षणा च । यत्र शक्यस्य साक्षात्सम्बन्धस्तत्र केवललक्षणा, यथा–'गङ्गायां घोषः' इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि तीरे गङ्गापदस्य केवललक्षणा । यत्र शक्यपरम्परासम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा । यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिः । गौणीवृत्तिरस्य मते न पृथग्, अपि तु लक्षितलक्षणैव । प्रकारान्तरेण लक्षणा त्रिविधा—जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति । उदाहरणं च क्रमशः—विषं भुङ्क्ष्व, शुक्लो घटः, तत्त्वमसि, सोऽयं देवदत्त इत्यादि । अस्य मते जहदजहल्लक्षणाया उदाहरणम्—काकेभ्यो दधि रक्ष्यतामिति । इयमेव जहदजहल्लक्षणा भागत्यागलक्षणेति प्राचीनैर्वेदान्तिभिरुक्तेति । मीमांसका वेदान्तिनश्च लक्षणां पदवृत्तिं वाक्यवृत्तिं च स्वीकुर्वन्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नैयायिकानां मते लक्षणाभेदाः—जगदीशभट्टाचार्याः शब्दशक्तिप्रकाशिकायामाहुर्यत्—

जहत्स्वार्थाऽजहत्स्वार्था निरूढाऽऽधुनिकादयः ।
लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा ॥ २७ ॥ इति

गदाधरभट्टाचार्या व्युत्पत्तिवादे प्रथमाकारकेऽनेकशः स्वारसिकलक्षणामाहुः, तद्यथा—राजसम्बन्धिनि स्वारसिकलक्षणाग्रहदशायामभेदसम्बन्धेन राजसम्बन्धिविशिष्टपुरुषे तात्पर्यग्रहसत्त्वे भवन्मतेऽपीत्यादौ । अन्यत्र च स्वारसिकलक्षणाग्रहस्थलानुरोधेनेत्यादिः । पुनस्तत्रैव राजसम्बन्धिनि स्वारसिकलक्षणाग्रह इत्यादिना चानेकशः स्वारसिकलक्षणामाहुः, न्यायसिद्धान्तमुक्तावल्याञ्च विश्वनाथपञ्चाननेन यद्यपि भेदो न प्रतिपादितः, तथापि काकेभ्यो दधि रक्ष्यतामित्यत्रा जहत्स्वार्था लक्षणेत्युक्तम् । एवं गङ्गायां घोष इत्यत्र स्वतःसिद्धा जहत्स्वार्था । द्विरेफादिपदे च लक्षितलक्षणा-मुक्त्वाऽन्तर्भावयति स लक्षणायां लक्षितलक्षणामित्यधिकविचारो नोपलभ्यते तत्रेति । लक्षणां नैयायिका वाक्यवृत्तिं नाङ्गीकुर्वन्ति, प्राचीनवैयाकरणास्तु लक्षणाख्यां वृत्तिं स्वीकुर्वन्त्येव नहि कुतो भेदापादानम्, तथापि गौणमुख्यशब्दव्यवहारस्तेषां मते भवत्येव ।

हरिरप्याह—

सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मिणः ।
प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपचर्यते ॥ इति ।

परं नव्यवैयाकरणेषु सर्वमान्यो नागेशो लघुमञ्जूषायां लक्षणानिरूपणप्रकरणे लक्षणाभेदा-नाह, तथाहि—सा द्विविधा, गौणी शुद्धा च । स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्ब-न्ध्यर्थप्रतिपादिका लक्षणा गौणी । तदितरसम्बन्धेन या शक्यसम्बन्ध्यर्थप्रतिपादिका सा शुद्धा । प्रकारान्तरेणापि सा द्विविधा, अजहत्स्वार्था, जहत्स्वार्था च । त्वचा ज्ञातमित्यादौ त्वगिन्द्रिये निरूढा लक्षणा । ग्रामो दग्ध इत्यादावन्यमते जहदजहल्लक्षणां निरूपयति । स्वमतेऽजहल्लक्षणयैव गतार्थयति । लक्षितलक्षणां नाङ्गीकरोति । लक्षणां पदवृत्तिं वाक्यवृत्तिं च स्वीकरोतीति ।

इत्थमन्येषां दार्शनिकानां मते लक्षणाभेदान् यथामत्युपस्थाप्यालङ्कारिकाणां मते लक्षणा-भेदान् प्रस्तौमि । तत्रादावग्निपुराणस्याभ्यर्हितत्वात् तन्मतं पुरस्करोमि । सर्वज्ञो भगवान् व्यासोऽ-ग्निपुराणस्य पञ्चचत्वारिंशदधिकत्रिशततमाध्याये शब्दार्थोभयाऽलङ्कारनिरूपणप्रस्तावेऽभिव्यक्ति-मलङ्कारं निरूप्य तस्य श्रुतिराक्षेप इति द्वौ भेदावाह । पुनश्च श्रुतिश्चापि द्विविधा–पारिभाषिकी-नैमित्तिकीति भेदात् । सङ्केतः परिभाषास्ति, अतः सङ्केतबललभ्यार्थबोधिका श्रुतिः पारिभाषिकीति कथ्यते । केनचिन्निमित्तेनार्थबोधिका श्रुतिर्नैमित्तिकी । पारिभाषिकी नैमित्तिकी च द्विविधाऽपि श्रुतिर्मुख्यौपचारिकीभेदात् पुनर्द्विधा । स्ववाच्यात् स्खलद्वृत्तिः केनचिन्निमित्तेनामुख्यार्थस्य वाचिका श्रुतिर्नैमित्तिकी । सा एव लाक्षणिकीति कथ्यते ।

गुणयोगतो लक्षणा गौणी । अभिधेयसम्बद्धार्थप्रतीतिर्लक्षणा । सा च—

अभिधेयेन सम्बन्धात् सामीप्यात् समवायतः ।
वैपरीत्यात् क्रियायोगात् लक्षणा पञ्चधा मता ॥

गौणी पुनर्गुणानामानन्त्यादनन्तेति वमाषे । एवं लक्षणा गौणीति द्वौ भेदौ, सम्बन्ध-भेदाच्च लक्षणा पञ्चधा । गौणी अनन्तेति फलितम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनन्तरं भामहस्तु वृत्तिविषये 'शब्दाश्छन्दोऽभिधानार्था इत्युक्त्वा' तूष्णीमाललम्बे। भट्टोद्भटश्च स्वकृतभामहविवरणेऽभिधानस्य शब्दाद्भेदं व्याख्यातुं शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्चेति बभाषे। तत्र भेदचर्चा नास्तीति ध्वन्यालोकलोचनतोऽवसीयते (प्र० उ०)।

वामनाचार्यस्तु काव्यालङ्कारसूत्रवृत्तौ नेयार्थत्वदोषं निरूपयन् कल्पितार्थं नेयार्थमिति सूत्रवृत्तावाचचक्षे "ननु रथाङ्गनामादीनामपि प्रयोगोऽनुपपन्नः, न तेषां निरूढलक्षणत्वात्।"

अन्यत्र च लक्षितस्याश्लीलतां निराकुर्वन्नाह "लाक्षणिकासभ्यान्वितं लक्षितमिति सूत्रे यथा जन्मभूरिति। तद्धि लक्षणया गुह्यार्थं न स्वशक्त्येति।"

एवं चतुर्थाधिकरणे तृतीयाध्याये सप्तमसूत्रस्यान्ते वृत्तौ—यथा गौणस्यार्थस्यालङ्कारत्वम्, यथा लाक्षणिकस्यापीति दर्शयितुमाह-सादृश्याल्लक्षणा वक्रोक्तिः (सू० ८)। असादृश्यनिबन्धना तु लक्षणा न वक्रोक्तिरिति। वस्तुतस्तत्र प्रसङ्गत एव भेदविषये यत्किञ्चिदुपपादनं लक्ष्यते।

इत्थं वामनमते लक्षणाभेदविषये वक्तुं शक्यते यत्—निरूढलक्षणा गौणलक्षणा सादृश्यनिबन्धना। असादृश्यनिबन्धना लक्षणेति। एवमेवानन्दवर्धनाचार्येण लक्षणावृत्तितद्भेदविषये प्रसङ्गत एव यत्किञ्चिदुक्तम्, मुख्यप्रतिपाद्यत्वाभावात्। तन्निरूप्यते, तथाहि ध्वन्यालोके प्रथमोद्योते—"अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया" इति (१४)।

कारिकावृत्तावाह—यत्र हि व्यङ्ग्यकृतं महत् सौष्ठवं नास्ति, तत्राप्युपचरितशब्दवृत्त्या प्रसिद्ध्यनुरोधप्रवर्तितव्यवहाराः कवयो दृश्यन्ते। यथा—"कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्" इत्यत्र वदतिशब्दः।

अयं भावः—अत्र शयनं वदतीति मुख्यार्थो बाधितः, तस्य प्रकटयतीति लक्ष्यार्थः प्रयोजनं च स्फुटीकरणम्। एवमत्र स्फुटं प्रकटयतीति शब्देन कथनेऽपि किमचारुत्वम्? वदतीति कथने वा किं चारुत्वम्? अनेनैवाशयेन कारिकाकारो वक्ष्यति यत्—

उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयी भवेत्॥ इति (१५)।

अपि च—

रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः॥ इति (१६)।

पुनर्द्वितीयोद्योतेऽविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा-अर्थान्तरे सङ्क्रमितमत्यन्ततिरस्कृतं चेति प्रथमकारिकायामाह। तृतीयोद्योतारम्भे पदप्रकाशतां वाक्यप्रकाशताञ्च तयोराह।

इत्थं पर्यालोचनेन ज्ञायते यल्लक्षणा तावद् द्विविधा-निरूढा प्रयोजनवती च। प्रयोजनवती पुनर्द्विधा-अर्थान्तरसङ्क्रमितवाच्या (अजहत्स्वार्था), अत्यन्ततिरस्कृतस्वार्था (जहत्स्वार्था)। प्रयोजनवत्यां प्रयोजनञ्च क्वचिच्चारु, क्वचिदचार्विति द्विविधम्। पुनः पदवाक्यगतत्वेन च द्वैविध्यमिति।

अभिनवगुप्तपादाचार्यश्च यद्यपि लक्षणाभेदमप्रासङ्गिकत्वात् क्वचिदपि लोचने न कृतवान्, तथापि ध्वन्यालोकोक्तभेदान् टीकायामुट्टङ्कयामास। तथा हि प्रथमोद्योते "रूढा ये विषयेऽन्यत्र" इति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कारिकाव्याख्याने निरूढलक्षणा तत्रैवोपचरिता शब्दस्य वृत्तिर्गौणी लक्षणा चेत्याह । "मुख्यां वृत्तिं परित्यज्य" इति कारिकाव्याख्याने लोचने तेनानऽयं लक्षणलक्षणाया विषयो नेत्याह । वाचकत्वाश्रयेणैवेति कारिकालोचने अव्याप्तिरस्येति प्रतीकमादाय प्राह—"ननु लक्षणा तावद् गौणमपि व्याप्नोति । केवलं शब्दस्तमर्थं लक्षयित्वा तेनैव सह सामानाधिकरण्यं भजते सिंहो वटुः" इति । अग्रे च यदाह—गौणे शब्दप्रयोगः, न लक्षणायामिति । तत्रापि लक्षणाऽस्त्येवेति सर्वत्र सैव व्यापिका ।

अभिधेयेन संयोगादित्यस्योदाहरणं यथा—द्विरेफशब्दस्य हि योऽभिधेयो भ्रमरशब्दो द्वौ रेफौ यस्येति कृत्वा तेन भ्रमरशब्देन यस्य संयोगः सम्बन्धः षट्पदलक्षणार्थस्य सोऽर्थो द्विरेफशब्देन लक्ष्यत इति । अभिधेयेन सामीप्याद् गङ्गायां घोषः । समवायात्–(अत्र समवायपदेन आधाराधेयसारूप्यसंयोगादयो विवक्षिताः) यष्टीः प्रवेशय । वैपरीत्याद् यथा शत्रुमुद्दिश्य कश्चिद् ब्रवीति "किमिवोपकृतं न तेन मम" इति । क्रियायोगात्–"अन्नापहारिणि व्यवहारः प्राणानयं हरति" इति । एवमनया पञ्चविधया लक्षणया विश्वमेव व्याप्तमिति ।

एवं पर्यालोचनया ज्ञायते यद् ध्वनिकारोक्तान् सर्वान् भेदान् स्वीकरोति, गौणीं च लक्षणायामेवान्तर्भावयति, लक्षितलक्षणां न च स्वीकरोति । जहत्स्वार्थायाश्च लक्षणलक्षणेति नाम लोचनोपज्ञमिति ।

मुकुलभट्टश्चाभिधावृत्तमातृकायां लक्षणां तद्भेदांश्च सम्यग् निरूपयाञ्चक्रे, तद्यथा—लक्षणा द्विविधा—शुद्धा उपचारमिश्रा च । शुद्धा द्विविधा—उपादानलक्षणा, लक्षणलक्षणा । उपचारमिश्रापि द्विविधा शुद्धगौणोपचारयोर्भेदात् । पुनः शुद्धोपचारगौणोपचारयोः प्रत्येकमारोपाध्यवसानाभ्यां भेदादुपचारमिश्रा चतुर्धेति । यदुक्तम्—

आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः ।
प्रत्येकं विद्यमानत्वादुपचारश्चतुर्विधः ।। इति (अ० वृ० मा०)

पुनर्लक्षणा त्रिस्कन्धा शुद्धत्वादध्यारोपादध्यवसानाच्चेति । शुद्धातोऽध्यारोपाध्यवसानयोरयं भेदो यच्छुद्धायां लक्षकस्य लक्ष्यस्य च भेदरूपं ताटस्थ्यम्, यथा गङ्गायां घोष इत्यत्र । वाच्यार्थाल्लक्षकाददूरगस्य तटस्य बोधेऽभिप्रेतेऽध्यारोपः, यथा गङ्गातटमित्यत्र । आसन्नतरत्वबोधेऽभिप्रेतेऽध्यवसानम्, यथा—गङ्गायामेव घोषः ।

अविदूरतायामध्यारोपो यथा—गौर्वाहीक इत्यत्र । गोगतजाड्यमान्द्यादिगुणानां वाहीकेऽतिशयबोधाय गोत्वाध्यवसाने गौरयम् । इदमध्यवसानं रूढ्यापि भवति । तदुक्तम्—

तटस्थे लक्षणा शुद्धा स्यादारोपस्त्वदूरगे ।
निगीर्णेऽध्यवसानं तु रूढ्यासन्नतरत्वतः ।। इति (अ० वृ० मा०) ।

अपि च—

वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात् ।
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः ।। इति (अ० वृ० मा०)

इत्थं मुकुलभट्टो लक्षणां षड्विधामाह ।

धनिको दशरूपकावलोके चतुर्थप्रकाशे काव्यरसयोर्लक्ष्यलक्षकभावं निराकुर्वन्नाह—सामान्याभिधायिनस्तु लक्षकस्य पदस्याप्रयोगात्, नापि लक्षितलक्षणया तत्प्रतिपत्तिः, यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'गङ्गायां घोषः' इत्यादौ। तत्र हि स्वार्थे स्रोतोलक्षणे घोषस्यावस्थानासम्भवात् स्वार्थे स्खलद्गति-गंङ्गाशब्दस्स्वार्थाविनाभूतत्वोपलक्षितं तटमुपलक्षयतीत्यादि तत्सन्दर्भेण ज्ञायते यदयं सामान्याद् विशेषप्रतीतौ लक्षणां स्वीकरोति। अर्थादुपादानलक्षणां तटमुपलक्षयतीत्युक्तेर्लक्षणलक्षणां च स्वीकरोति। लक्षितलक्षणाऽञ्च शब्दतः कथयति। (वस्तुतो गङ्गायां घोष इत्यत्रैवेति लक्षण-लक्षणामेव लक्षितलक्षणापदेन कथयतीति चिन्त्यमस्य तात्पर्यम्) अग्रे च प्राह—अत एव 'सिंहो माणवकः' इत्यादिवद् गुणवृत्त्याऽपि नेयं प्रतीतिरित्यादिना गौणीवृत्तिमुपपादयति। अन्यत्र क्वचिदपि भेदविषये किञ्चिन्नोक्तवानिति।

वाग्देवतावतारो मम्मटभट्टश्च लाक्षणिकशब्दनिरूपणं लक्षणाधीनमिति हृदि निधाय लक्षणां सामान्यतो विशेषतश्च निरूप्य द्वितीयोल्लासे 'लक्षणा तेन षड्विधा' इति सूत्रयाञ्चक्रे (सू० १७)। अस्य सूत्रस्य व्याख्यानमाचार्या मतभेदेन व्याजह्रुः। तद्यथा वामन्यां वामनः—शुद्धा, गौणी, सारोपा, साध्यवसाना, उपादानलक्षणा, लक्षणलक्षणेत्यादीनामुपाधीनां (लक्षणा-प्रकाराणाम्) भेदात् प्रयोजनवती षड्विधेति प्राह। अर्थात् प्रथमं प्रयोजनवती लक्षणा स्वहेतु-भूतसम्बन्धस्य सादृश्यस्य सादृश्येतरस्य च भेदात् शुद्धा-गौणीभेदाभ्यां द्विविधा। पुनः शुद्धा उपादानलक्षणा-लक्षणलक्षणा-सारोपा-साध्यवसानाभेदात् चतुर्धा। गौणी च सारोपासाध्य-वसानाभ्यां द्विविधेति सङ्कलनया षड्विधेति। प्रदीपटीकातोऽवसीयते यच्चण्डीदासोऽप्येवमेवाह।

परं प्रदीपोद्योतप्रभाकारादयोऽत्रोक्तप्रभेदे उपादानलक्षणलक्षणयोः सारोपाध्यवसानत्वयोः सत्त्वेन सारोपाध्यवसानयोश्चोपादानलक्षणयोर्भेदयोः सत्त्वेन साङ्कर्यमाशङ्क्यान्यथा सूत्रं व्याचख्युः, तद्यथा—लक्षणा द्विविधा, शुद्धा गौणी च। शुद्धा पुनर्द्विविधा—उपादानलक्षणा-लक्षणलक्षणाभेदात्। उपादानलक्षणालक्षणलक्षणे अपि प्रत्येकं सारोपासाध्यवसानाभ्यां भेदाद् द्विविधे, अतः शुद्धा चतुर्विधा।

न च 'कुन्ताः प्रविशन्ति' इत्युपादानलक्षणायां कथं सारोपेति वाच्यम्, अस्य साध्यवसानो-दाहरणात्। उपादानसारोपायास्तूदाहरणम् 'कुन्ताः पुरुषाः प्रविशन्ति' इति ज्ञेयम्। गौणी सारोपा-साध्यवसानाभ्यां भेदाद् द्विविधेति सङ्कलनया षड्विधा प्रयोजनवती लक्षणा वर्णिता। रूढि-लक्षणाऽव्यङ्ग्या भवति, प्रयोजनवती सव्यङ्ग्येति। प्रयोजनवत्यां व्यङ्ग्यं क्वचिद् गूढं क्वचिदगूढमिति भेदात् त्रिविधा—अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्या चेति।

एवं षड्विधप्रयोजनवत्यां फलस्य (व्यङ्ग्यस्य) गूढागूढतया द्वादशभेदाः, एकविधा चाव्यङ्ग्या रूढिरिति त्रयोदशविधेति। पदवाक्यगतत्वञ्च यद्यपि पृथग् नोक्तम्, तथापि वाक्य-गतस्योदाहरणम् "उपकृतं बहु तत्र किमुच्यते सुजनता" इत्यादिपद्येऽनेकपदस्य लक्षकत्वाद् वाक्यगतत्वमपि सिद्धम्।

जयदेवश्च चन्द्रालोके नवममयूखे लक्षणां लक्षयित्वा भेदं निरूपयन्नाह—लक्षणा रूढितः प्रयोजनाच्च भवति, अतो रूढिलक्षणा प्रयोजनलक्षणेति द्विधा। पुनरुभे लक्ष्यवाचकशब्दस्य मीलनात् (अनुपादानात्) अमीलनाद् (उपादानाद्) च द्विविधे। तत्र रूढौ लक्ष्यवाचक-पदामीलना यथा—शुक्लो घटः। प्रयोजने लक्ष्यवाचकपदामीलना यथा—अग्निर्माणवकः। लक्ष्यवाचकपदमीलनारूढौ यथा—श्वेतो धावति। प्रयोजने कुन्ताः प्रविशन्ति। काव्यप्रकाशा-दावियं सारोपासाध्यवसानापदाभ्यां व्यवहृता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इयं चतुर्विधा अपि पुनस्त्रिविधा—सिद्धसाध्यसाध्याङ्गभेदात्। अर्थाद् लक्षणा क्वचिदुद्देश्यवाचकपदे, क्वचिद्विधेयवाचकपदे, क्वचिच्च विधेयान्वयिवाचकपदे भवति। सिद्धं चोद्देश्यं साध्यञ्च विधेयम्। उदाहरणं यथा—कश्चिद् मूर्खमुद्दिश्य कथयति—भोः पाषाण! उक्तं गृहाण। अत्रोद्देशे पाषाणपदे मूर्खत्वलक्षणा, न विधेयवाचिनि। यत्र विधेये लक्षणा सा साध्यलक्षणा, यथा—कामिनीवचोऽमृतम्। अत्र विधेयेनामृतपदेनानन्दजनकत्वं लक्ष्यते। यत्र विधेयस्यान्वयिनि लक्षणा तत्र साध्याङ्गलक्षणा, यथा–गङ्गायां घोषः। अत्र विधेयस्य घोषस्यान्वयिनि गङ्गापदे तीरत्वलक्षणा। इत्थं सङ्कलनया द्विविधाया रूढेर्द्विविधायाः प्रयोजनवत्याश्च त्रैविध्यात् प्रत्येकं षड्विधत्वाद् द्वादशविधत्वम्।

तत्र पुनः प्रयोजनवत्यां लक्षणायां प्रयोजनस्य क्वचित् स्फुटत्वं क्वचिच्चास्फुटत्वम्। स्फुटप्रयोजनस्योदाहरणम्-अग्निर्माणवकः। अत्र माणवकेऽग्निनिष्ठतेजोऽतिशयप्रतिपादनं प्रयोजनम्, तच्च स्फुटम्। अस्फुटप्रयोजनस्योदाहरणं पटैकदेशे दग्धे पटोऽयं दग्ध इति वाक्यं प्रयुज्यते। तत्रावशिष्टे पटे कर्मानर्हताप्रतीतिः प्रयोजनम्, तदस्फुटम्। तत्र स्फुटस्यास्फुटस्य च प्रयोजनस्य क्वचित् तटस्थत्वम्, क्वचिदर्थगतत्वम्। तत्र लक्ष्यलक्षकेतरवृत्तित्वं तटस्थत्वम्। तटस्थनिष्ठ-स्फुटास्फुटप्रयोजनयोरुदाहरणं यथा—दीपनिर्वाणेच्छया दीपं वर्धयेदित्युच्यते। तत्र दीपनिर्वाणं लक्ष्यम्, मङ्गलोदयश्च प्रयोजनम्।

एतच्च प्रकरणादिवक्त्रादिसहकारेण स्फुटम्, प्रकरणादिवक्त्रादिसहकाराभावेऽस्फुटम्। तदिदं प्रयोजनं वक्तृश्रोतृनिष्ठम्। स्फुटास्फुटप्रयोजनयोरर्थगतत्वमपि द्विविधम्-लक्ष्यार्थगतत्वाद् लक्षकार्थगतत्वाच्च। तत्र लक्ष्यनिष्ठप्रयोजनस्योदाहरणम्—इन्दुर्मुखम्। इन्दुर्मुखं न भवतीति बाधे सति इन्दुपदेनेन्दुतादात्म्यापन्नं मुखं लक्ष्यते। मुखोत्कर्षप्रतीतिश्च स्फुटं प्रयोजनं लक्ष्यपदार्थ-निष्ठम्। एवं कामिनीमुखं विलोक्य 'मुखमिन्दुः' इत्युक्तौ मुखमिन्दुर्नेति बाधे सति मुखपदेन मुखतादात्म्यापन्न इन्दुर्लक्ष्यते। मुखपदं लक्षकम्, तत्र कान्तिमत्त्वप्रतीतिः प्रयोजनं स्फुटम्।

लक्षकस्थास्फुटप्रयोजनाया उदाहरणम्—पटोऽयं दग्धः[1]। लक्ष्यस्थास्फुटप्रयोजनाया उदाहरणम्—अमृतं सूक्तम्। अत्रामृतपदेन सरसं सुभाषितं काव्यं लक्ष्यते। अतिहृद्यताप्रतीतिश्च प्रयोजनम्। अत्र प्रयोजनप्रतीतिर्लक्ष्ये काव्य एव। इत्थं पूर्वोक्तप्रयोजनवत्याः षड्विधायाः प्रयोजनभेदात् प्रत्येकं षड्विधमिति कृत्वा षट्त्रिंशद् भेदाः। षड्विधाया रूढेर्योगाद् द्विचत्वारिंशद्भेदा इति एका विचक्षणलक्षणाऽपि प्रतिपादिता, यथा—

लक्षकस्थं स्फुटं यत्र सा विचक्षणलक्षणा ॥ इति (च० लो० न० मयूखे)

अपरोऽपि भेदः काव्यप्रकाशानुसारी तत्र दर्शितः, यथा—गौणी सारोपा, गौणी साध्यवसाना। शुद्धासारोपोपादानलक्षणा। शुद्धासारोपार्पणलक्षणा। शुद्धासाध्यवसानोपादानलक्षणा। शुद्धासाध्यवसानार्पणलक्षणेति षोढा लक्षणा।

पुनश्च सिद्धसाध्यलक्षणयोः, लक्ष्यलक्षकयोः सविशेषणत्वाद् लक्षणा द्विविधा। यथा—'सरसं काव्यममृतम्' इत्यत्र लक्ष्यं काव्यं सविशेषणम्। 'विद्यास्थिरतां धनम्' इत्यत्र लक्षकं धनं

---

१. प्रतिपादनं पूर्वं कृतम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सविशेषणमिति । पुनश्च लक्षणा द्विविधा–सहेतुका निर्हेतुका च । यथाक्रममुदाहरणम्–सौन्दर्येणैव कन्दर्पः, सा च मूर्तिमती रतिरिति ।

उपाधिभेदेन च लक्षणाभेदा यथा—

शब्दे पदार्थे वाक्यार्थे संख्यायां कारके तथा ।
लिङ्गे च··········।। इति ।

क्रमश उदाहरणं यथा—अग्नेरग्निर्नष्टः । मुखं चन्द्रः । यद् गुरुवचनमाकर्णयन्ति ये तदमृतं पिबन्ति । यावन्तो युद्धप्रियास्तावन्तोऽर्जुनाः । स्थाली पचति । हस्तिनी । इत्यादि ।

आशाधरभट्टश्च त्रिवेणिकायां लक्षणाप्रकरणे लक्षणाभेदं निरूपयन्नाह यत्—लक्षणा त्रिविधा, जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा च । शब्दः शक्यार्थं जहाति चेत्, जहल्लक्षणा; न जहाति चेदजहल्लक्षणा । उभययुक्ता जहदजहल्लक्षणा । त्रिविधाऽपि पुनर्द्विविधा—निरूढा फलवती च । शक्तिमत्कोशादिप्रसिद्धा रूढा । रूढलक्षणायाः शक्तितो वैशिष्ट्यं यदियं लक्षणा मुख्यार्थबाधे सति प्रवर्तते । अनादिलक्षणापदेनेयमुच्यते । व्यङ्ग्यार्थावबोधाय कृता लक्षणा फलवतीत्युच्यते । व्यङ्ग्यार्थप्रतीतिरस्याः फलम् । फलञ्च क्वचिद् गूढं क्वचिदगूढश्चेति द्विविधम् । गूढं सहृदयैकवेद्यम्, अगूढं सर्वजनसंवेद्यम् ।

पुनरपि लक्षणा द्विविधा—व्यधिकरणविषया, समानाधिकरणविषया चेति । यत्र विरुद्धविभक्तिमत्पदं लक्षणायां तात्पर्यग्राहकं सा व्यधिकरणविषया । यत्र समानविभक्तिमत्पदं लक्षणायां तात्पर्यग्राहकं सा समानाधिकरणविषया ।

पुनर्गौणीशुद्धाभ्यां भेदाल्लक्षणा द्विविधा । सादृश्यसम्बन्धाद् लक्षणा गौणी, तद्भिन्नसम्बन्धाद् लक्षणा शुद्धा । क्रमश उदाहरणानि—

१. व्यधिकरणविषयाफलवतीजहल्लक्षणा यथा—गङ्गायां घोषः ।

२. व्यधिकरणविषया फलवत्यजहल्लक्षणा यथा—छत्रिणो यान्ति ।

३. फलवती जहदजहल्लक्षणा यथा—पशूननक्ति । अत्र सर्वत्र गूढफला ।

४. अगूढफलाऽजहल्लक्षणाया यथा—वसन्तस्तरून् नर्तयति । अत्र वसन्तशब्दस्य वसन्तवर्तिनि मारुते लक्षणा । फलं तु मन्दगत्या तरुचारुतापादकत्वप्रतीतिः । सा चागूढफला । समानाधिकरणविषया सारोपा साध्यवसाना चेति ।

५. कार्यकारणभावादौ शुद्धाजहल्लक्षणासारोपायाः–आयुर्घृतम् ।

६. साध्यवसानायाः–आयुरेवेदम् ।

७. गौणी-अजहल्लक्षणासारोपायाः–गौर्वाहीकः ।

८. साध्यवसानायाः–गौरयम् ।

९. अवयवावयविभावे जहदजहल्लक्षणायाः–अग्रहस्तः । महत्त्वप्रतीतिः फलम् ।

१०. निरूढायाः–रवौ नीलं बुधे पीतम् । अत्र रविबुधशब्दाभ्यां तद्वारयोर्निरूढा जहदजहल्लक्षणा ।

११. निरूढाऽजहल्लक्षणायाः–श्वेतो धावति । अत्र गुणवाचिना श्वेतशब्देन तदाश्रये हयादौ निरूढाऽजहल्लक्षणा ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१२. निरूढाजहदजहल्लक्षणायाः—गृहं सम्मार्ष्टि। अत्र गृहशब्देन तदेकदेशे निरूढा-लक्षणेति। परमत्र निरूढाजहल्लक्षणाया उदाहरणं नोपन्यस्तमिति।

अप्पयदीक्षितश्च वृत्तिवार्तिके—लक्षणा द्विविधा शुद्धा गौणी च। निरूढा फललक्षणाभ्यां प्रत्येकं द्विविधा। फललक्षणा शुद्धा पञ्चविधा, जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा, सारोपा, साध्यवसानेति भेदात्। गौणीफलवती द्विविधा, सारोपा साध्यवसाना चेतीत्थं नव-प्रकारां लक्षणां प्राह।

पण्डितराजो जगन्नाथश्च रसगङ्गाधरे द्वितीयानने लक्षणाभेदान् निरूपयन्नाह—लक्षणा द्विविधा, निरूढा प्रयोजनवती च। प्रयोजनवत्यपि द्विविधा—गौणी शुद्धा च। तत्र गौणी सारोपा-साध्यवसानाभ्यां द्विविधा। शुद्धा चतुर्विधा—जहत्स्वार्था, अजहत्स्वार्था, सारोपा साध्यवसानेति भेदात् एवं प्रयोजनवती षड्विधा। निरूढापि पुनः गौणीशुद्धाभ्यां भेदाद् द्विविधेति। पण्डितराजे-नापि काव्योपयोगिनो भेदा एव प्रदर्शिताः। तदुक्तं रसगङ्गाधरे द्वितीयानने—प्रयोजनवत्याः षड्विधायाः सारोपसाध्यवसानाभ्यां गौणीशुद्धाभ्यां च विभक्तानां भेदानां चतुर्णामलङ्कारात्मना परिणतत्वाद् द्वौ भेदौ ध्वन्याश्रयतया स्थितौ, जहत्स्वार्थाऽजहत्स्वार्था चेति तन्मूलौ द्वौ ध्वनेः प्रभेदाविति। उदाहरणानि शुद्धनिरूढायाः—अनुलोमप्रतिलोमानुकूलप्रतिकूलादयः। गौणनिरू-ढायाः—नीलादयः। गौणसारोपायाः—मुखं चन्द्रः। गौणसाध्यवसानायाः—

"पुरेऽस्मिन् सौधशिखरे चन्द्रराजी विराजते।"

चतुर्विधायाः शुद्धाया उदाहरणानि मूले नोपन्यस्तानि स्वयमेवोह्यानि। इति।

विद्यानाथश्च कमपि नवीनं भेदं नोद्घाटयामास। विद्याधरकृतैकावलीविवेचनयेत्थं भेदो निरूपयितुं शक्यते यद् लक्षणा द्विविधा—शुद्धा गौणी च। शुद्धा पञ्चविधा-जहल्लक्षणा, अजहल्लक्षणा, विपरीतलक्षणा, सारोपा, साध्यवसाना चेति। गौणी द्विविधा, सारोपा साध्यव-सानेति भेदात्। एवं सङ्कलिताः सप्तभेदा लक्षणायाः सन्ति। अनन्तरं सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया प्रत्येकमष्टाविंशतिर्भेदाः शुद्धसप्तभेदसङ्कलनेन च पञ्चत्रिंशद्विधा लक्षणा। पुनरन्योन्य-साङ्कर्येण ध्वनिभेदवदनेके भेदा भवितुमर्हन्ति। तदुक्तम्—

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया।
अस्याः सङ्कलऽयऽन्यमष्टाविंशतिरीरिता॥
पञ्चत्रिंशत्समाख्याताः शुद्धभेदैस्समं पुनः।
स्वैः प्रभेदैरलङ्कारैर्ध्वनिभेदैश्च सङ्गता॥ इति (एकावल्याम्)

परमिमे भेदा ध्वनिभेदसङ्कलननिबन्धनमिति प्रकृते नोपादेयमिति। साहित्यसारेऽच्यु-तरायोऽपि लक्षणामष्टविधामाह। तद्यथा—लक्षणा द्विविधा—निरूढा प्रयोजनवती च। पुनः प्रत्येकं चतुर्विधा। गौण-शुद्ध-विरुद्ध-लक्षितलक्षणाभिर्भेदात्। प्राय एतत्कृतलक्षणाप्रभेदाः सम्बन्धभेदमूलका एवेति। उदाहरणानि च गौरवभिया नोदाह्रियन्ते प्रायस्तान्येवेति।

निष्कर्षः—एवं प्रायः सर्वेषां दार्शनिकानामालङ्कारिकाणां च मतपरिशीलनेनावगम्यते यत् सर्वैर्दार्शनिकैरालङ्कारिकैश्च यथोपयोगं लक्षणाभेदाः प्रदर्शिताः। तद्यथा मम्मटाचार्येण

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"लक्षणा तेन षड्विधा" (का०प्र०,द्वि०उ०, १७सू०) इति सूत्रेण लक्षणा षड्विधोपपादिता। तासां काव्योपयोगदृष्ट्यैव प्रकाशे प्रकाशनम्, तद्यथा—उपादानलक्षणाया अर्थान्तरसङ्क्रमितवाच्यध्वनौ, लक्षणलक्षणायाश्चात्यन्ततिरस्कृतवाच्यध्वनावुपयोगः। गौणसारोपा तु रूपकालङ्कारस्य, गौणसाध्यवसाना च प्रथमातिशयोक्तेर्बीजम्। शुद्धसारोपा तु चतुर्थातिशयोक्तेः प्रयोजिका। शुद्धसाध्यवसाना तु सहकारिणमनपेक्ष्य कार्यकारित्वरूपसामर्थ्यातिशयव्यङ्ग्योपदर्शिकेति।

अत्र सारबोधिनीकाराः श्रीवत्सलाञ्छनादयः शुद्धसारोपाध्यवसाने तु हेत्वलङ्कारप्रयोजिके भवत इति यद् व्याजह्रुस्तदुपेक्ष्यम्। हेत्वलङ्कारस्य ग्रन्थकारेणाप्रतिपादनात्, प्रत्युतनिराकरणात् कारणमालाऽलङ्कारे।

तथा हि काव्यप्रकाशे दशमोल्लासे—

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः॥

अत्रोत्तरोत्तरमर्थं प्रति पूर्वपूर्वस्यार्थस्य हेतुत्वात् कारणमालाऽलङ्कार इत्युदाहृत्य मम्मटाचार्यः प्राह यत्—हेतुमता सह हेतोरभिधानमभेदतो हेतुरिति भट्टोद्भटेन लक्षितो हेत्वलङ्कारो मया न लक्षितः। आयुर्घृतमित्यादिरूपो हेत्वलङ्कारो वैचित्र्याभावात् कदाचिदपि भूषणतां नार्हतीति।

अत्रेदं नाशङ्कनीयं यद् हेत्वलङ्काराभावे प्राचीनैर्भामहादिभिरुपपादितम्—

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः॥

इत्यस्य काव्यत्वं कथं स्यात्? यतो ह्यत्र वसन्तकालो हेतुः, कमलविकासादयो हेतुमन्तः, तथा चात्र कमलविकासादिभिः कार्यैः सह कारणस्य वसन्तकालस्याभेदेनाध्यवसानात् शुद्धसारोपलक्षणा। आयुर्घृतमितिवत्। एवञ्चात्र हेत्वलङ्कारः। भवन्मते तदभावात् कथं काव्यत्वमस्य स्यादिति। कोमलानुप्रासमहिम्नैवात्र काव्यत्वस्वीकारात्। पूर्वोक्तकाव्यलिङ्गमेवात्र हेतुरिति।

वस्तुतो हेत्वलङ्कारः प्राचीनानां मतेऽस्त्येव तं प्रति प्रयोजकत्वापादनं शुद्धसारोपसाध्यवसानयोर्युक्तमेव। ग्रन्थकारमते तत्र काव्यलिङ्गं चेत् तस्यैवानयोर्हेतुत्वे दोषाभावादिति।

अन्यैरपि प्रायो रूढिप्रयोजनसम्बन्धमुख्यार्थोपादानतिरस्कारवाचकलक्ष्योभयसामानाधिकरण्यवैयधिकरण्यविषयनिगरणवक्तृबोद्धव्यादिवैशिष्ट्यगूढागूढचार्पचारुप्रयोजनसिद्धसाध्यसाध्याङ्गगतपदवाक्याद्याधारगतसहेतुनिर्हेतुलाक्षणिकप्रयोगधर्मिधर्मलक्ष्यलक्षकतटस्थगतप्रयोजनत्वेन च भेदा वर्णिताः। अतः सर्वे काव्यापयोगिनो भेदा एव वर्णिता (उपयोगदृष्ट्या भेदा इति)। तद्यथा—लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्निति पद्ये लावण्यपदं रूढिलाक्षणिकम्। एवम्—नलिनप्रतिपक्षमाननमित्यत्र प्रतिपक्षशब्दः। "रामोऽस्मि सर्वं सहे" इत्यत्रोपादानलक्षणा प्रयोजनवती प्रयोजनं च धर्मिगतम्। निश्वासान्ध इवादर्श इत्यत्र लक्षणलक्षणा प्रयोजनवती (अन्धशब्दो दृष्ट्युपघातरूपं मुख्यार्थं तिरस्कृत्याप्रकाशरूपमर्थं लक्षयति, अप्रकाशातिशयश्च प्रयोजनन्तदपि धर्मि- (आदर्श) गतम्। "वक्त्रे चन्द्रमसि स्थिते किमपरः शीतांशुरुज्जृम्भते" इति पद्ये 'वक्त्रे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चन्द्रमसि' इत्यत्र सादृश्यसम्बन्धेन गौणी लक्षणा, प्रयोजनवती, समानविभक्तिकत्वात् समानाधिकरणविषया विषयविषयिणोरुभयोरुपादानाच्च सारोपा लक्षणा, चन्द्रसदृशाभिन्नं मुखमिति चन्द्राभिन्नं मुखमिति वा बोधः, मुखे चन्द्रतादात्म्यप्रतीतिः प्रयोजनम् ।

"पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः" इत्यादौ विषयिवाचकेन नीलोत्पलद्वन्द्वपदेन नेत्रद्वन्द्वं निगीर्णं तदेव लक्ष्यमतोऽध्यवसानं सर्वथैवाभेदावगमश्च प्रयोजनम् । "वटे गावः सुशेरते" अत्र व्यधिकरणविषया लक्षणा ।

"उपकृतं बहु तत्र किमुच्यते" इत्यत्र वक्तृवोद्धव्यवैशिष्ट्यादेव लक्षणाप्रतीतिः । अपकारिणं प्रतीयमुक्तिरिति ये न जानन्ति तेषां नात्रापकारादिलक्ष्यार्थप्रतीतिः । इदं पद्यं वाक्यगतलक्षणाया उदाहरणम् । मुखं विकसितस्मितमित्यत्र गूढप्रयोजनम् । उपदिशति कामिनीनामित्यादावगूढप्रयोजनम् । वदति विसिनीपत्रशयनमिति पद्ये वदतीत्यत्राचारुप्रयोजनम्, तद्वाचकशब्देनापि तथा प्रतिपादयितुं शक्यत्वात् । सिद्धसाध्यसाध्याङ्गसहेतुनिर्हेतुलक्ष्यलक्षकतटस्थादिगतभेदस्योदाहरणं चन्द्रालोककर्तुर्मतप्रतिपादनावसरे प्रदत्तं तत एवावसेयम् ।

एवम् प्रायः सर्वैरालङ्कारिकैः कृता भेदा उपयोगितां लक्ष्यीकृत्यैव परं साहित्यदर्पणकृता भेदाः शुद्धपदार्थविश्लेषणात्मकरीत्या न तूपयोगितादृष्ट्या । परं तस्याप्युपजीव्यभूतः प्रकाश एव दर्पणे प्रतिबिम्बितः । निरूढाविषयेऽपि जयदेवाशाधरभट्टाभ्यामनेकशो भेदाः कृता एव ।

मम्मटभट्टस्याप्युपजीव्यो मुकुलभट्टोऽस्ति । यद्यपि मुकुलभट्टं मम्मटः खण्डयति । "अनयोर्हि लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यमित्यादिना" तथापि मुकुलभट्टात् प्राग् जहत्स्वार्थाऽजहत्स्वार्थेत्यादयः शब्दा एव प्रसिद्धा आसन् । उपादानलक्षणा लक्षणलक्षणा सारोपा साध्यवसानादिसंज्ञा मुकुलभट्टेनैव कृता । यद्यपि लोचनेऽपि लक्षणलक्षणेति नामनिर्देश उपलभ्यते (अस्मिन् लेखे लोचनमतप्रतिपादनावसरे प्रसङ्गो दर्शितः) तथाऽपीतरसंज्ञाकरणं मुकुलभट्टोपज्ञं प्रतिभाति । तत एव काव्यप्रकाशे प्रकाशितेति ततः साहित्यदर्पणकृता गृहीतेति साम्प्रतं तद्विवेचनं प्रस्तूयते । चण्डीदासवामनादिभिर्ये लक्षणायाः षड्भेदा दर्शिता यत्र भेदानां साङ्कर्यसम्भावना प्रदीपकारादिभिः कृता तेषामेव भेदानां मिथः साङ्कर्यं विधाय दर्पणकृता बहवो भेदाः प्रपञ्चिताः । उदाहरणेऽपि साङ्कर्यं वर्तते दिङ्मात्रं यथा—प्रयोजनवत्या लक्षणाया उदाहरणम्—गङ्गायां घोषः । इदमेवोदाहरणं लक्षणलक्षणायाः पुनः शुद्धायाः, पुनः शुद्धसाध्यवसानाया इत्यादि । अस्तु—

विवेचनदृष्ट्या विविच्यते—प्रयोजने गौण्यां सारोपायामुपादानलक्षणामुदाहरति विश्वनाथः—राजकुमारेषु तत्सदृशेषु च गच्छत्सु "एते राजकुमारा गच्छन्ति" । प्रयोजने गौण्यां साध्यवसानायामुपादानलक्षणाञ्चोदाहरति—'राजकुमारा गच्छन्ति' इति । अत्राऽयमभिसन्धिः—राजकुमारपदेन राजकुमारास्तत्सदृशाश्च सादृश्यसम्बन्धेन लक्ष्यन्ते । अतो राजकुमाराणामप्युपादानादेषोपादानलक्षणाऽथ च सादृश्यसम्बन्धहेतुकतया गौणीति । पूर्वत्र एतच्छब्देन विषयस्यानिगीर्णत्वात् सारोपा । उत्तरत्र विषयनिगीर्णत्वात् (एतदोऽनुपादानात्) साध्यवसानेति । सदृशानामपि राजकुमारवदादरणीयत्वं प्रयोजनम् । तत्र पृच्छ्यते यत्—भवतः कीदृशं सादृश्यमभिप्रेतम्, नैयायिकाभिमतम्, मीमांसकाभिमतं वा ?

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र नैयायिकाभिमतं सादृश्यं तु "तद् भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्" इति भेदघटितसादृश्यस्य राजकुमारभिन्नेष्वेव सत्त्वाद् राजकुमारेषु तदभावाद् राजकुमाराणां सादृश्यसम्बन्धेन ग्रहणं कर्तुं न शक्यते ।

न चात्र रूपकस्थल इव मीमांसकाभिमतं भेदाकरम्बितं धर्मान्तरमेवाखण्डं सादृश्यमभिप्रेतमिति। अत एव "नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः" इति परिभाषायां भेदघटितसादृश्यग्रहणायान्यसदृशेत्युक्तं यदि सादृश्यं भेदघटितमेव स्यात्तदान्यग्रहणमनर्थकं स्यादत एव "अन्यसदृशेत्युक्त्या सादृश्यस्य भेदाघटितत्वं सूचयतीति" परिभाषेन्दुशेखरे नागेशेनोक्तमिति चेत्तदपि न। मुखं चन्द्र इति रूपके चन्द्रशब्दस्य प्राचीनमते चन्द्रसदृशे लक्षणायां चन्द्र एव चन्द्रसदृशपदेन न गृह्यते अपि तु मुखं गृह्यते, अत एव चन्द्रसदृशाभिन्नं मुखमिति बोधः। भेदाकरम्बितसादृश्येन चन्द्रतादात्म्यप्रतीतिर्मुखे, न तु चन्द्र एव चन्द्रसादृश्यप्रतीतिरिति ।

न च "भूवादयो धातवः" इति सूत्रे भूश्च वाश्चेति भूवौ, आदिश्च आदिश्चेत्यादौ, अत्र एक आदिशब्दो व्यवस्थावाची, द्वितीयः प्रकारवाची, तत्र भूशब्दस्य व्यवस्थावाचिनाऽऽदिशब्देन वाशब्दस्य च प्रकारवाचिनाऽऽदिशब्देनान्वयोऽतो भूप्रभृतयो वासदृशा धातवः स्युरित्यर्थः, अत्र वासदृशेन वाधातुरपि गृह्यतेऽत एव वा-गतिगन्धनयोरित्यस्यापि धातुसंज्ञा भवति तथैव राजकुमाराणामपि राजकुमारसदृशेन ग्रहणे क्षत्यभाव इति वाच्यम्, वा धातौ प्रयोगभेदेन वा सादृश्यात् ।

अत एव शब्दरत्ने सादृश्यञ्चेति प्रतीकमुपादाय "वा धातौ वा सादृश्यं च प्रयोगभेदेन बोध्यम्" प्रत्युच्चारणं शब्दो भिद्यत इति नियमात् (प्रौ० म० सं० प्र० भूवादयो धातव इति सूत्रे)। एवमेवादिरन्त्येन सहेतेति सूत्रेऽन्त्येत्सदृशेन सहित आदिसदृश इत्यर्थकरणेऽजादिप्रत्याहारे प्रयोगभेदेनैव सादृश्यमित्यलमतिप्रसक्तेन । न च "रामरावणयोर्युद्धं रामरावणयोरिव" इत्यनन्वये रामरावणयोः सादृश्यं रामरावणयोरेव तद्वदत्रापि स्वीकारे को दोष इति वाच्यम् ? तत्र द्वितीयसब्रह्मचारि(सादृश्य)निषेधे तात्पर्यात्, न तु सादृश्यपर्यवसाने । स्वसादृश्यस्य स्वस्मिन्नपर्यवसानादेव सादृश्यस्यानन्वयात् (सादृश्यं नान्वेतीति) अनन्वयं इति नाम सार्थकम् ।

ननु यथा वाधातौ प्रयोगभेदेन सादृश्यं तथा अत्राप्यर्थभेदेन सादृश्यमित्यपि न शङ्क्यम् । एकराजपुत्रस्यापरराजपुत्रे सादृश्यसत्त्वेऽपि भवदुक्तोदाहरणे राजकुमारेषु तत्सदृशेष्वित्यत्र राजकुमारसादृश्यस्य राजकुमारेष्वभावात् । अपि च सादृश्यं सम्बन्धः स च द्विष्ठोऽतो न राजकुमारस्यैव राजकुमारसदृशेन ग्रहणमित्यलं प्रसक्त्यानुप्रसक्त्येति । अतः शुद्धाया एव उपादानलक्षणलक्षणाभेदौ न गौण्या अत एव प्रकाशे शुद्धैवेत्येवकार उक्तः । एवं रूढावुपादानलक्षणसारोपां गौणीमुदाहरति भवान् "एतानि तैलानि हेमन्ते सुखानि" । रूढावुपादानलक्षणसाध्यवसानां गौणीं च "तैलानि हेमन्ते सुखानि" इति ।

अत्राऽयमभिप्रायो यत् तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सादृश्यसम्बन्धेन (घृतादिविलक्षणद्रवत्वरूपैकधर्मसम्बन्धेन) सर्षपस्नेहान् प्रतिपादयति । (सर्षपादिस्नेहानां तिलभवत्वाभावात् मुख्यार्थबाधः) तिलस्नेहस्यापि सुखजननेऽन्वयादात्मनोऽप्युपादानादेतच्छब्देन

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयनिर्देशात्प्रयोगप्रवाहाच्चैषा रूढावुपादानलक्षणा सारोपागौणीति । अपरत्र विषयवाचकैतदोऽनुपादानाद् विषयनिगरणात् साध्यवसानेति ।

तत्र जिज्ञास्यते यत् "अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तमिति नियमो भवतः क्व गतः । तैलशब्दः स्नेहे रूढः, तिलभवस्नेहस्तु व्युत्पत्ति निमित्तस्तस्माद्धेत्यात्र भवता रूढिलक्षणा प्रतिपाद्यते, कर्मणि कुशल इति रूढिलक्षणाया उदाहरणं मम्मटाचार्यस्य निराक्रियत इति को व्यामोहः । "स्नेहे तैलच्" इति वार्त्तिकेन स्नेहार्थे तैलचो विधानात् । उदाहृतं च कौमुद्यां "तिलतैलम्—सर्षपतैलम्" इति ।

अथ यदि यौगिकार्थमपि प्रवृत्तिनिमित्तीकृत्येदमुदाहरणं भवता प्रस्तूयते तर्हि 'कर्मणि कुशलः' इत्यस्य खण्डनं कथं क्रियते । अथ प्रसङ्गतो रूढिलक्षणायाः कर्मणि कुशल इत्युदाहरणमपि विचार्यते । अत्र विश्वनाथस्समालोचन्नाह यत्—कुशाँल्लातीति व्युत्पत्तिलभ्यः कुशग्राहिरूपोर्थो लौकिके कर्मण्यन्वययोग्यतामलभमानो विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिनं दक्षरूपमर्थं लक्षयतीति मम्मटाभिप्रायस्तदन्ये न क्षमन्ते । यतो हि कुशग्राहिरूपस्यार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात् ।

अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तमिति नियमात् । व्युत्पत्तिलभ्यार्थस्य मुख्यार्थत्वे गच्छतीति विग्रहे गमधातोः गमेर्डोरित्यौणादिकेन वार्त्तिकेन डोःप्रत्यये कृते डित्त्वादिलोपे प्रातिपदिकादिकार्ये निष्पन्नस्य गौरिति पदस्य गमनकर्तृरूपार्थकस्य शयनकाले बाधात् "गौः शेते" इत्यत्रापि लक्षणा स्यात् ।

अयं भावो यत्—प्रकृतिप्रत्ययविभागकल्पनाव्युत्पत्तिस्तल्लभ्योऽर्थो व्युत्पत्तिलभ्यः । व्युत्पत्तिलभ्यार्थप्रतीतौ प्रकारीभूतो धर्मो व्युत्पत्तिनिमित्तम् । यथा गोशब्दस्य गमनकर्तृत्वम् । सङ्केतग्रहे प्रकारीभूतो धर्मः प्रवृत्तिनिमित्तम् । यथा गोत्वजातिः । शब्दानां व्युत्पत्तिनिमित्तमेव प्रवृत्तिनिमित्तमिति नियमाभावात् । यतो हि पाचक इत्यादौ द्वयोरैक्येऽपि गवादिशब्दे व्यभिचारात् । कुशल इत्यस्य कुशग्राहिरूपस्य व्युत्पत्तिनिमित्तस्यार्थस्यानेकपदार्थघटितत्वेन गुरुत्वात्तदुपेक्ष्य दक्षत्वरूपाखण्डोपाधिनैव कुशलशब्दस्य सङ्केतग्रहः । (इति चेदत्रापि तैलशब्देऽपि तिलभवस्नेहस्य व्युत्पत्तिनिमित्तस्यार्थस्यानेकपदार्थघटितत्वेन स्नेहत्वरूपाखण्डोपाधिनैव तैलशब्दस्यापि सङ्केतग्रह इति वक्तुं शक्यत्वात्) । न चात्र रूढिवद् व्युत्पत्तिरपि पदार्थोपस्थापिकेति रूढिविषयस्येव व्युत्पत्तिविषयस्यापि मुख्यत्वं शङ्क्यम् । रूढिप्रतिरुद्धाया व्युत्पत्तेः पदार्थोपस्थापकत्वाभावात् । उक्तञ्चात्र भट्टपादैर्वार्त्तिके—

लब्धात्मिका सती रूढिर्भवेद्योगापहारिणी ।
कल्पनीया तु लभते नात्मानं योगबाधतः ॥ इति ।

अर्थात् अनादिप्रयोगप्रवाहप्रसिद्धा रूढिर्योगापहारिणी भवति । योगेन बाधात्पदार्थोपस्थितिं न जनयतो रूढिरेवेदानीन्तनैरुद्भावनीयेति । व्युत्पत्तिलभ्यस्य मुख्यार्थत्वस्वीकारे शयनकाले गमनकर्तृत्वरूपमुख्यार्थबाधाद् गौः शेते इत्यत्र लक्षणापत्तेः । वस्तुतो गौः शेत इत्यत्र न दोषः । उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति महाभाष्योक्तेः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(तथा हि—आयनेयीनीत्यादिसूत्रे भाष्ये शङ्ख इत्यत्र खस्येनादेशनिषेधाय "उणादीनां प्रतिषेधो वक्तव्य इत्याशङ्क्य प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धम्" उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति समाहितम्) तथापि निषङ्गे सायकाः सन्तीत्यत्र सायकशब्दस्य षोऽन्तकर्मणीत्यस्माद्धातोर्ण्वुलि सत्वे आत्वे युकि निष्पन्नस्य सायकशब्दस्य निषङ्गसंस्थितिकाले विनाशकर्तृत्वरूपार्थस्य बाधात् लक्षणापत्तेर्दोषतादवस्थ्यात् तत्रोच्यते बाधके सत्येव रूढिशक्त्याऽवयवशक्तिर्नियन्त्रिता भवति । बाधाभावे नियन्त्रणायोगेन कुशलपदस्य कुशलग्राहिरूपेऽर्थे शक्तिरव्याहतैव ।

अपि प्रयोगप्रवाहेणैव प्रवृत्तिनिमित्तस्वीकारे यौगिकव्यवहारस्य मूलोच्छेदापत्तेः । अत एव अश्वगन्धादिपदमोषधिविशेषे रूढमश्वसम्बन्धवत्तया वाजिशालाबोधे यौगिकम् । अत एव "रूढिर्योगापहारिणीति प्रकरणाद्यभावे बोध्यम्" इति मञ्जूषायां नागेशः सङ्गच्छते । उक्तञ्च—

बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्यविशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु ॥
नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदुह्यम् ॥ इति ।

कर्मणि कुशल इत्यत्र सबाधार्थप्रतीतौ निरूढा लक्षणैव । यद्यत्र भवता न स्वीक्रियते तर्हि "एतानि तैलानि हेमन्ते सुखानि" इत्यत्र कथमित्यलं मान्येषूपजीव्येषु मात्सर्यप्रदर्शनेति ।

अपि च प्रयोजनस्य धर्मिधर्मगतत्वेन प्रयोजनवल्लक्षणा द्विधेति भवतोपपादिता । तत्र धर्मिगतस्योदाहरणम् "रामोऽस्मि सर्वं सहे" इति । अत्र रामस्य वक्तृत्वादस्मीति क्रियापदेन च लाभाद् रामशब्दो बाधितमुख्यार्थः सन् दुःखसहिष्णुरूपं रामं लक्षयति । राजत्याग-वनवासजटा-वल्कलधारण-स्त्रीवियोगाद्यतिशयदुःखसहिष्णूः राम इति प्रतीतिर्लक्षणायाः फलम् ।

अत्रैका विचिकित्सा जागर्ति यत्—अत्यन्तदुःखसहिष्णुरित्यत्रात्यन्तत्वं सहनक्रिया-विशेषणं रामविशेषणं वा । यदि क्रियाविशेषणं तदाऽतिशयो धर्मगतः । क्रियाया धर्मरूपत्वात् । यदि पुरुषविशेषणं तदाऽपि महापण्डित इत्यादौ यथा पण्डितविशेषणस्यापि महत्त्वादेः पाण्डित्य-गतत्वं तथैवाऽत्रापि दुःखासहनाभाव एव पर्यवसानात् कथं धर्मिगतत्वम् । यदि चात्यन्तदुःख-सहिष्णुत्वं नाम बहुतरदुःखसत्त्वेऽप्यनुद्विग्नचित्तत्वम् । अतो रामस्यैवातिशयोऽर्थादुत्कर्षो धीरत्वादिरूप इत्यतिशयस्य धर्मिगतत्वम् ।

परञ्च दुःखसहिष्णुत्वं दुःखद्वेषाभावस्तस्य सामान्याभावत्वमेवातिशयः सोप्यभावरूप एव । तस्य च धर्मगतत्वे नास्ति संशीतिः ।

यद्यपि दुःखद्वेषसामान्याभाववान् राम इति प्रतीतौ प्रयोजनस्य धर्मिगतत्वमपि सिद्धम्, परं साक्षाद् धर्मगतत्वेन धर्मगतस्यैवोदाहरणं युक्तम् ।

अत्र श्रीरामचरणतर्कवागीशो रामोऽस्मीत्युदाहरणं निराकृत्योपदिशति कामिनीनामित्या-द्युदाजह्रे । अर्थाद् यौवन मद एव कामिनीनां ललितान्युपदिशति । अत्रोपदेशपदार्थश्च ज्ञानानु-कूलशब्दप्रयोगस्तत्कर्तृताया अचेतने यौवनमदे बाधात् सामान्यविशेषभावसम्बन्धेनाविष्करोतीति लक्ष्यते । आविष्कारातिशयश्च प्रयोजनम् । इदमपि वस्तुत आविष्करणनिष्ठं परम्परया धर्मि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निष्ठम् । यथा दर्पणकृतैव धर्मगतस्योदाहरणं गङ्गायां घोष-इत्युपन्यस्तम्, तटे शीतत्वपावनत्वरूप-धर्मस्यातिशयःफलमिति । अर्थात् शैत्यपावनत्वातिशयविशिष्टे तटे घोष इति प्रकीर्तितिर्लक्षणायाः फलम् । यद्यत्र धर्मगतत्वं तथाऽन्यत्रापि । वस्तुतोऽत्रापि धर्मिगतत्वं तदुक्तं लोचनकारैर्ध्वन्यालोक-लोचने भ्रमधार्मिकेतिव्याख्यानाऽवसरे (षष्ठितमपृष्ठे)—यत्त्विदं घोषस्यातिपवित्रत्वशीतलत्व-सेव्यत्वादिकं प्रयोजनमशब्दान्तरवाच्यं प्रमाणान्तराप्रतिपन्नमित्यादिना । तथापि सूक्ष्मेक्षिकया यथाकथञ्चिद् धर्मिधर्मगतत्वमुपपादयितुं शक्यत इति विविधप्रतिभाप्रतिभातमतीनां सुमेधसां सर्वं शोभनमिति ।

निरूढालक्षणायाश्च ये भेदाः सोदाहरणा दर्शिताः, यथा रूढावुपादानलक्षणायाः 'श्वेतो धावति' । रूढावुपादानलक्षणसारोपायाः 'अश्वः श्वेतो धावति' । एवमेव रूढिलक्षणलक्षणायाः 'कलिङ्गः साहसिकः' । रूढौ लक्षणलक्षणसारोपायाः 'कलिङ्गः पुरुषो युध्यते' इति । तस्याऽयं भावो यत् 'नीलो घटः, नीलं रूपम्' इत्युभयविधव्यवहारदर्शनाद् नीलादिपदानां गुणिनि गुणे वा शक्तिरिति विप्रतिपत्तौ गुण एव शक्तिरङ्गीकार्या । आश्रयभेदेन भिन्नानां नीलादिगुणानां शक्यतावच्छेदकत्व-स्वीकारापेक्षया गुणगतनीलत्वादिजातेः शक्यतावच्छेदकत्वस्वीकारे लाघवात् पूर्वोदाहरणयो-रेकत्राचेतनेन श्वेतगुणेन धावनक्रियायां कर्तृतयाऽन्वयमलभमानेनात्मसम्बन्धिनोऽश्वा आक्षिप्यन्त इत्युपादानलक्षणा । उत्तरत्र श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतगुणतादात्म्येन प्रतीयत इति दर्पणकृतोऽभिप्रायः ।

परं शक्तिग्राहकव्याकरणकोशादिभिः श्वेतादीनां गुणवत्यपि शक्तिबोधनादत्र रूढि-शक्तिरेव । तथा हि "गुणवचनेभ्यो मतुपो लुगिष्टः" (भा० इ० १।४।१९) इति वार्त्तिकेन मतुपो लोपविधानाद् "यः शिष्यते स लुप्यमानार्थाऽभिधायी" इति नियमात् श्वेतादयः शब्दा गुणिवाचकाः सन्ति । कोशे च "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इति गुणवत्यपि प्रयोगादत्र शक्तिरेव । गुणवचनेभ्य इति वार्त्तिके गुणे तद्वति च प्रसिद्धा ये शुक्लादयस्त एवात्र गृह्यन्ते, अत एव 'रूपो घटः' इत्युदाहरणं भवता न दत्तम्, तथाप्रयोगानिष्पत्तेः ।

उत्तरयोरपि रूढिशक्तिरेव । जनपदे लुबिति सूत्रप्रत्याख्यानावसरे "लुब्योगाप्रत्याख्यानात् (१।२।५५) सूत्रे कौमुद्यां वृत्तौ पञ्चालादयः शब्दाः क्षत्रियेषु यथा रूढाः, तथा जनपदेऽपीति तद्धितो नोपपद्यत इत्याह । अपि च लुपि युक्तवदिति सूत्रे कलिङ्गा इत्युदाहरणादत्रापि रूढि-शक्तिरेवेति दिग् ।

समीक्षा—

प्रायशश्चतुरा नराः किमपि प्रयोजनमुद्दिश्यानादिप्रयोगप्रवाहाद् वा लाक्षणिकान् शब्दान् प्रयुञ्जाना दृश्यन्ते । प्रायो बहवः शब्दा बहोः कालात् स्वमुख्यार्थं परित्यज्य लक्ष्यार्थे प्रयुक्ताः तानेवार्थान् बोधयन्तस्तत्र रूढाः सन्ति । इमे रूढलाक्षणिकाः शब्दाः प्रायोऽभिधावद् झटिति लक्ष्यार्थमेव बोधयन्ति । अतो लक्षणा मूलतो द्विविधा—रूढिः प्रयोजनवती च । रूढिलक्षणातो रूढिशक्तेः को भेद इति जिज्ञासायां यत्र सबाधार्थप्रतीतिः (मुख्यार्थबाधपूर्वकसम्बद्धार्थप्रतीतिः) तत्र रूढिलक्षणा । यत्र निर्बाधार्थप्रतीतिस्तत्र रूढिशक्तिः, यथा—डित्थडवित्थवृक्षभूवादिषु

५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मण्डपादिषु च । रूढिलक्षणायाश्च—लावण्यानुकूलप्रतिकूलानुलोमप्रतिलोमप्रतिपक्षकुशलादयः 'नीलो घटः' इत्यादयश्चोदाहरणानि सन्ति ।

अत्र लावण्याद्याः शब्दाः स्वविषयाल्लवणरसयुक्तत्वादेः स्वार्थादन्यत्र हृदयत्वाद्यर्थे रूढाः । 'ममायमनुकूलः' इत्यादौ कूलमनुगत इति व्युत्पत्त्या कूलानुगतत्वादेर्मुख्यार्थस्य प्रकृते बाधादेकवस्तु-प्रवणत्व(तदेकसंसक्तत्व) रूपशक्यार्थसादृश्यसम्बन्धेनानुगुणादयोऽर्था लक्ष्यन्ते । अत्र हेतुरनादि-प्रयोगप्रवाह एवेति । परं यथा व्युत्पन्ना धूमं दृष्ट्वा विनैव व्याप्तिस्मृतिपरामर्शादिकं द्रागवह्नि-मनुमिन्वन्ति, यथा च सचेतसो वाच्यार्थविमुखाः सन्तो वाच्यसामर्थ्याक्षिप्तमपि व्यङ्ग्यार्थमररमभि-विन्दन्ति, तथैव रूढिलक्षणायामपि मुख्यार्थबाधयोगयोर्नैरपेक्ष्येणैव लक्ष्यार्थमव्यवहितमव-गच्छन्ति ।

अत एवोक्तं भट्टपादैः---

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् । इति ।

अतः स्वहेतुभूतरूढिप्रयोजनवशाल्लक्षणा तावद् द्विविधेति ।

अनन्तरं सम्बन्धभेदेनापि लक्षणाभेदाः सन्ति । तद्यथा सम्बन्धो द्विविधः - सादृश्यं तदितरश्च । सामीप्य-तात्स्थ्य-समवाय-संयोग-वैपरीत्य-क्रियायोग-कार्यकारणभावसामान्य-विशेषभाव-तादर्थ्य-तात्कर्म्याद्यनेकशः सम्बन्धाः (एकशतं षष्ठयर्था इति भाष्योक्तेः) सादृश्येतर-पदग्राह्याः सन्ति । तत्र सादृश्यसम्बन्धेन या लक्षणा सा गौणी; सादृश्येतरसम्बन्धेन या लक्षणा सा शुद्धेति ।

अत्रेदं चिन्त्यते किं गौणी लक्षणाभेदा उत पृथग् वृत्तिः ।

तत्र सादृश्यसम्बन्धमूलिका गौणीत्युक्तौ विचार्यते यत् सम्बन्धो हि सम्बन्धिभ्यां भिन्नो द्विष्ठो विशिष्टबुद्धिनियामकश्चेति । यथा दण्डदेवदत्तयोः संयोगसम्बन्धे सति दण्डदेवदत्ताभ्यां भिन्नः संयोगः, दण्डे देवदत्ते चोभयत्र तिष्ठति, दण्डी देवदत्त इति (दण्ड) विशिष्टबुद्धे-र्नियामकश्च, तथैव सिंहदेवदत्तयोः सादृश्यसम्बन्धे सति सिंही सिंहवान् वा देवदत्त इति विशिष्ट-बुद्ध्यभावात् सादृश्यस्य न सम्बन्धत्वम्, विशिष्टधीयोग्यस्यैव सम्बन्धत्वात् । तथा च गुणयोगादियं वृत्तिर्गौणीत्युच्यते ।

तदुक्तं भट्टपादैरुद्धृतं च प्रकाशे द्वितीयोल्लासे—

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ।। इति ।

अत एव भोजराजोऽपि सरस्वतीकण्ठाभरणे पञ्चमपरिच्छेदे "शब्दो हि मुख्या गौणी-लक्षणाभिर्वृत्तिभिरर्थविशेषप्रतिपत्तिनिमित्तं भवति । तद्यथा—गौरित्ययं शब्दो मुख्यया वृत्त्या सास्नादिमन्तमर्थं प्रतिपादयति । स एव तिष्ठन्मूत्रत्वादिगुणसम्पदमवेक्ष्य वाहीकादौ प्रयुज्यमानो गौणीवृत्तिमनुभवति । यदा तु मुख्यया गौण्या वोपात्तक्रियासिद्धौ साधनभावं गन्तुम् असमर्थः, तदा लक्षणया स्वार्थाविनाभूतम् (स्वार्थसम्बद्धम्) अर्थान्तरं लक्षयति । यथा—"गङ्गायां घोषः प्रतिवसति" इति गङ्गाशब्दो विशिष्टोदकप्रवाहे निरूढाभिधानशक्तिर्घोषकर्तृकायाः प्रतिवसनक्रियाया

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अधिकरणभावं गन्तुमसमर्थः स्वार्थाविनाभूतं तटं लक्षयति" इति (का० प्र०, द्वि० उ० वामन्या-मुद्धृतम्)। सन्ति च द्वयोरनेके भेदाः, तद्यथा 'गङ्गायां घोषः' इत्यत्र लक्ष्योऽर्थो नोपात्तः, गौण्यां गौर्वाहीक इत्यादावुपात्तः। गौण्यां च लक्ष्यलक्षकयोः सामानाधिकरण्येन निर्देशः (समान-विभक्तिकपदाभ्यामुपस्थापनम्) द्वयोश्चाभेदान्वयो जायते।

शाब्दबोधे च लक्षणायां संसर्गतया भानम्। गौण्यां च लक्ष्यधर्मतया (प्रकारतया), अतो गौणी पृथग् वृत्तिरिति मीमांसकानां तदनुयायिनां भोजराजादीनाञ्च मतम्।

अपि च लक्षणायां शक्यसम्बन्धो निमित्तं गौण्यां च गुणसम्बन्धो निमित्तम्। लक्षणायां साक्षात् शक्यसम्बन्धः, गौण्यां च परम्परेति बहवो भेदा द्वयोः, अतो गौणी पृथग् वृत्तिरिति। उच्यते-यथा लक्षणा मुख्यार्थबाधमुख्यार्थयोगरूढिप्रयोजनान्यतरनिमित्तसत्त्वे प्रवर्तते, तथैव गौण्यपीति न गौणी पृथग् वृत्तिरित्यालङ्कारिकाः। साक्षात्सम्बन्धे विशिष्टबुद्धिनियामकसम्बन्धे सत्येव लक्षणेति नियमाभावाच्च। "उपकृतं बहु तत्र किमुच्यते सुजनता" इत्यादौ विपरीतलक्षणायां तन्निरूपित-विरोधाधिकरणत्वरूपपरम्परासम्बन्धेनापि लक्षणास्वीकारात्।

अपि च घटरूपप्रत्यक्षे चक्षुषा संयुक्ते घटे रूपस्य समवायसम्बन्धेन घटे सत्त्वाद् यथा विशिष्टबुद्धययोग्योऽपि संयुक्तसमवायरूपपरम्परासम्बन्धः, तथैव तत्सहशनिष्ठस्य तन्निरूपित-सादृश्याधिकरणत्वरूपपरम्परासम्बन्धस्य स्वीकारे बाधकाभावात्। भोजराजो मीमांसाप्रभा-वितस्तथैव वदति। सरस्वतीकण्ठाभरण एव पुनः (पञ्चमपरिच्छेदे) मुख्य-गौणी-लक्षणा-तद्भावापत्तिरूपचरिता लक्षणेति शब्दवृत्तय इत्यादिना पञ्चवृत्तीः प्रतिपादयति। तत् किं ताः पृथग् वृत्तयः ? वस्तुतस्ताः सर्वा अपि वृत्तयो मुख्यभिन्ना लक्षणा भेदा एवेति।

यथा 'गौर्वाहीकः' इत्यत्र मुख्यगौणयोः(लक्ष्यलक्षकयोः)द्वयोरुपादानम्, तथा 'आयुर्घृतम्' इत्यत्रापि (सारोपायाम्) द्वयोरुपादानं भवत्येव। साध्यवसानायां द्वयोरुपादानं न भवति, यथा 'गौर्जल्पति, तथैवायुरेवेदम्, गङ्गायां घोषः' इत्यादौ। अभेदबोधश्चोभयत्र भवति, निपातातिरिक्त-नामार्थयोरभेदातिरिक्तसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। एवं मुख्यार्थबाधादिहेतुत्रयसद्भावाद् गौणीलक्षणाया एव भेदभूतेति।

एवमेव परम्परासम्बन्धेन लक्षणायां नैयायिका लक्षितलक्षणाख्यमन्यं भेदमङ्गीकुर्वन्ति। तेषामयमभिप्रायो यत् 'द्विरेफो गुञ्जति' इत्यत्राभिधया रेफद्वयं प्रतीयते, परं तस्य प्रकृते बाधात् वक्तृतात्पर्यानुपपत्त्याऽवयविना सम्बन्धेन भ्रमरपदं लक्ष्यते, भ्रमरपदमभिधया मधुकरं बोधयतीति। "रेफद्वयघटितपदवाच्यत्वरूपपरम्परासम्बन्धेनार्थप्रतीतेरत्र लक्षितलक्षणा। यत्र तु साक्षात् शक्यार्थसम्बन्धेन लक्ष्यार्थप्रतीतिः, तत्र लक्षणेति तेषां तात्पर्यात्। नैयायिका वाक्यवृत्ति लक्षणां नाङ्गीकुर्वन्ति, वाक्यस्य शक्यार्थाभावात्, स्वशक्यसम्बन्धरूपाया लक्षणाया-स्तत्राभावात्। अतो रेफपदस्यैव लक्षणया भ्रमररूपोऽर्थो द्विपदं तत्र तात्पर्यग्राहकम्" इति (न्या० सि० मु० श० खण्डे लक्षणानिरूपणे)।

वेदान्तपरिभाषायाञ्च धर्मराजाध्वरीन्द्र आगमपरिच्छेदे केवललक्षणा लक्षितलक्षणेति द्विविधां लक्षणां विभज्य यत्र शक्यस्य साक्षात् सम्बन्धस्तत्र लक्षितलक्षणा। यथा—रेफद्वये

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शक्तस्य द्विरेफपदस्य रेफद्वयवति भ्रमरपदे लक्षणा । तद्वाच्यत्वरूपसम्बन्धेन मधुकरस्य प्रतीतिः, अतोऽलक्षितलक्षणा । गौण्यपि वृत्तिः स्वशक्यसम्बन्धिगुणसम्बन्धवत्तया लक्षितलक्षणैवेत्याह ।

परं यथा शक्यस्य साक्षात् सम्बन्धो लक्षणा, तथा परम्परासम्बन्धोऽपि लक्षणैव वृत्तिः । "उपकृतं बहु तत्र" इत्यादौ तन्निरूपितविरोधाधिकरणत्वरूपपरम्परासम्बन्धेन लक्ष्यार्थप्रतीतेर्दर्शनात्। अतो लक्षितलक्षणाऽपि लक्षणैव । सादृश्यरूपगुणसम्बन्धेनार्थबोधिका या गौणी, साऽपि लक्षणा-भेदरूपैवेति ।

वैयाकरणाश्च–"समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इति भिन्नामेव शक्तिमेकार्थीभावरूपां स्वीकुर्वन्ति । अतो द्विरेफपदस्य शक्त्यैव भ्रमररूपार्थबोधः, न लक्षणया योगरूढिशब्दोऽयमिति । कोशादौ द्विरेफभ्रमरयोः पदयोः पर्यायत्वेन निरूपणात् । न हि लाक्षणिकानां पर्यायत्वेन कोशेषु पाठो दृश्यते । अपि च द्विरेफपदात् बाधमन्तरापि भ्रमररूपार्थबोधे कथं लक्षणा ? द्विरेफपदस्यावयवार्थप्रतीतिर्नास्त्येव रथन्तरं सामेतिवत् । अपि च रेफद्वयसम्बन्धो यथा भ्रमरपदे, तथैव क्रूररात्रिरन्ध्रकुरटादिपदेऽपि सत्त्वात् तेषां कथं न ग्रहणम्, कथं भ्रमरस्यैव लक्षणया बोधः ? न च सिद्धपदान्तरसन्निधिरूपात् प्रकरणाद् बोध इति चेत्, सत्यम्; द्विरेफपदस्य लक्ष्यार्थो भ्रमरपदं चेत्, भ्रमरपदेन च मधुकरार्थप्रतीतौ द्विरेफं पश्येत्यादौ प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमभङ्गापत्तेः । न च द्विरेफपदस्य मधुकरार्थे एव लक्षणा मध्ये भ्रमरेति लक्षितपदमपि वर्ततेऽतो लक्षितपदघटितलक्षणा लक्षितलक्षणेत्युच्यते, परं भ्रमरपदस्यानुच्चरितत्वात् तेनार्थप्रत्ययो भवितुं नार्हति । उच्चारितः शब्द एव प्रत्यायको भवति, नानुच्चारित इति नियमात् । न चोच्चारितस्यैव प्रत्यायकत्वे पुस्तकदर्शनाद्यार्थप्रतीतिः सा कथमिति न शङ्क्यम्, तत्रापि स्वीयसूक्ष्मोच्चारणसत्त्वादन्यथाऽऽङ्ग्लानभिज्ञानामपि तल्लिपिदर्शनादर्थबोधापत्तेः । उच्चारितस्यैव शब्दस्यार्थप्रत्यायकतया गामानयेत्याहेत्यादावनुकरणेनानुकार्यप्रतीतावपि न ततोऽर्थबोधः ।

अपि च घ्राणेन्द्रियगृहीतस्यैव गन्धस्य यथा सुखविशेषजनकता, न स्मृतस्य; तथा पदानां बोधजनकता श्रुतस्यैव, न स्मृतस्य, अतो द्विरेफपदेनाभिधयैव मधुकरबोधः, न लक्षितलक्षणयेति लघुमञ्जूषायां लक्षणानिरूपणे नागेशभट्टो बभाषे । अतो जरन्नैयायिका एव लक्षितलक्षणामभिदधुः, न पुनर्नव्या इति ।

आलङ्कारिका अपि नेमां स्वीकुर्वन्ति । एवमेव प्राचीनवेदान्तिभिर्भागत्यागलक्षणाऽर्वाचीनैश्च जहदजहल्लक्षणा स्वीकृतेति धर्मराजाध्वरीन्द्रमतप्रतिपादनाऽवसरे प्रतिपादितम् । तत्त्वमसीति महावाक्ये तत्पदवाच्यं सर्वज्ञत्वविशिष्टं चैतन्यम्, त्वंपदवाच्यमल्पज्ञत्वविशिष्टं चैतन्यम्, सर्वज्ञत्वाल्पज्ञत्वयोरैक्यायोगाद् विरुद्धांशं परित्यज्य चैतन्ययोरेवैक्यमिति साम्प्रदायिकाः । श्रीशङ्कराचार्यपादा यद्यप्यत्र धर्मराजाध्वरीन्द्रः शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावादिदं वाक्यं न जहदजहल्लक्षणाया उदाहरणमित्याह, तथापि 'काकेभ्यो दधि रक्ष्यताम्' इत्युदाजह्रे । तत्र शक्यकाकपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काकेऽकाकेऽपि काकशब्दस्य वृत्तेरिति । न च यत्र विशिष्टवाचकः शब्द एकदेशं विहाय एकदेशे वर्तते, तत्र जहदजहल्लक्षणेति लक्षणमत्र न सङ्घटते, श्वादेः काकैकदेशत्वाभावादिति शङ्क्यम्, शक्याशक्यगोचरवृत्तित्वमिति तल्लक्षणादिति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इमां जहदजहल्लक्षणां कियन्त आलङ्कारिका आशाधरभट्टादयश्चापि स्वीकुर्वन्ति, परमन्येऽजहल्लक्षणायामेवान्तर्भावयन्ति, वैयाकरणो नागेशोऽप्यन्तर्भावयति ।

अन्ये च भेदाः प्रयोजनवत्या मुख्यार्थस्य लक्ष्यार्थे हानोपादानाभ्याम् । यत्र मुख्यार्थस्याप्युपादानं सोपादानलक्षणा । यत्र मुख्यार्थस्य परित्यागः (तिरस्कारः) तत्र मुख्यार्थो लक्ष्यार्थस्योपलक्षणमिति लक्षणलक्षणा । (उपादानलक्षणा शुद्धाया एव भेदः) । यत्र लक्ष्यलक्षकयोः सामानाधिकरण्येन निर्देशस्तत्र सारोपा (विषयविषयिणोः पृथङ्निर्दिष्टयोरभेद आरोप इति) (विषयिणा विषयस्य निगरणमध्यवसानम्) । यत्र लक्षकेण लक्ष्यस्य निगरणं तत्राध्यवसानमित्युभौ भेदौ शुद्धायां गौण्यां च समानौ ।

अन्ये भेदाः प्रयोजनस्य व्यङ्ग्यस्य गूढागूढत्वात् । आधारभेदाच्च भेदः पदवाक्यगतत्वेनेति द्वैविध्यम् । निरूढलक्षणायाः काव्य उपयोगाभावात् सम्भविनोऽपि भेदा न वर्णिताः । एवमुद्देश्यविधेयतदन्वयिपदानां लक्षकतया भेदाः सन्ति । अत्र न विधौ परः शब्दार्थ इति मीमांसकानां राद्धान्तो नाद्रियते "कामिनीवचोऽमृतम्" इत्यादौ तद्बाधात् ।

एवं मम्मटभट-पण्डितराजादिभिः कृता भेदा एव काव्योपयोगिनः, अन्येषां पाण्डित्यप्रदर्शनमात्रमिति विविधशेमुषीकाणां विपश्चितां सर्वमनवद्यमिति शम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'प्रज्ञापराधम्' तं शिष्टा ब्रुवते व्याधिकारणम्

डॉ० विद्याधरशुक्लः, कविराजः

प्रवाचकः, आयुर्वेदमहाविद्यालयः,

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी ।

प्रज्ञायतेऽनया इति प्रज्ञा बुद्धिः, तस्या अपराधः प्रज्ञापराधः । अत्र च प्रथमं प्रज्ञाया अपराधस्य च शब्दार्थालोचनमपेक्षितं भवति । का नाम प्रज्ञा ? कश्चापराधपदार्थ इत्युभयोश्शब्दयोर्मर्यादाज्ञानमन्तरा न शक्यते पिण्डार्थज्ञानावगमनमिति कृत्वा तावत्र पूर्वमेव विचारसरणिमारोहतः । प्रज्ञायाः पर्यायाः—

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ।[1]

---

१. अमरकोषः १।५।१ तत्र रामाश्रमी टीका—बुद्धिरिति-बुद्धचतेऽनया, बोधनं वा । क्तिन् (३।३।९४) ॥१॥ 'ईष गतिहिंसादर्शनेषु' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३।३।१०३) इत्यप्रत्ययः । मनस ईषा, शकन्ध्वादित्वात् (वा० ६।१।९४) टेः पररूपम् ॥२॥ धृष्णुवन्त्यनया, 'ञिधृषा प्रागल्भ्ये' (स्वा० प० से०) धृषेर्धिष् च संज्ञायाम् (उ० २।८२) इति युच् ॥३॥ ध्यायत्यनया, ध्यानं वा । ध्यायतेः संप्रसारणं च (वा० ३।२।१७८) इति क्विप् । हलः (६।४।२) इति दीर्घः (धीर्ज्ञानभेदे बुद्धौ च इति मेदिनी ७८।२) ॥४॥ प्रज्ञायतेऽनया, प्रज्ञानं वा । 'ज्ञाऽवबोधने' (क्र्या० प० अ०) आतश्चोपसर्गे (३।३।१०६) इत्यङ्, 'प्रज्ञा श्रद्धा धरा ज्ञप्तिः पण्डा संवेदनं विदा' इति शब्दार्णवात् ॥५॥ शेते शेः विच् (३।२।७५) । मोहः तं मुष्णाति, शेमुषी । मुष् स्तेये (क्र्या० प० से०) मूलविभुजादित्वात् (वा० ३।२।५) कः । गौरादित्वात् ङीष् (४।१।४१) ॥६॥ मन्यतेऽनया, मननं वा । 'मन ज्ञाने' (दि० आ० अ०) क्तिन् (३।३।९४) 'मतिर्बुद्धीच्छयोः' इति हैमः (२।१८९) ॥७॥ प्रकृष्टमीक्षणमनया । 'गुरोश्च' (३।३।१०३) इत्यः । टाप् (४।१।४) प्रेक्षाधीरीक्षणं नृत्तम् इति हैमः (२।५७९) ॥८॥ उपलम्भनम् उपलभ्यतेऽनया वा । 'डुलभष् प्राप्तौ' (भ्वा० आ० अ०) षित्वात् (३।३।१०४) अङि प्राप्ते आबादित्वात् (वा० ३।३।९४) बाहुलकाद्वा क्तिन् । ('उपलब्धिर्मतौ प्राप्तौ' इति हैमः ४।१५७) ॥९॥ चिती संज्ञाने (भ्वा० प० से०) संपदादित्वात् (वा० ३।३।१०८) क्विप्, चित् तान्ता ॥१०॥ संवेदनं 'विद् ज्ञाने' (अ० प० से०) (संवित् संभाषणे ज्ञाने संग्रामे नाम्नि तोषणे । क्रियाकारे प्रतिज्ञायां सङ्केताचारयोरपि ॥ इति हैमः २।२३९) ॥११॥ प्रतिपदनम् 'पद गतौ' (दि० आ० से०) संपदादित्वात् (वा० ३।३।१०८) क्विप्, करणे वा ('प्रतिपत् संविदि तिथौ' इति हैमः ३।३६४) ॥१२॥ 'ज्ञप मिच्च (चु० प० से०) चुरादिः । ण्यन्तत्वाद्युचि (३।३।१०७) प्राप्ते आबादित्वात् (वा० ३।३।९४) बाहुलकाद्वा क्तिन् । यदा तु चुरादीनां णिजभावे सामान्यापेक्षं ज्ञापकम्, तदा क्तिन् न्याय्य एव । 'तितुत्र'—(७।२।९) इति नेट् ॥१३॥ 'चित संचेतने (चु० आ० से०) चुरादिः । 'ण्यासश्रन्थः'—(३।३।१०७) इति युच् । चेतना संविदि स्त्रियाम् । वाच्यवत्प्राणयुक्ते (इति ८७।६३–६४) ॥१४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बुद्धिः, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः, प्रेक्षा, उपलब्धिः, चित्, संवित्, प्रतिपत्, ज्ञप्तिः, चेतना चेति चतुर्दश पर्यायाः । सम्यग् बोधनं हि प्रज्ञायाः कर्म । बुद्धिर्हि सर्वमेव वस्तु यथाभूतं पश्यति । समदर्शनं हि बुद्धेर्वैशिष्ट्यम् । बुद्धिश्च बहुविषयत्वेन उपचाराद् विपुला निगद्यते, सा च विपुला बुद्धिः शुश्रूषा-श्रवण-ग्रहण-धारण-ऊहापोह-तत्त्वाभिनिवेशवती बोद्धव्या । बुद्धिश्च मनोव्यापारानन्तरमेव प्रवर्तते विषयेषु । पूर्वं तावदिन्द्रियाण्यालोचयन्ति विषयान्, ततश्च हेयोपादेयतया मनः सङ्कल्पयति, अहङ्कारश्चाभिमन्यते यदत्राहमधिकृतः, ततोऽनन्तरं बुद्धिरध्यवस्यति—त्यजाम्येनं दोषवन्तम्, गृह्णाम्येनं गुणवन्तमित्यध्यवसायं करोति । बुद्धौ हि सर्वकरणव्यापारार्पणं भवति—

एते प्रदीपकल्पाः परस्परगुणविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥

(साङ्ख्यकारिका ३६)

तथा च— इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते ।
कल्प्यते मनसा तूर्ध्वं गुणतो दोषतोऽथवा ॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।
व्यवस्यति तया वक्तुं कर्तुं वा बुद्धिपूर्वकम् ॥

(चरकसंहिता शारीर० १।२२-२३)

एवं हि निश्चयात्मकं याथार्थ्यविबोधनं बुद्धेर्व्यापारः, तस्मिंश्च व्यापारे यदाऽपराधो भवति, तदा ह्युदेति प्रज्ञापराधः । अपराधश्च—"आगोऽपराधो मन्तुश्च[1]" इत्यनुसारम् आगः= अपराधः, मन्तुरित्येभिः पर्यायैर्निगद्यते ।

तथाहि यदा बुद्धेर्विषमाभिनिवेशो भवति, तदा सा उचितम्, अनुचितम्, नित्यम्, अनित्यम्, हितम्, अहितम्, यद्वा अनुचितम् उचितम्, अनित्यम् नित्यम्, अहितं हितं विजानाति, वैषम्येण च प्रवर्तते, तदा ह्ययथाभूतत्वेनाध्यवसानम् "प्रज्ञापराधः[2]" इत्युच्यते ।

---

१. अमरकोषः २।८।२६ तत्र रामाश्रमी टीका—आग इति ॥ एति, इण् गतौ (अ० प० अ०) 'इण आगोऽपराधे च' (उ० ४।२१२) इत्यसुन् आगादेशश्च । अगति 'अग गतौ' (भ्वा० प० से०) 'वस्यजिभ्यां णित्' इत्यसुन्—इति सुभूतिः । तन्न, उज्ज्वलदत्तादिपूक्तसूत्रस्यादर्शनात् । 'आगोऽपराधे पापे स्यात्' इति मेदिनी (१७१।१५) । सान्तं क्लीबम् ॥१॥ अपराधनम् 'राध संसिद्धौ' (स्वा० प० अ०) घञ् (३।३।१८) ॥२॥ मन्यते 'मन ज्ञाने' (दि० आ० अ०) 'कमिमनिजनि—' (उ० १।७१) इति तुः । 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' इति मेदिनी (५७।४३) ॥३॥ त्रीणि अपराधस्य ।

२. बुद्ध्या विषमविज्ञानं विषमं च प्रवर्तनम् ।
प्रज्ञापराधं जानीयान्मनसो गोचरं हि तत् ॥

(चरक० शा० १।१०९)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शारीरिक-मानसिक-वाचिककर्मणां सर्वथाऽप्रवर्तनम् अयोगः, अतिशयेन प्रवर्तनम् अतियोगः कथ्यते। यदा च कश्चन पुरुषः प्रवर्तमानान् वातविण्मूत्रजृम्भादिवेगानवरुणद्धि, अप्रवृत्तांश्च वातविण्मूत्रादिवेगान् हठात् प्रवर्तयति, उच्चावचेषु भूमिभागेष्वनवधानतः प्रस्खलति, विषमस्थलेषु गच्छति, वैषम्येण चाङ्गानि इतस्ततः प्रक्षिपति, दूषितपदार्थान् स्पृशति, गात्रेषु प्रहरति मुष्टयादिभिः, शरीराङ्गानि भृशं मृद्नाति, गात्रभङ्गाभिनयं वा विधत्ते, श्वासावरोधमाचरति, अविचार्यैव व्रतोपवासादिकमाचरति, तदा क्लेशभाग् भवति, मद्यातिसेवनम्, शीतातपाग्निजलादीनामतिसेवनमनियमेन च सेवनं शारीरिको मिथ्यायोग उच्यते। यदा वा सूचकानृताप्रियासम्बद्धवचनानि ब्रवीति, प्रतिकूलं परुषं कलहकारकं वा वचनं प्रयुङ्क्ते, तदा वाङ्मिथ्यायोगो भवति। एवञ्च भय-शोक-क्रोध-लोभ-मोह-मानेर्ष्याभ्यसूयादिर्मानसो मिथ्यायोगो भवति।

एतच्च शारीरिक-मानसिक-वाचिककर्मणामयोगातियोगमिथ्यायोगरूपं कर्म 'प्रज्ञापराध'-शब्दव्यपदेश्यं भवति।[1]

प्रज्ञापराधवशाच्च पुरुषो बुद्धेर्हीनमिथ्यातियोगादहितानि कर्माण्याचरति, ततश्च कर्मजव्याधिभिरभिभूयतेतराम्।[2] प्रज्ञापराधादेव चाहितानिन्द्रियार्थान् निषेवतेऽनुरज्यते च तादात्विकेषु सुखेषु, ततश्चाक्राम्यते तज्जैरामयजातैः।[3]

सामान्यतस्तु प्रज्ञापराधः कायवाङ्मनःक्रियापराधे प्रयुज्यते। यथा च बुद्धेर्हीनयोगे कायवाङ्मनसां सर्वात्मना प्रवृत्त्यभावो भवति, तत्तु कफजोन्मादलक्षणे स्फुटमेवाभिव्यक्ततां व्रजति—

सम्पूरणैर्मन्दविचेष्टितस्य
सोष्मा कफो मर्मणि संप्रवृद्धः।
बुद्धिं स्मृतिं चाप्युपहत्य चित्तं
प्रमोहयन् संजनयेद् विकारम्॥
(माधवनिदानम्, उत्तरार्धम्)

अत्र हि बुद्धि-स्मृति-चित्तविक्षेपाच्च शरीरवाङ्मनसां प्रवृत्त्यभावो भवतीत्युक्तम्। चरकोक्तलक्षणेषु (निदान० ७।९) च 'स्थानमेकदेशे' इति शारीरो हीनयोगः, 'तूष्णीभावः' इति वाग्हीनयोगः, 'रहस्कामता' इति मनोहीनयोगः प्रदर्शितो वर्तते।

---

१. चरक० सूत्र० ११।३९-४१।

२. प्रज्ञापराधात् संभूते व्याधौ कर्मज आत्मनः।
नाभिशंसेद् बुधो देवान्न पितॄन्न च राक्षसान्॥
(चरक० निदान० ७।२४)

३. प्रज्ञापराधाद्ध्यहितानर्थान् पञ्च निषेवते।
संधारयति वेगांश्च सेवते साहसानि च॥
(चरक० सूत्र० २८।३९)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रज्ञापराधस्य परिभाषा—

बुद्धिविभ्रष्टः, धृतिविभ्रष्टः, स्मृतिविभ्रष्टश्च जनो यत् किमपि दुःखोदर्कं कर्म समाचरति, तदेव 'प्रज्ञापराधः'[1] इति व्यवस्येत् ।

बुद्धिविभ्रंशः—

कार्याकार्य-हिताहित-शुभाशुभ-नित्यानित्य-सुखासुखभावेषु वैषम्यबुद्धिरयथाभूतत्वेनाध्यवसानम् 'बुद्धिविभ्रंशः'[2] इत्युच्यते । यथा पैत्तिकोन्मादे—अमर्षसंरम्भविनग्नभावाः, सन्तर्जनातिद्रवणरोषाः, शस्त्रलोष्टकशाकाष्ठमुष्टयादिभिर्हननं स्वेषां परेषां वा । वातिकोन्मादे—परिसरणमजस्रम्, यानमयानैः, अलङ्करणमनलङ्कारिकैर्द्रव्यैः, अभीक्ष्णं स्मितहसितनृत्यगीतवादित्रप्रयोगाश्चास्थाने । एवमन्यानि च लक्षणानि बुद्धिविभ्रंशस्य वर्णितानि सन्ति ।

धृतिविभ्रंशः[3]—

'धृञ् धारणे' (भ्वा० उ० अ०) क्तिन् (३।३।९४) धृतिः । 'धृतिर्धारणधैर्ययोः' इत्यमरः । धृतिः किलाकार्यप्रसक्तं मनो निवर्तयति । मनसो नियमनं विदधाति । यदा च धृतिरहितादर्थान्मनो निवर्तनेऽक्षमा भवति, विषयेषु समासक्तं मनो न निगृह्णाति, तदा हि 'धृतिविभ्रंशः' इति ज्ञेयः । यदा मनोनियमनं कर्तुमशक्ता धृतिः स्वकर्मविभ्रष्टा भवति, तदा 'धृतिविभ्रंशः' इत्युच्यते । यथा अपस्माररोगे[4] धृतिसंप्लवमुद्दिश्यैव जलाग्निद्रुमशैलेभ्यो विषमेभ्यश्च स्थानेभ्योऽपस्मारिणो रक्षोपदेश उपदिष्टः । यथा च—कफजोन्मादे 'चिराच्च संज्ञां प्रतिलभमानम्, उत्पतन्तम्, लालामुद्वमन्तं श्लेष्मणाऽपस्मरन्तं विद्यादिति । पैत्तिकेऽपस्मारे क्षणेन संज्ञां प्रतिलभमानम्, अनुकूजन्तम्, आस्फालयन्तं भूमिम्' इत्यादिस्थले धृतिविभ्रंशो लक्ष्यते । वातापस्मारे च असाम्ना विलपनम्, सततमक्ष्णोर्वैकृतम्, अनवस्थितसक्थिपाणिपादमित्यादिलक्षणैर्वर्तिनापस्मरन्तं विद्यात् । एवञ्च धृतिनियमनविभ्रंशे विविधाः शारीरा मानसा वा आकृतयो भवन्ति ।'[5]

---

१. धीधृतिस्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम् ।
प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम् ॥
(चरक० शारीर० १। १०२)

२. विषमाभिनिवेशो यो नित्यानित्ये हिताहिते ।
ज्ञेयस्स बुद्धिविभ्रंशः समं बुद्धिर्हि पश्यति ॥
(चरक० शा० १।९९)

३. विषयप्रवणं चित्तं धृतिभ्रंशान्न शक्यते ।
नियन्तुमहितादर्थाद् धृतिर्हि नियमात्मिका ॥
(चरक० शा० १।१००)

४. जलाग्निद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा । रक्षेत्............॥ (चरक० चि० १०।६६)

५. चरक० निदान० ८।८-१० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्मृतिविभ्रंशः[1]

स्मृतिः खलु स्मर्तव्येषु विषयेषु मनसः प्रणिधानादुपजायते। सतामुपासनेन, असताञ्च परिवर्जनेन, ब्रह्मचर्यशौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानधर्मशास्त्राध्ययनादिभिर्विषयविराग-विजननिवासधृत्यादिभिश्च स्मृतिरुपजायते। "आत्मादीनाञ्च यथाभूतानुस्मरणम् आत्मा शरीराद्यनुपकार्यः शरीरादयश्च तदधीनभावाः" इत्यादिकस्मरणरूपा स्मृतिः 'तत्त्वस्मृतिः' इत्युच्यते। तत्त्वस्मृत्युदयाच्च भावानां स्वभावमनुस्मरन् प्राणी दुःखात् प्रमुच्यते किल[2]। तत्त्वस्मृतिबलेन च महर्षयोऽपुनर्भवत्वमवाप्नुवन्। रजस्तमोभ्यामुपहतचेतसां स्मृतिर्भ्रंश्यते। एतदेव 'स्मृतिविभ्रंशः' इत्युच्यते। सात्त्विकैराप्तजनैः स्मर्तव्यत्वेन तत्त्वज्ञानस्य स्मरणं विधीयते। रजोमोहावृतात्मनः स्मृत्यपराधात् स्मर्तव्यस्य यदस्मरणं तदेव 'स्मृतिविभ्रंशः' इति विद्यात्।

तथा च धीधृतिस्मृतिविभ्रष्टो जनोऽधार्यान् वातविण्मूत्रक्षुवतृट्क्षुधानिद्राकासश्वास-जृम्भाश्रुच्छर्दिरेतोवेगान् धारयति। धार्यांश्चानिष्टफलान् मनोवाक्कायव्यापार-साहस-लोभ-शोक भय-क्रोध-मानेर्ष्यातिरागाभिध्या-सूचकानृतवचनादिवेगानुदीरयति। नारींश्चातिसेवते, गुरुवृद्ध-सिद्धर्षिपूज्यानवमत्याहितान्याचरति। शब्दादीनाञ्चासात्म्यसंयोगमाचरति। परिणतिमनवधार्यैव भावानहितान् निषेवते। पापं कर्म समाचरति। देवर्षि-गन्धर्व-यक्ष-राक्षस-पिशाचादीन् तिरस्करोति। द्विज-गुरु-सुर-यतीनामभिधर्षणं करोति। औन्मादिकानि चायतनानि निषेवते। सन्ध्यावेलायां निशीथे वा दुरधिगमप्रदेशेषु सञ्चरति। पतितजनैश्च सह सख्यं करोति। नाग्निमुपचरति। न च प्रशस्ता ओषधीर्धारयति। अनवसरे परुषमहितममितं भाषते। सद्वृत्तोदितां-

---

१. तत्त्वज्ञाने स्मृतिर्यस्य रजोमोहावृतात्मनः।
भ्रश्यते स स्मृतिभ्रंशः स्मर्तव्यं हि स्मृतौ स्थितम्॥

(च० शा० १।१०१)

२. सतामुपासनं सम्यगसतां परिवर्जनम्।
व्रतचर्योपवासश्च नियमाश्च पृथग्विधाः॥
मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम्।
तत्त्वस्मृतेरुपस्थानात् सर्वमेतत् प्रवर्तते॥
स्मृतिः सत्सेवनाद्यैश्च धृत्यन्तैरुपजायते।
स्मृत्या स्वभावं भावानां स्मरन् दुःखात् प्रमुच्यते॥

(चरक० शारीर० १४३।४६-४७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्चाचारानवगणयति। रजोमोहावृतचेताश्च विविधं निन्दितं कर्म समाचरति। एतदखिलं प्रज्ञापराधजं कर्म वेदनानां हेतुतामावहति[1]।

देवादीनामर्चनादिकम्, हितकराणाञ्च भावानां सेवनम्, सद्भिर्विरोधः, असद्भिर्मैत्री, एतत्सर्वमात्मकर्तृकमेवास्ते। तथा च—

"सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा"।

आत्मानमेवोभयोः कर्तारं मत्वा यत् कल्याणमार्गं तदेवाश्रयणीयम्, तथा सति नोपतप्यते विकारनिकरैर्मानसैः शारीरैर्वा[2]। वस्तुतस्तु त्रिविधेषु रोगायतनेषु प्रज्ञापराध एव प्रामुख्यं भजते, यतः असात्म्येन्द्रियार्थसंयोगोऽपि प्रज्ञापराधज एव जायते—"प्रज्ञापराधाद्ध्यहितानर्थान् पञ्च निषेवते" (चरक० सू० २८।३९)।

कारणं वेदनानां किम्? इति प्रश्नस्योत्तरणे चरकाचार्येण सर्वतः प्राक् 'धीधृतिस्मृतिविभ्रंशः' एवोपात्तः। कर्मजव्याधयोऽपि प्रज्ञापराधजन्या एव जायन्ते। तथा च—

न हि कर्म महत् किञ्चित् फलं यस्य न भुज्यते।
क्रियाघ्नाः कर्मजा रोगाः प्रशमं यान्ति तत्क्षयात्॥
(च० शा० १।११७)

कर्मजाश्च रोगाः कर्मक्षयादेव शाम्यन्ति, यावच्च कर्मक्षयो न भवति, न तावदुपलभ्यते चिकित्साफलम्। अतश्च चरकाचार्य उपदिशति—

तदात्वे चानुबन्धे च यस्य स्यादशुभं फलम्।
कर्मणस्तन्न कर्तव्यमेतद् बुद्धिमतां मतम्॥
(चरक० विमान० ३।५४)

---

१. उदीरणं गतिमतामुदीर्णानां च निग्रहः।
सेवनं साहसानां च नारीणां चातिसेवनम्॥
कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्।
विनयाचारलोपश्च पूज्यानां चाभिधर्षणम्॥
ज्ञातानां स्वयमर्थानामहितानां निषेवणम्।
परमौन्मादिकानां च प्रत्ययानां निषेवणम्॥
अकालादेशसञ्चारी मैत्री संक्लिष्टकर्मभिः।
इन्द्रियोपक्रमोक्तस्य सद्वृत्तस्य च वर्जनम्॥
यच्चान्यदीदृशं कर्म रजोमोहसमुत्थितम्।
प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्॥
(चरक० शा० १।१०४–१०८)

२. आत्मानमेव मन्येत कर्तारं सुखदुःखयोः।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत नो त्रसेत्॥
(चरक० निदान० ७।२५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जनपदोद्ध्वंसनीये प्रसङ्गे च वायूदकदेशकालानां वैगुण्यमेव जनपदोद्ध्वंसकारणमाम्नातम्, तत्रापि प्रज्ञापराध एव मूलकारणत्वेनाख्यातः। तथा च—"वाय्वादीनां यद् वैगुण्यमुत्पद्यते तस्य मूलमधर्मस्तन्मूलं वा पूर्वकृतं कर्म, तयोर्योनिः प्रज्ञापराध एव" (चरक० विमान० ३।२४)।

यदा च देशनगरनिगमवासिनो जना धर्माचरणमतिक्रम्याधर्मेण व्यवहरन्ति, तदाऽन्येऽपि तदाश्रयिणो विहाय धर्ममार्गमधर्माचरणं विदधति। ततश्चाधर्मवशादृतवो व्यापद्यन्ते, वायुर्न सम्यग् वहति, न चेन्द्रो वर्षति यथाकालम्, भूमिश्च विगुणा भवति, ओषधयो वैकृत्यमावहन्ति। एवञ्च प्रज्ञापराधजप्रमादादुद्ध्वंसन्ते जनपदाः।

ये च प्रवृद्धलोभ-रोष-मोह-मानाः परस्परं स्वार्थवशाद् द्रुह्यन्ति शस्त्रप्रहारैश्चाक्रामन्ति, परैर्वाऽऽक्राम्यन्ते तत्रापि प्रज्ञापराध एव हेतुः। रोगाणामाद्युत्पत्तौ प्रज्ञापराधस्यैव कारणताऽङ्गीकृता चरकाद्याचार्यैः। चरकसंहितायां शारीरस्थानस्य द्वितीयेऽध्याये—रोगाः कुतः ? इति पूर्वपक्षमुत्थाप्योत्तरितं यत् प्रज्ञापराधस्तत्र हेतुरिति। तथा च—रोगाः कुतः, संशमनं किमेषाम्, हर्षस्य शोकस्य च किं निमित्तम् ? इति प्रश्नः, यस्य चोत्तरं दत्तं यत्—

प्रज्ञापराधो विषमास्तथार्थाः हेतुस्तृतीयः परिणामकालः।
सर्वामयानां त्रिविधा च शान्तिर्ज्ञानार्थकालाः समयोगयुक्ताः॥

आद्याविर्भावे रोगाणामधर्म एव गरीयान् हेतुः परिकीर्तितः। तस्य चाधर्मस्य मूलं प्रज्ञापराध इति प्रज्ञापराध एव रोगाणामादिमं कारणमित्यत्र नास्ति कश्चन विसंवादः। अस्मिंश्च प्रसङ्गे निम्नोद्धृतं चरकवचनमनुसन्धेयम्—

"आदिकाले हि………… …………सत्यार्जवानृशंस्यदानदमनियमतपउपवासव्रतपराव्यपगतभयरागद्वेषमोहलोभक्रोधशोकमानरोगनिद्राश्रमक्लमालस्यपरिग्रहाश्च पुरुषा बभूवुरमितायुषः। तेषामुदारसत्त्वगुणकर्मणामचिन्त्यरसवीर्यविपाकप्रभावगुणसमुदितानि प्रादुर्बभूवुः शस्यानि, सर्वगुणसमुदितत्वात् पृथिव्यादीनां कृतयुगस्यादौ"।

"भ्रश्यति तु कृतयुगे केषाञ्चिदत्यादानात् साम्पन्निकानां शरीरगौरवमासीत् सत्त्वानाम्। गौरवाच्छ्रमः, श्रमादालस्यम्, आलस्यात् सञ्चयः, सञ्चयात् परिग्रहः, परिग्रहाल्लोभः प्रादुर्भूतः कृते"।

"ततस्त्रेतायां लोभादभिद्रोहः, अभिद्रोहादनृतवचनम्, अनृतवचनात् कामक्रोधमानद्वेषपारुष्याभिघातभयतापशोकचिन्तोद्वेगादयः प्रवृत्ताः। ततस्त्रेतायां धर्मपादोऽन्तर्धानमगमत्। तस्यान्तर्धानाद् युगवर्षप्रमाणस्य पादह्रासः। पृथिव्यादीनां च गुणपादप्रणाशोऽभवत्। तत्प्रणाशकृतश्च शस्यानां स्नेहवैमल्यरसवीर्यविपाकप्रभावगुणपादभ्रंशः। ततस्तानि प्रजाशरीराणि हीयमानगुणपादैश्चाहारविहारैरयथापूर्वमुपष्टभ्यमानानि अग्निमारुतपरीतानि प्राग्व्याधिभिर्ज्वरादिभिराक्रान्तानि। अतः प्राणिनो ह्रासमवापुरायुषः"। (चरक० विमान० ३।२८–३०)

इति विकाराणां प्रागुत्पत्तौ प्रज्ञापराजस्याधर्मस्य हेतुत्वमाख्यातम्। अत एव च चरके सूत्रस्थानस्य प्रथमेऽध्याये रोगाणां हेतुनिर्देशे सुस्पष्टमुक्तं यत्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च।
द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसङ्ग्रहः ॥
(चरकसू० १।५४)

तत्र चक्रपाणिः,"............त्रिविध इत्ययोगातियोगमिथ्यायोगरूपः, हेतुसंग्रहो हेतुसंक्षेपः। कालग्रहणं त्विहादौ कृतं कालस्य दुष्परिहरत्वात्। तदनु बुद्धिरुच्यते-बुद्धचपराधस्यैव इन्द्रियार्थातियोगादिहेतुत्वात्। वक्ष्यति हि—"प्रज्ञापराधाद्धचहितानर्थान् पञ्च निषेवते" (चरकसूत्र० २८)।

एवं च यद्यप्यसात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधे प्रविशति, तथापि प्रत्यासन्नकारणत्वादसात्म्येन्द्रियार्थसंयोग एवायं पृथक् तन्त्रे सूच्यते, प्रज्ञापराधस्त्वसात्म्येन्द्रियार्थसंयोगव्यतिरिक्तकायवाङ्मनःक्रियापराधे वर्तते।

अत्र चाधर्मोऽपि व्याधिहेतुरस्ति। यदुक्तम् "क्रियाघ्नाः कर्मजा रोगाः" (चरक० शा० १)। तस्य चाधर्मस्य कालग्रहणेनैव ग्रहणं केचिन्मन्यन्ते तन्न, तिस्रैषणीये (चरक० सूत्र० अ० ११) प्रज्ञापराधेनैवाधर्मग्रहणात्। तत्र हि—"अनृतवचनाभिध्यादिवाङ्मनोमिथ्यायोगरूपः" प्रज्ञापराधविशेष उक्तः। न त्वनृतवचनादीनां स्वरूपेण व्याधिकर्तृत्वम्, किन्त्वधर्मोत्पादावान्तरव्यापाराणामेव, तेन प्रज्ञापराध एवाधर्मोत्पादावान्तरव्यापारः कर्मजरोगेषु कारणम्।"

एवञ्च असात्म्येन्द्रियार्थसंयोगस्य प्रज्ञापराधजत्वं सिद्धयति। ये च स्वाभाविका रोगाः कर्मजा वा व्याधयो भवन्ति तेषां 'कालज'व्याधावेवावरोधः कृतः प्रतिभाति। उक्तं हि चरके—

कालस्य परिणामेन जरामृत्युनिमित्तजाः।
रोगाः स्वाभाविका दृष्टा स्वभावो निष्प्रतिक्रियः ॥
तथा— निर्दिष्टं दैवशब्देन कर्म यत् पौर्वदेहिकम्।
हेतुस्तदपि कालेन रोगाणामुपलभ्यते ॥ इति।
(च० शा० १।११५-१६)

अत्रापि बुद्धिमिथ्यायोगरूपः प्रज्ञापराध एव रोगजनककर्मकारणम्। कालविशेषं तु प्राप्य येषां व्याधीनामागमो भवति, ते कालमिथ्यायोगजन्या वा भवन्तु, असात्म्येन्द्रियार्थसंयोगाद् वा प्रवर्तन्ते ते सर्वे प्रज्ञापराधजन्या एव सन्ति, केवलं तु कालकृताभिव्यक्तिमात्रस्यैव कालजसम्प्राप्तौ परिग्रहणात्। कालजेषु व्याधिषु ये गदा उक्तास्ते अन्येद्युष्कादिज्वरा अपि कालजन्या एवोक्ताः। यथा च—

अन्येद्युष्को द्वचहग्राही तृतीयचतुर्थकौ।
स्वे स्वे काले प्रवर्तन्ते काले ह्येषां बलागमः ॥
(चरक० शा० १)

तत्र हि अन्येद्युष्कादौ न च कालस्य मिथ्यायोगादयः कारणत्वेनोपलभ्यन्ते, किन्तु, असात्म्येन्द्रियार्थसंयोगप्रज्ञापराधावेव कारणत्वेन व्यापृताविति। तथा स्वाभाविकेषु च रोगेषु न काल-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मिथ्यायोगादयः कारणत्वेनोपलभ्यन्ते। तथाहि कालजाः स्वाभाविकाश्च गदाः प्रज्ञापराधजन्या एवेति। स्पष्टमेव तयोरुभयोः प्रज्ञापराधजत्वमवगम्यते, यतो हि कालस्वभावजानामनागतानां भाविधात्वननुगुणद्रव्यसेवादिरूपा कारणता प्रज्ञापराधजन्यैव भवति, तथा स्वाभाविकानां च क्षुत्पिपासाजरादीनां कालभोजनरसायनासेवनादिरूपा च कारणता प्रज्ञापराधेनैव जायते। समुचितभोजनरसायनसेवनाद्यकरणे यश्च स्वाभाविकरोगोद्भवस्तत्र प्रज्ञापराधजप्रमाद एव हेतुः। उचिते हि काले कर्तव्याकरणं प्रज्ञापराध एव। यथा चोक्तं प्रज्ञापराधनिर्वचने—

कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्।

(चरक० शारीर० १।१०४)

एवञ्च पूर्वोक्तदिशा सर्वविधानां निज-आगन्तुक-मानस-स्वाभाविक-कर्मज-कालजादीनां व्याधीनामादिकारणं प्रज्ञापराध एवेति विदुषां सम्मतम्। अनेनैवाभिप्रायेण 'प्रज्ञापराध' परिभाषणे चरकाचार्येण स्पष्टमेवोक्तम्—

"प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्।" इति।

(चरक० शारीर० १।१०८)

प्रज्ञापराधस्य व्याधिजनकत्वं प्रतिपाद्यानतिविस्तरेण रोगनिरोधविधिप्रतिपत्तये कतिचन आप्तवचनानि निर्दिश्यन्ते—

आयुः कामयमानेन धर्मार्थसुखसाधनम्।
आयुर्वेदोपदेशेषु विधेयः परमादरः॥
आर्द्रसन्तानतात्यागः कायवाक्चेतसां दमः।
स्वार्थबुद्धिः परार्थेषु पर्याप्तमिति सद्व्रतम्॥[1]

× × ×

इमांस्तु धारयेद्वेगान् हितार्थी प्रेत्य चेह च।
साहसानामशस्तानां मनोवाक्कायकर्मणाम्॥
लोभशोकभयक्रोधमानवेगान् विधारयेत्।
नैर्लज्ज्येर्ष्यातिरागाणामभिध्यायाश्च बुद्धिमान्॥
परुषस्यातिमात्रस्य सूचकस्यानृतस्य च।
वाक्यस्याकालयुक्तस्य धारयेद् वेगमुत्थितम्॥
देहप्रवृत्तिर्या काचिद् विद्यते परपीडया।
स्त्रीभोगस्तेयहिंसाद्या तस्या वेगान् विधारयेत्॥
पुण्यशब्दो विपापत्वान्मनोवाक्कायकर्मणाम्।
धर्मार्थकामान् पुरुषः सुखी भुङ्क्ते चिनोति च॥[2]

---

१. अष्टाङ्गहृदयम्, सूत्र० १।२।
२. चरकसंहिता, सूत्र० ७।२६-३०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्महितं चिकीर्षता सर्वेण सर्वं सर्वदा स्मृतिमास्थाय सद्वृत्तमनुष्ठेयम्—काले हितमितमधुरार्थवादी, वश्यात्मा, धर्मात्मा, हेतावीर्षुः, फले नेर्षुः, महोत्साहः, दक्षः, विनयबुद्धिविद्याविभजनवयोवृद्धसिद्धाचार्याणामुपासिता, सर्वप्राणिषु बन्धुभूतः स्यात् । परपरुषवचनसहिष्णुः प्रशमगुणदर्शी च स्यात् ।[1]

× × ×

विद्या वितर्को विज्ञानं स्मृतिस्तत्परता क्रिया ।
यस्यैते षड्गुणास्तस्य न साध्यमतिवर्तते ॥[2]

× × ×

न रागान्नाप्यविज्ञानादाहारमुपयोजयेत् ।
परीक्ष्य हितमश्नीयात् देहो ह्याहारसंभवः ॥[3]

× × ×

साहसं वर्जयेत् कर्म रक्षन् जीवितमात्मनः ।
जीवन् हि पुरुषस्त्विष्टं कर्मणः फलमश्नुते ॥[4]
सर्वमन्यत् परित्यज्य शरीरमनुपालयेत् ।
तदभावे हि भावानां सर्वाभावः शरीरिणाम् ॥[5]
आहारस्य परं धाम शुक्रं तद्रक्ष्यमात्मनः ।
क्षयो ह्यस्य बहून् रोगान् मरणं वा नियच्छति ॥[6]
हिताशी स्यान्मिताशी स्यात् कालभोजी जितेन्द्रियः ।
पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात् ॥[7]

× × ×

धर्म्याः क्रिया हर्षनिमित्तमुक्तास्ततोऽन्यथा शोकवशं नयन्ति ।
शरीरसत्त्वप्रभवास्तु रोगास्तयोरवृत्त्या न भवन्ति भूयः ॥[8]

---

१. चरक० सूत्र० ८।१७–१८।
२. चरक० सूत्र० ९।२१।
३. चरक० सूत्र० २९।५५।
४. च० नि० ६।६।
५. च० नि० ६।८।
६. च० नि० ६।११।
७. च० चि० ६।१३।
८. च० शा० २।४१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्याश्रये वा द्विविधे यथोक्ते पूर्वं गदेभ्यः प्रतिकर्म नित्यम् ।
जितेन्द्रियं नानुतपन्ति रोगास्तत्कालयुक्तं यदि नास्ति दैवम् ॥[1]
हैमन्तिकं दोषचयं वसन्ते प्रवाहयन् ग्रैष्मजमभ्रकाले ।
घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगानृतुजान्न जातु ॥
नरो हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः ।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः ॥
मतिर्वचः कर्म सुखानुबन्धं सत्त्वं विधेयं विशदा च बुद्धिः ।
ज्ञानं तपस्तत्परता च योगे यस्यास्ति तं नानुतपन्ति रोगाः ॥[2]

"कृत्स्नो हि लोको बुद्धिमतामाचार्यः, शत्रुश्चाबुद्धिमताम् । अतश्चाभिसमीक्ष्य बुद्धिमताऽमित्रस्यापि धन्यं यशस्यमायुष्यं पौष्टिकं लौक्यमभ्युपदिशतो वचः श्रोतव्यमनुविधातव्यं चेति" ।[3] इति शम् ॥

---

१. च० शा० २।४३।
२. च० शा० २।४५–४७।
३. चरक० विमा० ८।१४।

सूर्यनमस्कारो व्यायामः

डॉ० नरेशझाः, विद्यावारिधिः (पी-एच्० डी०), वाचस्पतिः (डी० लिट्०)

रानीचन्द्रावतीश्यामाविद्यालयः, वाराणसी

वैज्ञानिकेऽस्मिन् युगे मानवाः सर्वत्र विज्ञानसरणिमेवाधिकृत्य किमपि वक्तुं कर्त्तुं वा पारयन्ति। यन्त्रादिनिर्माणे तु विज्ञानस्यापेक्षा भवत्येव, परं शास्त्रसम्पादनेऽपि वैज्ञानिकी पद्धतिः प्रचलिता। सा पद्धतिरनिर्वचनीया नहि केवलं मूलतत्त्वमादाय परस्परविश्लेषण-प्राचीनानुसन्धानादर्शस्थापनालोडनपूर्विका प्राचीनैव। अत आलोच्यविषयस्थापनायादौ तत्स्वरूपं निरूप्यते।

सूर्यस्वरूपम्

योऽयमारोग्यदायकस्सूर्यः, यमभिलक्ष्यैष सूर्यनमस्कारः प्रचलितः, तस्य प्राचीनग्रन्थेषु कीदृक् स्वरूपमिति विचिकित्सायां तावत् प्रस्तूयते समाधानम्। सूर्यो भारतवर्षस्य प्रत्यक्षं परमाराध्यो देवः। अत्र सूर्योपासनायाः सूर्यव्रतस्य च परम्परातिप्राचीनकालात् प्रचलति। हिन्दुसमाजस्य धार्मिका जनाः स्वश्रद्धाशक्त्योरनुसारेणाराधनया नमनेन पूजनेन स्तवनेन च सूर्यं प्रसादयन्ति। अपि च नैरुज्यस्य स्वास्थ्यस्य शक्तेः साहसस्योत्साहस्य, पराक्रमस्य दीर्घ-जीवनस्य च प्राप्तिमभिलक्ष्य जपतपोव्रतादिभिस्तस्य प्रीतिं सम्पादयन्ति।[1] इत्येवं बहुर्चचितस्य सूर्यस्य संक्षेपेण माहात्म्यमस्ति। वस्तुतस्तु तत्स्वरूपञ्च यथा—

भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचा रञ्जितश्चारुकेशो
भास्वान्यो दिव्यतेजाः करकमलयुतः स्वर्णवर्णप्रभाभिः॥
विश्वाकाशावकाशो ग्रहगणसहितो भाति यश्चोदयाद्रौ
सर्वानन्दप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः[2]॥

अत्र 'विश्वाकाशावकाशः' 'सर्वानन्दप्रदाता' 'विश्वचक्षुः' इत्यादिभिश्शब्दैः सूर्यस्य विश्व-व्यापकत्वं सिद्धयति, किमुत भारतवर्षस्यैव येन केनापि विधिना सूर्योपासना संसारस्य प्रतिकोणं प्रतिसंस्कृति भवति, यतो हि सूर्यः सर्वानन्दप्रदाता वर्तते, न पुनः केवलमेकस्मिन्नेव समाजे।

सूर्यविज्ञानम्

'कल्याण' मासिकपत्रिकाया योगाङ्के 'पद्मविभूषणविभूषितानां म०म० डॉ० गोपीनाथ-कविराजमहाभागानां सूर्यविज्ञानमधिकृत्यैको निबन्धः प्रकाशितोऽस्ति। सूर्यविज्ञानविज्ञानहेतवे स एव द्रष्टव्यः। अत्र तु संक्षेपेणैव तेषामुपस्थापनमुपस्थाप्यते। रश्मीन् शुद्धरूपेण विज्ञाय तेषां योजनाविधानमेव सूर्यविज्ञानस्य प्रतिपाद्यो विषयः।

---

१. श्रीसत्यनारायणशस्त्र्य अभिनन्दनग्रन्थः, पृ० १३७।

२. शाक्तसूर्यतन्त्रम्, श्लो० १।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूर्योपनिषदि सूर्यतत्त्वं यथा—

सूर्याद् भवन्ति भूतानि सूर्येण पालितानि तु ।
सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च ॥[१]

अपि च ज्यौतिषे सूर्यसिद्धान्ते—

आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते ।
परं ज्योतिः तमःपारे सूर्योऽयं सवितेति च ॥[२]

सर्वेभ्यः प्रथममभिव्यक्तत्वात् 'आदित्य' इति नाम्नोच्यते । सर्वेषां प्रसवस्थानत्वाच्च 'सूर्य' इति कथ्यते । तमसोऽन्धकारस्य विरामे वर्तमानत्वात् सवितेति । तथैव वृहद्योगियाज्ञवल्क्येऽपि—

सविता सर्वभावानां सर्वभावांश्च सूयते ।
सवनात् प्रेरणाच्चैव सविता तेन चोच्यते ॥[३]

किञ्चाग्नीषोमौ सूर्यादभिन्नौ । श्रुतिरपि प्रमाणमत्र । यथा वा—

"उद्यन्तं वादित्यमग्निरनुसमारोहति सुषुम्नः सूर्यरश्मिः चन्द्रमा गन्धर्वः" ।[४]

उपर्युक्तं मतं कूर्मपुराणमपि पुष्णाति । तद्यथा—

एषा सूर्यस्य वीर्येण सोमस्याप्यायिता तनुः ।
पौर्णमास्यां स दृश्येत सम्पूर्णो दिवसक्रमात् ॥[५]

एतदेव हि नहि, शरीरिणां जीवनरक्षणाय यदन्नं तदपि सूर्यप्रसादादेव । उक्तञ्च ब्रह्मपुराणे—

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥[६]

अत एव 'अन्नः[७]' सूर्यस्य संज्ञा सञ्जाता ।

अथर्ववेदे सूर्यः 'रुचिरसि' (दीप्तिरूपमसि) इति प्रतिपादितः ।[८] आभायुक्तोऽयं सूर्यो विभिन्नर्तुषु विविधस्वरूपो भवति । यथोक्तं ब्रह्मपुराणे—

---

१. पृ० ४०२, (सर्वहितैषी कं० प्रका० प्र० सं० १९३८ ई०) ।

२. सूर्यसिद्धान्तभूगोलाध्यायः (१२) १५ ।

३. वृहद्योगियाज्ञवल्क्यः ९।५५, पूञ् प्राणिप्रसवे इत्यस्य धातोरेतद् रूपम् । सुनोति=उत्पादयति चराचरं जगत् स सविता । पु प्रसवैश्वर्ययोस्सर्ववस्तूनां प्रसवः प्रसवस्थानं सर्वैश्वर्याणि च ।

४. कल्याण—योगाङ्कः पृ० ७५५ ।

५. कूर्म० ४३।३६ ।

६. ब्रह्म० ३१।४४ ।

७. संस्कृत-हिन्दी-कोशः (आप्टे) पृ० ५० ।

८. अथर्व० १७।१।१ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसन्निभः ।
श्वेतो वर्षासु वर्णेन पाण्डुः शरदि भास्करः ॥
हेमन्ते ताम्रवर्णाभः शिशिरे लोहितो रविः ।
इति वर्णाः समाख्याताः सूर्यस्य ऋतुसम्भवाः ॥[१]

अत एव वायुपुराणे भाद्रपदमासीयस्सूर्यः 'तिग्मतेजा विभावसुः' इति कथितः । उक्तञ्च तत्र—

मासि भाद्रपदे देवि तिग्मतेजा विभावसुः ।
सप्तम्यां कृष्णपक्षस्य रविस्तिष्ठति सर्वदा ॥
तस्मिन्नहनि यः स्नानं कुर्यात् कुण्डे समाहितः ।
न तस्य दुर्ल्लभं लोके सर्वदाता दिवाकरः ॥
आदित्येऽह्नि सम्प्राप्ते सप्तम्यां तु वसुन्धरे ।
नरो वाप्यथवा नारी प्राप्नोत्यविकलं फलम् ॥[२]

अत्र 'सर्वदाता' इति पदेन दिवाकरो व्यवहृतः । नूनं बलवृद्धिस्वास्थ्यारोग्यप्रदायकोऽयमादित्यः । वर्तमानकालेऽपि सप्ताहान्तिमदिवसो रविरेव भवतीत्यत्रैतदेव कारणमिति । पाश्चात्यानामवकाशपद्धतिरपि तन्मूलिकैवेति । यत्तु बौधायनधर्मसूत्रे "उद्यन्तमस्तं यान्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते[३]" इति, तत्तूपर्युक्तस्य 'सर्वदाता दिवाकरः' इत्यस्य मूलमेवास्ति । अत्र ब्राह्मणग्रहणम् ऋणश्रुतिवत् । वस्तुतस्तु वेदाधिकारिण एव सूर्योपस्थानादिकं कुर्वन्ति ।

महामहिमशालिनमेनमेवाभिलक्ष्य सूर्यनमस्कारो व्यायामः प्रचलितः । अद्यत्वे सूर्यनमस्कारस्तु बहूनां प्रात्यहिकमनिवार्यं कर्म संवृत्तमस्ति । व्यायामेनानेन स्वास्थ्यस्य, शक्तेः, अनारोग्यस्य च लाभो भवति । कथनस्याभिप्रायोऽयं यद् भारतीयजीवने सूर्योपासनाया विशिष्टं स्थानमस्ति, तदपि सृष्टेरादिकालादेव । एतदेव कारणं येन भारतस्य वेदेषु पुराणेष्वन्येषु प्राचीनसाहित्येषु च सूर्यमहिम्नः पूर्णं विस्तृतञ्च विवेचनमस्ति ।[४] किञ्च, बौद्ध जैनागम-साहित्येष्वपि भूयसी चर्चाऽस्ति । ईशामशीह-मोहम्मदादिप्रवर्तितविदेशीयधर्मावलम्बिनोऽपि सूर्यं जगद्वन्द्यत्वेनामनन्ति । कोऽपि धर्मो भवेच्छरीररक्षा तु सर्वत्र सर्वदाऽऽवश्यकी । अतः सूर्यो न हिन्दूनाम्, न केवलं विश्वमानवानाम्, किमुत स्थावर-जङ्गमजीवानामप्युद्बोधकः परिवर्धकस्सञ्जीवनीशक्तिप्रदायकश्चास्ति ।

सूर्यस्य वैशिष्ट्यं व्यापकत्वञ्च

प्राचीनार्षमूलकग्रन्थेषु सर्वत्र भुवनभास्करस्य भगवतस्सूर्यस्य आरोग्यदातृत्वेन चर्चा अस्ति । उक्तञ्च काठकोपनिषदि—

---

१. ब्रह्म० ३१।१२-१३ ।
२. वायु० १५७।४५-४७ (मलयार्जुनादितीर्थप्रशंसायाम्) ।
३. बौधायन० २।४।१५५ ।
४. श्रीसत्य०-अभि०, पृ० १३८ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"सूर्यो यथा सर्वलोकस्य चक्षुः[१] ।"

एतन्मूलकारणं खलु शरीरेण सह सूर्यस्य साक्षात् सम्बन्धः । सृष्टिक्रमविस्तारे जीवानां जीवनरक्षणाय वायोरनन्तरं सूर्यस्यैव प्राथम्यं वर्तते । तद्यथा गोपथब्राह्मणे—

"स खलु पृथिव्या एवाग्निं निरमिमतान्तरिक्षाद्वायुन्दिव आदित्यम्[२]" ।

तत्रैवादित्यस्य महनीयतां प्रदर्शयन् कथितमस्ति यत्—

"वायोर्यजुर्वेदमादित्यात् सामवेदमिति[३]" ।

तथा च सूर्योपनिषदि—"आदित्याद् वायुर्जायते" ।

अतः सूर्येऽमृतत्वप्रदानशक्तिर्विद्यते, नास्त्यत्र सन्देहः । अत्रामृतत्वपदेन कदापि मृत्युर्न भवेदिति न तात्पर्यम्, किन्त्वसमये मृत्युर्न भवेदित्येवाशयः । अथर्ववेदे एका प्रार्थनाऽस्ति यत्—

विवस्वान् नो अमृतत्वे दधातु परैतु मृत्युरमृतं न ऐतु ।
इमान् रक्षतु पुरुषानाजरिम्णो मोष्वेषामसवो यमं गुः ॥[४]

अर्थात्—सूयोऽस्मभ्योऽमृतत्वं ददातु, मृत्युः परावृत्य गच्छेत् । अमृतत्वञ्च वृद्धावस्था-पर्यन्तमिमान् पुत्र-पौत्रान् रक्षतु । तेषां मध्ये न कोऽपि यमालयं गच्छेत् ।

अस्यायमाशयो यत् सूर्यसेवनेन दीर्घजीवनप्राप्तिर्भवति । अपि च तत्रैव शारीरिकबल-प्राप्तिकामनया कामयते यत् प्रजापतिरूपसूर्यस्य दृढतेजोमयकवचेनावृतोऽस्मि । जरदष्टिरप्यहं दृढाङ्गो रोगरहितश्च भवेयम् । एवञ्च शारीरिकबलैर्युक्तोऽहं प्रजोत्पत्तौ समर्थः स्याम् । तथा च दीर्घायुष्ं लब्ध्वा लौकिक–वैदिककार्याणि सम्पादयन् सूर्यस्य कृपाभाजनं स्याम् ।

यथा—

प्रजापतेरावृतो ब्रह्मणा वर्मणाहं कश्यपस्य ज्योतिषा वर्चसा च ।
जरदष्टिः कृतवीर्यो विहायाः सहस्रायुः सुकृतश्चरेयम् ।[५]

न केवलमित्येव, रोगविमुक्तिहेतवेऽपि वैदिककाले सूर्यः प्रार्थ्यते स्म । यथा—

मुञ्च शीर्षक्त्या उत कास एनं परुष्परुराविवेशा यो अस्य ।
यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीनस च तां पर्वताश्च ॥
शं मे परस्मै गात्राय शमस्त्ववराय मे ।
शं मे चतुर्भ्यो अङ्गेभ्यः शमस्तु तन्वे मम ॥[६]

---

१. काठकोपनिषद् २।२।११।
२. गो० ब्रा०, प्र० प्र०, पृ० ३, ।
३. तत्रैव ।
४. अथर्व० १८।३।३।
५. तत्रैव १७।१।१।
६. तत्रैव १।३।१२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तात्पर्यर्थश्चात्र—

हे सूर्य ! अन्तःप्रविष्टैः शिरोवेदना-श्लेष्म-कासादिरोगैरेनं विमुञ्च। त्वत्कृपया च वर्षाकालोद्भवः श्लेष्मरोगः, वायुजन्यो वातरोगः, पित्तविकृत्योत्पन्ना ज्वरादयो नश्यन्तु। एते रोगा वन-वृक्ष-निर्जनपर्वतेषु गच्छन्तु। तथा च ममाङ्गेषु व्याप्तरोगा नश्यन्तु। येन रोगमुक्तः शरीरी सुखी स्यात्। अनेनैव प्रकारेण धर्मसूत्रेषु पुराणेष्वप्यारोग्यप्राप्तिहेतोः सूर्यस्य वर्णनमुपलभ्यते, तथा च गौतमधर्मसूत्रे—

रेतः स्कन्दने भये रोगे स्वप्नेऽग्नीन्धनभैक्षचरणानि सप्तरात्रमकृत्वाऽऽज्यहोमः समिधो वा रेतस्याभ्याम्।[1] गौतमीयमभ्यासविषयं तु—

भये रोगे तथा स्वप्ने सिक्त्वा शुक्रमकामतः।
आदित्यमर्चयित्वा तु पुनर्मामृत्यृचं जपेत्॥

मत्स्यपुराणे चोक्तम्—सप्तमीव्रतकथनप्रसङ्गे—

आरोग्यं भास्करादिच्छेद् धनमिच्छेद्धुताशनात्।
ईश्वराज्ज्ञानमिच्छेच्च मोक्षमिच्छेज्जनार्दनात्॥[2]

अपि च पद्मपुराणे यथा—

आरोग्यकामोऽथ रविं धनकामो हुताशनम्।[3]

तथैव स्कन्दपुराणे चोक्तम्—

आरोग्यं भास्करादिच्छेदिति सञ्चित्य चेतसि।[4]

इत्येवम्विधैः प्रचारैस्तदारोग्यप्रदो भास्करदेशोऽपि सञ्जातः। तथा च पद्मपुराणे यथा—

आरोग्यं भास्करे देशे महाकाले महेश्वरम्।[5]

एवञ्च साम्बपुराणे एष उल्लेखो वर्तते यत् स्वयं सूर्येण रुजाक्रान्तः कृशः साम्बः शिक्षितो यत्त्वम् एकविंशतिनामभिमंम स्तुतिङ्कुरु। स्तवराजेनानेन सूर्यं स्तुत्वा साम्बो नीरुजः सञ्जातः। स्तवराजोऽयं विशेषेण शरीरारोग्यदायकः प्रोक्तः।

तथा च रामायणकाले आयुर्वर्द्धनार्थं चिन्ताशोकप्रशमनार्थञ्चादित्योपासना प्रथिताऽऽसीत्।[6] रामरावणयोर्युद्धे आदित्योपासनाबलेन महापुरुषेण रामचन्द्रेणाजेयो रावणो हतस्तत्र विजयश्च प्राप्तः। अत्र महर्षिणागस्त्येन श्रीरामः सर्वशत्रुविजयहेतव आदित्यहृदयस्तोत्र-शिक्षया शिक्षितः।

---

१. गौतम० ३।५।२०।
२. मत्स्य० ६७।४१।
३. पद्म० स्वर्ग० ५७।३९।
४. स्कन्द० रेवा० १५३।२३।
५. पद्म० उत्तर० १३२।२१।
६. वाल्मीकीय० ६।१०५।५–७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महाभारतेऽपि सूर्योपासनाया उल्लेखो वर्तते । पौर्वाह्णिकीं नित्यक्रियां सम्पाद्य श्रीकृष्णः सूर्योपासनां करोति स्म । एतस्योल्लेख उद्योगपर्वणि 'उपतस्थे विवस्वन्तम्'[1] इति रूपेण वर्तते । अपि च शरशय्याशायिना भीष्मेणापि सूर्योपासना विहिता । यथा—

"उपसिष्ये विवस्वन्तमेवं शरशतार्चितः ।"

इत्यादिभिर्ज्ञायते यद् भीषणे महाभारतयुद्धे श्रीकृष्ण-भीष्मादयो महारथिनः सूर्योपासनया नमस्कारशिक्षया च दुर्द्धर्षं कार्यमकुर्वन् ।

बौद्धकालिकजातकसाहित्ये नराणां का कथा वानराणामपि हृदये सूर्योपासना जागृता । कपिरपि तपस्वीव सदाचरणशीलः तपस्विभ्यः कियति दूरे एव सूर्यनमस्कारं कुर्वन्नतिष्ठत ।

उक्तञ्च—

सब्बेसु किर भूतेसु सन्ति सील समाहिता ।

पस्स साखामिगं जम्यं आदिच्चमुपतिट्ठति ॥[2]

प्राचीनभारतीयाभिलेखेष्वपि[3] सूर्योपासनाया बाहुल्येन चर्चाऽस्ति । इतिहासविदां विदुषां धारणाऽस्ति यत्प्राचीनभारताङ्गीभूतादीरानदेशात् सूर्यमतस्य प्रसारोऽभवत् । खिस्ताब्देः प्रारम्भत एव सूर्यपूजाया लोकप्रियताऽवर्द्धता अतः 'कनिष्केन' मित्रस्या(सूर्यस्य)कृतिं मुद्रास्वङ्किताः । तथा च 'मीरो' (मिहिरः सूर्यः) शिलालेखाङ्कनं कारितम् । गुप्तयुगे विष्णोः शिवस्य चानन्तरं सूर्योपासनाया एव स्थानमासीत् । गुहाभिलेखेषु सूर्यपूजाया अनेकस्थलेषूल्लेखो मिलति ।

प्रथमकुमारगुप्तस्य मन्दसोरस्थशिलालेखे भगवतो भास्करस्य स्तुतिः ललितकाव्यमय्यां भाषायां वर्णनमुपलभ्यते । तच्च यथा—

हेतुर्यो जगतः क्षयाभ्युदयदो पायात् स वो भास्करः ।

× × ×

भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रे नमः ।

अपि च—

पायात् स वः सुकिरणाभरणो विवस्वान् ।

अस्य शिलालेखस्याध्ययनेनेदमपि ज्ञायते यत् प्रथमकुमारगुप्तस्य प्रान्तपतेर्बन्धुवर्मणस्समये तन्तुवायैस्सूर्यमन्दिरसंस्कारः कारितः । उक्तञ्च तत्र—

श्रेण्यापदेशेन भक्त्या च कारितं भवनं रवेः ।

(मन्दसोरमालवाप्रशस्तौ)

---

१. महाभा०, उद्योग० ८३।९ ।
२. तत्रैव भीष्म० १२०।५४ ।
३. १७५—आदिच्चुपट्ठानजातकम् ।
४. भार० अभि० अ० ७, पृ० १३४ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्राजः स्कन्दगुप्तस्य इन्दौरलेखे भगवतस्सूर्यस्य प्रार्थना चमत्कारातिशयैः शब्दैः प्रारभ्यते ।

पायाद्वः स जगत्पिधानपुटभिद्रश्म्याकरो भास्करः ।

अस्मिञ्छिलालेखे वर्णनमस्ति यदन्तरवेदे द्वाभ्यां क्षत्रियाभ्यां सूर्यपूजानिमित्तं मन्दिरं निर्मापितम् ।

उत्कलस्य कोणार्कमन्दिरं प्रमाणयति यत् पूर्वंभारतेऽपि सूर्यपूजायाः प्रसार आसीदिति । सूर्यप्रतिमायाः पृष्ठभागे उत्कीर्णौ लेखौ प्राप्येते ।

सूर्यः समस्त रोगानां (णां) हर्त्ता विश्वप्रकाशकः ।[1]

उपर्युक्तैः शिलालेखविवरणैर्ज्ञायते यद्रोगनिवारणार्थं सूर्यस्यावाहनं क्रियते स्म ।

प्राचीनवृज्जि (वज्जी) राजधान्या वैशाल्याः प्राप्तध्वंसावशेषसामग्रयाम् ईदृश्यो मुद्राः सम्प्राप्ता यासामुपरिभागेऽग्निकुण्डचित्रं मिलत्यधोभागे च 'भगवतो आदित्यस्य' इत्यङ्कितमस्ति ।

किम्बहुनोक्तेन बाणभट्टसामयिकेन सप्तमशताब्दयाः पूर्वार्धे वर्तमानेन 'मयूर' नाम्ना कविना स्वकुष्ठप्रशमनार्थं 'सूर्यशतकम्' निर्मितम् । सूर्यशतकनिर्माणेन श्वित्रान्मुक्तिः सञ्जाता ।

सूर्यशतकस्य कतिपयपद्येषु विलोकयन्तु निभालयन्तु च सूर्यगरिमाणम्—

क—'भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः' ।१।

ख—'कल्याणं वः क्रियासु किसलयरुचयस्ते करा भास्करस्य' ।२।

ग—'कल्पन्तां निर्विकल्पं दिनकरकिरणाः केतवः कल्मषस्य' ।१०।

घ—'त्रायन्तां तीव्रभानोर्दिवसमुखसुखा रश्मयः कल्मषाद्वः' ।११।

ङ—'सवितुरघनुदे स्तात् प्रभातप्रभा वः' ।२७।

च—'सेवते पृष्ठतोऽर्कम्' ।५२।

विशेषफलश्रुतिर्यथा—

आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुतमपि लभते सोऽत्र सूर्यप्रसादात् ।।१०१।।

सूर्यकिरणानां महत्त्वम्

सूर्यतन्त्रे सूर्यसहस्रनामावल्यां सहस्रपात्-सहस्राक्ष-सहस्ररश्मि-सहस्रांशु-सहस्रकर-सहस्रकिरण-सहस्राच्च्यादयः शब्दा उपलभ्यन्ते । एतैश्शब्दैः सूर्यस्य सहस्रकिरणत्वं सिद्धम् । अथर्ववेदे एष उल्लेखो वर्तते यत् सूर्ये सप्तकिरणा वीर्यरूपेण तिष्ठन्ति । ते कर्मणामुत्पत्तिरूपेण वृष्टिकाले जगति प्रसरन्ति ।[2] सामवेदस्यैकस्मिन् मन्त्रे[3] इन्द्रं सम्बोध्य कथितमस्ति यत् सूर्यः स्वकिरणैर्यथान्तरिक्षे व्याप्नोति तथैव त्वामपि सोमपानेन शक्तिप्राप्तिर्भवेदिति ।

---

१. तत्रैव अ० ७, पृ० १३५ ।

२. अथर्ववेद ९।५।१०।१७।

३. साम० उत्तरा० प० अ० ७ म, मं० १ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मैत्रायण्युपनिषदि सहस्ररश्मि सूर्यम् 'प्रजानां प्राणः' इत्येवं व्याख्यातम् । यथा—

सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ।[1]

प्रश्नोपनिषद्यपि—

'आदित्यो ह वै प्राणः' ।[2]

तथैव सूर्यकिरणवैशिष्ट्यं महाभारतेऽपि प्रतिपादितं यत् —

'रश्मिभिस्तापितोऽर्कस्य सर्वपापमपोहति ।[3]

अत्र 'पापम्' इति पदेन दुःखदारिद्र्यादेर्ग्रहणम् । दुःखदारिद्र्यञ्च रोगमूलकम्; इति प्राचीन-लक्ष्यमभिलक्ष्याधुनापि चिकित्सकाः सूर्यकिरणैश्चिकित्सां कुर्वन्ति । सूर्यकिरणैर्या चिकित्सा क्रियते तां 'सौरचिकित्सा' इति कथयन्ति चिकित्सकाः । कृमयो ये वेदेषु, विशेषत आयुर्वेदे रक्षः-राक्षस-निशाचर-यातुधानादिशब्दैः परिगणितम्, ते सूर्यकिरणैर्नश्यन्ति । अत्र वेदः प्रमाणम् । यथा—

उद्यन्नादित्यः कृमीन् हन्ति ।

इत्येव नहि अतोऽप्यधिकरूपेण विवेचनमस्ति—

न सूर्यस्य संदृशे मा युयोथाः[4] । सूर्य आत्मा जगतस्तस्थुषश्च ।[5]

अर्थात्—सूर्यप्रकाशैः (किरणैः) नास्माकं कदापि वियोगो भवेत् । सूर्यो हि स्थावरजङ्गमानामात्मा ।

उपर्युक्तैः प्रमाणैः निर्विवादं सिद्ध्यति यत् सूर्यकिरणानां जीवने व्यापकरूपेण महत्त्वं वर्तते । महत्त्वमभिलक्ष्यैव प्राचीने भारते गृहद्वारनिर्माणकाले पूर्वोत्तरदिशोरेव प्राथम्यं स्वीक्रियते स्म, येन सूर्यरश्मिः पूर्णरूपेण गृहे प्रविशेदिति । तथा चात्र चरके प्रमाणम्—

प्राङ्मुखमुदङ्मुखं वाऽभिमुखतीर्थं कूटागारं कारयेत् ।[6]

अपि च—

प्राग्द्वारमुदग्द्वारं वा सूतिकागारं कारयेत् ।[7]

इत्थं सूर्यरश्मिभिर्गृहाभ्यन्तरदूषितवायोरेव शुद्धिर्भवति स्मेत्येव नहि, बाह्यशुद्धिविषये यजुर्वेदे वर्णनमस्ति यत्रायुधानां शुद्धिस्सूर्यकिरणैर्भवति । यथा—

सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥[8]

एवं हि सूर्यरश्मिरस्माकं बाह्याभ्यन्तरशुद्धिं विधाय जीवनदायिनीं शक्तिं विदधाति ।

---

१. मैत्रा० प० प्र० ।
२. प्रश्नो० १।५ ।
३. महा० अनु० १२५।५६ ।
४. ऋग्वे० २।३३।१ ।
५. तत्रैव १।११५।१ ।
६. चरक० १४।४६ ।
७. तत्रैव ८।३३ ।
८. यजुर्वेदः १।३१ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आदित्यरहस्यविषये पाश्चात्त्यार्वाचीनविदुषां विचारः

शर्मण्य(जर्मन)देशीयेन स्वतन्त्रविचारकेण तर्कवादिना शास्त्रज्ञेन च श्रीमता 'अर्न्स्ट हेकेल' महोदयेन स्वविरचिते 'दि रिड्ल आफ दी युनिवर्स' ग्रन्थे पञ्चदशे पाठे प्रतिपादितं यत् 'सूर्यः प्रकाशस्योष्णतायाश्च देवता' इति। 'सूर्यशक्तावखिलजीवधारिणोऽवलम्बितास्सन्ति। समस्तास्तिकवादेश्वरवादयोरपेक्षया सूर्योपासना (Salarism or Heilothism) श्रेष्ठेत्यर्वाचीनविदुषां मतमस्ति ।[1]

'फिजिकल कल्चर' (अमेरिका) मासिक्याः पत्रिकायाः जुलाई सन् १९२६ तम ईशवीयेऽङ्के डॉ० गार्डनररोनीमहोदयाः लिखन्ति यत्, 'वस्त्ररहितो भूत्वाऽऽतपे तिष्ठ'। सूर्यो वैद्यानामोषधीनाञ्च राजा। अस्मिन् विषये विदुषां मतमस्ति यत्सूर्य आरोग्यस्य शरीरस्वास्थ्यस्य च मूलं स्थानमस्ति। सूर्यकिरणशास्त्रस्य निष्णाता विद्वांसः डॉ० हेस् महाशयाः कथयन्ति—सूर्यकिरणाः सम्पूर्णानामन्नानां मूलमस्ति। सूर्यकिरणसदृशमुत्तेजकं पौष्टिकं रोगनिवारकञ्च द्रव्यमन्यत् किञ्चिन्नास्ति। स्विट्जरलैण्डे 'स्कूल इन् दी सन्' (School in the Sun) नाम्नी संस्थाऽस्ति। अस्याः संस्थायास्संस्थापकाः 'डॉ० रोलिअर' महोदयाः सूर्यचिकित्साप्रवर्तकास्सन्ति। सर्वप्रथमं (आदौ) तैरेवान्विष्य प्रकटीकृतं यद्वनस्पतीनां वृद्ध्यर्थं पुष्ट्यर्थञ्च यथा सूर्यप्रकाशस्यावश्यकताऽस्ति, मनुष्याणां विशेषतो लघुबालकानां वृद्ध्यै पुष्ट्यै च सूर्यप्रकाशस्य तथैवावश्यकता वरीवर्ति।

डॉ० रोलिअर महोदयास्ततोऽग्रे कथयन्ति यत् 'विद्यालयकार्यक्रमे क्रीडाऽऽदिव्यायामवत् 'सूर्य स्नानम्' (Sun—bothing) अर्थादातपसेवनभ्रमणे अवश्यमेव योजयितव्ये।

डॉ० वेलफ्रेजेन 'What's Best to Eat' नामके पुस्तके लिखितं यत् 'सम्पूर्णसंसारव्यापिनी विद्युच्छक्तिरस्यां पृथिव्यामस्माभिः सूर्यप्रकाशरूपा औष्ण्यरूपा च सती लभ्यते।

डॉ० ई० सी० ग्रे, एम० डी० कथयति यत्—आरोग्यदायकसूर्यप्रकाशोपचारपद्धत्या बालकानामङ्गप्रत्यङ्गेषु शक्तिरायाति तेषां रोगप्रतिबन्धकशक्तिश्च वर्द्धते।

डॉ० एच्० सी० मेकलमते च—सूर्यकोमलकिरणेषु 'डी' जीवनद्रव्यं तिष्ठति।[2]

सूर्यनमस्कारव्यायामस्योपयोगिता

व्यायामविशारदानां कथनमस्ति यत् कोऽपि साधारणो व्यायामः शरीरसर्वाङ्गेषु प्रभावोत्पादको न भवति। विशेषतो बाह्यावयवानां दृढीकरणाय विभिन्ना व्यायामास्सन्ति किन्त्वेतादृशा व्यायामा भवेयुर्येनाबालवृद्धानां स्त्रीपुरुषाणाम्, निर्धनानां धनवताञ्च सर्वेषामन्तरिन्द्रियाण्यन्तस्स्नायवश्च बाह्यावयवेभ्योऽपि सामर्थ्यवन्तो निरामयाश्च भूत्वा ओजो जीवनशक्ति बलसञ्चयञ्च शरीरे कुर्युः।

---

१. सूर्यनमस्कारः पृ० ४८।
२. तत्रैव पृ० ४९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शरीरस्य कतिपयान्यङ्गान्येतादृशानि सूक्ष्माणि महत्त्वपूर्णानि च सन्ति येषु कस्यचिदपि व्यायामस्य प्रभावो न भवत्यनेन कारणेन च तान्यङ्गानि सुप्तान्यालस्ययुक्तानि च तिष्ठन्ति । तेषां सुप्ताङ्गानां जागरणायैव प्राणायामानां बीजमन्त्रोच्चारणस्य चावश्यकता भवति ।

सूर्यनमस्कारव्यायामे द्वाविमौ गुणौ विशेषेण तिष्ठतः । याभ्यामस्मच्छरीरस्य तानि सुप्ताङ्गानि जागरूकाणि दीर्घायुःप्राप्त्यर्थं भवन्ति, शरीरे च महाशक्तिरुत्पद्यते । अत एव स्वास्थ्यस्य सामर्थ्यस्य सर्वोत्तमं सुलभं साधनमस्ति सूर्यनमस्कारो व्यायामः ।

अनेन व्यायामेनोदरान्त्रविकाराः, मस्तिष्कविकृतयः, हृद्दौर्बल्यम्, फुफ्फुस-मेरुदण्डविकाराश्च नश्यन्ति । मेरुदण्डमस्तिष्के इमे द्वे स्वास्थ्यस्य शक्तेश्चागारे स्तः । सूर्यनमस्कारव्यायामेनोभयो-विकारा नश्यन्ति । अपि चानेन व्यायामेन शरीरदाढर्यमुदरान्त्रविकारसम्भूता मलावरोधामवा-तार्शो बहुमूत्रादयो रोगा न भवन्ति । हृत्फुफ्फुसदाढर्यात् कास-श्वास-क्षयादिभयङ्कररोगाः निर्मूलं विनश्यन्ति । मेरुदण्डविकारापसरणे सति पक्षाघाताङ्गवृद्धयामयेभ्यो मुक्तिर्लभ्यते । सूर्यनमस्कारव्यायामप्रयुक्ताः 'ॐ ह्रां' इत्यादयश्शब्दा दीर्घोच्चारणैश्शरीरपुष्टिकराः सशक्तकर्त्ता-रश्च भवन्ति । तत्र 'ॐ' इत्युच्चारणेन मस्तिष्कहृदन्नाशयानां सञ्चालनं भवति, तेन ते बल-वन्तो भवन्ति । 'ह्रां' इत्युच्चारणेन च मस्तिष्कहृत्पचनेन्द्रियाणि, श्वासनलिका, कण्ठः, फुफ्फुस, ऊपरिवाहिन्यो नाड्यश्च सशक्ता भवन्ति ।

सा चेत्थम्—

अवस्थानानासनेन ग्रीवायाम्, उरसि, हस्ताङ्गुलीषु, बाह्वोः, उदरे, कट्याम्, पादयो-श्चाकर्षविकर्षाभ्यां शक्तिर्वर्द्धते ।

जानुस्पर्शेन च—हस्ततले, हस्ताङ्गुल्यः, पिंडे ऊर्वोश्च पृष्ठभागस्थस्नायवः, उदरनितम्ब-पीठानां स्नायवः, नाभिपार्श्वगतानि तन्तुजालानि उत्तेजितानि भवन्ति, तेषां शक्तयश्च वर्द्धन्ते ।

अतो व्यायामोऽयं सर्वैः स्वशक्त्यनुसारेण निषेवणीयः । व्यायामसमाप्तौ क्षणं विश्रामो विधेय इति ।

सूर्यनमस्कारव्यायामविकासक्रमः—

अत्र तावत् सूर्यनमस्कारस्यैतिहासिकं विकासक्रममेव व्याख्यास्यामः । योऽयं सूर्यनमस्कार-व्यायामोऽधुना बहु प्रचलितोऽस्ति तस्य मूलस्रोतस्तु वेदा एव । 'उद्यनद्य मित्रमहः' इत्यारभ्य तिस्र ऋच ऋग्वेदस्य तथा 'हंसः शुचिषद्' इत्येको मन्त्रो यजुर्वेदस्य, मुख्यतस्सूर्यनमस्कारप्रधान-भूता । तृचाकल्प-हंसकल्पनमस्कारयोर्द्वादशनमस्कारैरावर्तनं भवति 'उद्यनद्य मित्रमहः' इत्येतासामृचां द्वादशभिर्भागैर्विभज्यैकैकं भागमादाय नमस्कारो भवति । तथैव 'हंसः शुचिषद्' इति यजुर्वेदोक्तं मन्त्रं विभज्य हंसकल्पनमस्कारः । एतयोर्नमस्कारयोः पृथग्विवरणमावश्यकमिति कृत्वाऽत्र पुनः प्रकृतमनुसरामः । ऋग्वेदर्चः पूर्णा व्याख्याऽथर्ववेदे उपलभ्यते, यथा च—

उद्यते नमः उदायते नमः उदिताय नमः । विराजे नमः स्वराजे नमः सम्राजे नमः ।
अस्तंयते नमः नमोऽस्तमेष्यते नमोऽस्तमिताय नमः । विराजे नमः स्वराजे नमः सम्राजे नमः[1] ॥

---

१. अथर्ववेदः १७।१।१ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथाऽत्र त्रयोदशनमस्काराणामुद्भूतिस्तथैव वाल्मीकीये रामायण आदित्यहृदयस्तोत्रेऽप्युपलभ्यते, तदित्थम्—

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः । ज्योतिर्गणानाम्पतये दिनाधिपतये नमः ।
जयाय जयभद्राय हर्यश्वाय नमो नमः । नमो नमः सहस्रांशो आदित्याय नमो नमः ॥
नम उग्राय वीराय सारङ्गाय नमो नमः । नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ।
ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्च्चसे । भास्वते सर्व्वभक्षाय रौद्राय वपुषे नमः ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने । कृतघ्नघ्नाय देवाय ज्योतिषाम्पतये नमः ।
तप्तचामीकराभाय हरये विश्वकर्मणे । नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥[१]

अत्र 'उद्यते नमः' इति 'पूर्वाय गिरये' इत्यनेन संसूचितं तथैव 'अस्तमिताय नमः' इत्यस्य पश्चिमाद्रये नमः इत्यनेनाववोधो जायते । अन्यत्राप्येवमेव तोलनात्मकमध्ययनं भवितुमर्हति ।

ऋग्वेदस्यैकस्यामृचि प्रणिपातपूर्वकं नमनं निर्दिष्टम् ।[२] श्रीमद्भागवते च—

कृत्वा प्रदक्षिणं भूमौ प्रणमेत् दण्डवन्मुदा ।[३]

इत्यत्र साष्टाङ्गनमनपूर्वकप्रणामस्योल्लेखो विहितः ।

कूर्मपुराणे आदित्यहृदयप्रसङ्गे सूर्यनमस्कारविषये लिखितमस्ति यत्—

प्रातः कालेऽथ मध्यान्हे नमस्कुर्याद्दिवाकरम् ।[४]

अत्र किञ्चिद् विचार्यते—

श्रीमता राज्ञा श्रीभगवान्रावश्रीनिवासरावपन्तप्रतिनिधिमहोदयेन स्वरचिते 'सूर्यनमस्कार' नामके आधुनिके ग्रन्थे सूर्यनमस्कारविषये लिखितं यत्—'ब्राह्मे मुहूर्ते एव नमस्कारो विधेयः'[५] एतत्तूपर्युक्तस्य पौराणिकवाक्यस्य समन्वयात्मकं वाक्यमेव । ननु यन् मध्याह्न एष व्यायामः कथं न क्रियते ? मध्याह्ने शारीरिको व्यायामो न हितावह इति हेतोर्नाहितो मध्याह्नकालः । अत्र पौराणिकमतस्य प्रतिपादने इत्येवाशयो यदेष व्यायामः प्राचीनमूलकः । भगवता श्रीकृष्णेनापि सूर्योपस्थानं विहितमिति श्रीमद्भागवते स्पष्टम्—

उपस्थायार्कमुद्यन्तं तर्पयित्वाऽऽत्मनः कलाः ।[६]

एवमेव परवर्तिभविष्यपुराणे धार्मिकदृष्ट्या सूर्यनमस्कारविषये पुष्कलं वर्णनमुपलभ्यते । तत्र धार्मिकी दृष्टिर्भवतु नाम, किञ्च शारीरिकव्यायामदृष्ट्यापि ग्राह्य एव सूर्यनमस्कारव्यायामः । अत्र तु सूर्यनमस्कारविकासदृष्ट्यैवालोच्यते, तदित्थम्—पूर्वेतिहासमालोचयञ्छतानीकः

१. वाल्मीकीय० ६।१०५ ।
२. ताँ आ नमोभिरुरुचक्षसो० ६।५१।९ ।
३. श्रीमद्भा० ८।१६।४२ ।
४. कूर्म० १८।४५ ।
५. सूर्य० पृ० ११ ।
६. श्रीमद्भा० १०।७०।७ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिपादयति यदपारं दुर्गसंसारकान्तारमभिधावतां जनानां संसारार्णवतारक एको भानु-नमस्कारः प्रथितः । रत्नानामाकरो यथा सुमेरुः, यथा सर्वाश्चर्यमयं नभः, यथा च तीर्थानामाश्रयो गङ्गा भुवि विख्यातस्तथैव देवानामाश्रयो रविर्निगदितः । पुनर्दृढभाषणेन शतानीकः कथयति यदेव गुणगरिम्णोरमिततेजसो भानोर्वैशिष्ट्यं नाहं केवलं वच्मि, किन्तु सिद्धैरमरैश्च बहुशः कथितम् । अनेन बहुचर्चितस्य सूर्यनमस्कारस्य लोकप्रियता सिद्धा । पुनस्तत्रैव तन्मतं ब्रह्मणापि पोषितम्—

त्रिभिः प्रदक्षिणां कृत्वा यो नमस्कुरुते रविम् ।
भूमौ गतेन शिरसा स याति परमां गतिम् ।[1]

अत्र 'भूमौ गतेन शिरसा' इति प्रतिपाद्य सूर्यनमस्कारोक्तमष्टाङ्गप्रणामस्य 'उरसा शिरसा' इत्यादिवाक्यस्य मूलत्वं संसूचितम् । गौतमधर्मसूत्रेऽपि तन्माहात्म्यमेवमुक्तम्—

"सूर्यस्य त्रीन्नमस्कारान् स्वप्ने सिक्त्वा गृही चरेत्[2]" (काश्यपः) पुराकाले मानवा धर्मपालने दक्षा आसन् । तेषां सर्वाणि नैत्यिककार्याणि धर्मशास्त्रानुसारेणैव प्रतिपादितान्यासन् । इति कृत्वा धार्मिक्यां शिक्षायां शारीरिकी शिक्षान्तर्गताऽऽसीत् । तथा चोक्तं तत्रैव भविष्य-पुराणे—

कृत्वा प्रदक्षिणं यस्तु नमस्कारं प्रयोजयेत् ।
राजसूयाश्वमेधाभ्यां सकलं विन्दते फलम् ॥
नमस्कारः स्मृतो यज्ञः सर्वयज्ञोत्तमोत्तमः ।
नमस्कृत्वा सहस्रांशुमश्वमेधफलं लभेत् ।
प्रणम्य दण्डवद् भूमौ नमस्कारेण योऽर्चयेत् ॥
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥[3]

स्पष्टमेतत् । भवतु नामात्र धार्मिकी दृष्टिः, किन्तु शारीरिकी दृष्टिरप्यत्रान्तर्निगूढा । तात्कालिके क्रतुमये जीवने क्रतुनाप्यधिकफलदर्शनेन प्रवृत्तिहेतुरेव कारणम् । एतदेव वैशिष्ट्यं प्राचीनभारतीयलोकपरम्परायाः ।

किं बहुनोक्तेन—स्कन्दपुराणे तु सूर्यनमस्कारः सर्वातिशायिनमस्काररूपेण प्रतिपादितः । पुरतोऽवलोकयन्तु निम्नाङ्कितेषु पद्येषु—

आदौ तस्य नमस्कारोऽन्येषां च तदनन्तरम् ।
क्रियते दैवतैः सर्वैस्तेन सर्वैर्महर्षिभिः ॥
नमस्कृतेन सूर्येण सर्वे देवा नमस्कृताः ।
उत्पत्तिः प्रलयस्थानं निधानं बीजमव्ययम् ॥
हेतुरेको जगन्नाथो नाऽन्यो विद्येत भास्करात् ।[4]

---

१. तत्रैव ९५।१ ।
२. गौतम० तृ० प्र०, प० अ० ।
३. भविष्य० १६४।४७-४९ ।
४. स्कन्द० रेवा० १२५।११-१६ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नमस्कारस्यैव सर्वातिशायित्वं नहि, प्रत्युत सृष्टि-स्थितिप्रलयशक्तिरपि भास्करोऽस्तीति सिद्धम्। अनेन सूर्यनमस्कारात्मकेन विस्तृतविवेचनेन सुस्पष्टमेतत्तावद् नमस्कारविकास-पर्यालोचनम्।

सूर्यनमस्कार-व्यायामस्य वर्तमानं स्वरूपम्

पुरा सूर्यनमस्कार-व्यायामो बहुचर्चित इति निश्चितोऽस्ति। अथर्ववेदे, पुराणेषु, रामायणे चैतस्योल्लेखो वर्तते। क्वचिदुपासनायां क्वचित्तपसि क्वचिच्च व्रतकल्पे। प्रकारान्तरेणानेकत्र सूर्यनमस्कारस्य चर्चाऽस्ति। अथर्ववेदोक्तनमस्कारावलिर्विकासक्रमे द्रष्टव्यः। स्कन्दपुराणे सूर्यायाऽर्घ्यदानमहिमवर्णने "पश्चादासनस्थं देवं सवितारं मण्डलमध्ये द्वादशात्मकं सुरादिभिस्सम्पूज्यमानं ध्यात्वा पूर्वोक्तमर्घपात्रं शिरसि कृत्वा भूमौ जानुनी निपात्य सूर्याभिमुखस्तद्गतमना भूत्वाऽर्घमन्त्रमुदाहरेत्"[1] इत्यत्र 'जानुनी निपात्य' इति 'जानुनासः' इत्यस्यैव मूलरूपम्। अत्र 'ॐ' खखोल्काय नम इत्युच्चारणमाधुनिके नमस्कारे 'ॐ ह्रां' इतिवत् वर्तते। तथैव तत्रैव स्कन्दपुराणे—

> ततस्त्वगस्त्यभ्राताऽसौ ग्रीष्मे पञ्चाग्निमध्यगः।
> भास्करे दत्तदृष्टिश्च मौनव्रतसमन्वितः॥
> तिष्ठन् कनिष्ठिकाऽङ्गुल्या वामपादस्य निश्चलः।
> ऊर्ध्वबाहुर्निरालम्बस्तपस्तेपेऽतिदारुणम्॥

अत्र च 'भास्करे दत्तदृष्टिः' मौनव्रतसमन्वितः' 'कनिष्ठिकाङ्गुल्या तिष्ठन्' 'ऊर्ध्वबाहुः' 'निरालम्बः' इत्यादीनि विशेषणानि किं सूचयन्ति ? आधुनिके सूर्यनमस्कारे 'उपरि—अवलोकयेत्' 'ऊर्ध्वेक्षणं' 'नासिकया श्वासमाकर्षणम्' इत्यादिपदैः किन्न संसूचयन्ति।

एवमेव भविष्यपुराणे ब्राह्मपर्वणि सप्तमीकल्पे भानुपादद्वयव्रते[2] तथा वाल्मीकीये रामायये उत्तरकाण्डे—

> पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत।
> तस्थौ चोर्ध्वशिरोबाहुः स्वाध्याये धृतमानसः।[3]

अत्र 'ऊर्ध्वशिरोबाहुः' इत्यनेन सूर्यनमस्कारव्यायाममेव सङ्केतितमस्ति। बहुकालपर्यन्तमयं शारीरिको व्यायामो विकसञ्छताब्द्यामस्यां विकासं प्राप। सूर्यनमस्कारव्यायामस्य व्यापकप्रचारे श्रेयोभाजः सन्ति श्रीमन्तः श्रीभगवान्रावश्रीनिवासरावपन्तप्रतिनिधिमहोदया। (औंधनरेशाः)। तेषां प्रशंसनीयेन प्रयासेन सूर्यनमस्कारव्यायामस्य व्यापकप्रचारोऽभवत्। वै० सं० १९९६ (सन् १९३९ ई०) तमवर्षे प्रथमप्रकाशितस्य 'सूर्यनमस्कारपुस्तकस्य' प्रास्ताविके राज्ञा महोदयेन लिखितं यत् 'मया स्वयमेव यथाशास्त्रं यथामन्त्रं यथा-

---

१. स्कन्द० माहेश्वरखण्डे कौमारिकाखण्डम् ४३।५५।

२. भविष्य० १०८।१–९।

३. वाल्मीकीय० ७।१०।८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पद्धति सूर्यनमस्कारनियमअभ्यस्ता: । तत्रानुभूतञ्च यदनेन व्यायामेनास्माकं शारीरिकी मानसिकी चोन्नतिर्नितरामभूदिति । सर्वेषां स्त्री-पुरुषाणामियमुन्नतिर्भवेदित्याकाङ्क्षितेन मया 'सूर्यनमस्कार' नाम्न्यैका लघुपुस्तिका महाराष्ट्रभाषायां विरचिता, सा च पण्डितेन सातवलेकर-महोदयेन स्वीये भारतमुद्रणालये मुद्रापयित्वा तां १९२२ ई० मिते वत्सरे प्रकाशिता ।

अनन्तरञ्च १९२८ ईशवीये आँग्लभाषायामपि 'सूर्यनमस्कार' पुस्तकं प्रकाशितम् । तदनु 'लीडरप्रेस' प्रयागात् प्राय: १९३० ईशवीये वत्सरे हिन्दीभाषायां पुस्तकमिदं प्रकाशितमभूत् । तथैव सं० १९९५ वैक्रमे वत्सरे प्रकाशिते 'सदाचारशिक्षाया: प्रथमे भागे सूर्यनमस्कारव्यायामस्य चर्चा वर्तते ।[1] अस्मिन् पुस्तके द्वादशनमस्कारै: पूर्णव्यायामोऽनुमोदित: ।

अत: परं प्रकृतमनुसृत्य मुख्यप्रतिपाद्यविषयमनुसराम:—

यस्मै प्रयोजनाय व्यायामोऽयं क्रियते तदारोग्यम् । येषु मुख्यावयवेषु च मनुष्याणामारोग्यमवलम्बितमस्ति, तेऽवयवास्त्रय: सन्ति—

(१) प्रथमावयव: (पचनेन्द्रियाणि =) उदरम्, यकृत्, प्लीहा, अन्त्राणि च ।

(२) द्वितीयावयव:—हृदयं फुफ्फुसञ्च ।

(३) तृतीयावयव:—यावद् मज्जातन्तुप्रवेश: (Nervous system)
मस्तिष्कम्, संज्ञारज्जुश्च (Spind cord, Solarplexus)

अत्रेदम् बोध्यम्—यथा सूर्यनमस्कारव्यायामेनोपर्युक्तानां त्रयाणामवयवानां लाभो जायते तथाऽन्यव्यायामैर्न । एवञ्चान्यव्यायामेषु बह्वयोऽसुविधा: भवन्ति, यथा—व्यायामशालाभाव: सामग्र्यभावश्च । अतोऽन्यव्यायामासुविधां दृष्ट्वा स्वाधीनस्सूर्यनमस्कारव्यायाम एव निषेवणीय: ।

नमस्काराणां सङ्ख्या

साधारणेन नियमेन स्त्रीणां पुरुषाणां च कृतेऽपेक्षितानां नमस्काराणां संख्याऽवस्थानुरूपा भवति । तद्यथा—

वय:	नमस्काराणां संख्या
८–१२ वर्ष:	२५–५०
१३–१६ ,,	५१–१००—अनन्तरञ्च यथाशक्ति कर्त्तव्यम् ।

अस्मिन् व्यायामेऽन्ये व्यायामा: पूरका भवन्ति । अतो नमस्कारव्यायाम एव श्रेष्ठ: । स चाष्टभिरङ्गैस्साध्यते—

उरसा शिरसा दृष्ट्या वचसा मनसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥

अत्र पाठान्तरञ्च—

जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया ।
शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरित: ॥[2]

---

१. सदाचार-शिक्षा, प्रथम भाग, पृ० ३ ।

२. संस्कृत-हिन्दी शब्दकोश (आप्टे) पृ० १२३ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्मशास्त्रस्येतिहासे[1] तु पञ्चाङ्गनमस्कारस्यापि चर्चा विद्यते, स च हस्ताभ्यां पद्भ्यां शिरसा च सम्पाद्यते ।

दशविधसूर्यनमस्कारव्यायामेऽष्टाङ्गप्रणामः पञ्चमः । अङ्गैस्सम्पाद्यमानानां गतिविधीनां चर्चा यथास्थानासनव्यायामे विद्यते, किन्तु 'वचसा' 'दृष्ट्या' इत्यनयोर्विषये प्रतिपादनमावश्यकमितिकृत्वा तत्र दृष्टियोगो यथा—

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।[2]
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥

'वचसा' इत्यस्य च विवृतिर्यथा—सूर्यनमस्कारमन्त्राः ।

(अ) ॐ[3] ।

(आ) षड्बीजाक्षराणि—ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः ।

(इ) सूर्यस्य द्वादशैतानि नामानि—मित्राय नमः (जगन्मित्राय), रवये नमः (सर्वैः पूजनीयः = सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः)[4], सूर्याय नमः (प्रवर्तकसञ्चालकौ=सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा)[5], भानवे नमः (तेजोमयरश्मिप्रदाता = मण्डिताखिलदिक्प्रान्तारचण्डांशोः पान्तु भानवः)[6] ।

खगाय नमः (इन्द्रियोद्दीपकः), पूष्णे नमः (पोषणकर्ता), हिरण्यगर्भाय नमः (वीर्यबलवर्धकः = हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः)[7], मरीचये नमः (सर्वरोगनाशकः = सवितुर्मरीचिभिः)[8], आदित्याय नमः (आदरणीयः) सवित्रे नमः (सर्वोत्पादकः = उदेति सविता ताम्रस्ताम्र एवास्तमेति च)[9], अर्काय नमः (आदरणीयः) आविष्कृतारुणपुरःसर एकतोऽर्कः[10], भास्कराय नमः (प्रकाशमानः) ।

ऋग्वेदस्य तिसृणामृचां द्वादशभागाः

(१) उद्यनद्य मित्रमहः । (२) आरोहन्नुत्तरां दिवम् । (३) हृद्रोगं मम सूर्य । (४) हरिमाणञ्च नाशय । (५) शुकेषु मे हरिमाणम् । (६) रोपणकासु दध्मसि । (७) अथो हारिद्रवेषु मे ।

१. 'धर्मशास्त्र का इतिहास' (हि० सं०) प्रथम भाग, पृ० ४०१ ।

२. श्रीमद्भगवद्गीता ६।१३ ।

३. ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥
बौधा० ध०, द्वि० प्र०, च० अ०, प्र० सू० विवरणे पृ० १५५ ।

४. रघु० १।१८ ।

५. तत्रैव ५।१३ ।

६. भामिनीविलासः १।१२९ ।

७. आदित्यहृदय० श्लो० १२ ।

८. ऋतु० १।१६, रघु० ९।१३, १३।४ ।

९. काव्यप्रकाशः ७ ।

१०. अभिज्ञानशाकुन्तलम् ४।१ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(८) हरिमाणं निदध्मसि । (९) उदगादयमादित्यः । (१०) विश्वेन सहसा सह । (११) द्विषन्तं मह्यं रन्धयन् । (१२) मो अहं द्विषते रधम् ।

यजुर्वेदस्यैकर्चस्य द्वादशभागाः

(१) हंसः शुचिषत् । (२) वसुरन्तरिक्षसन् । (३) होता वेदिषत् । (४) अतिथिर्दुरोणसत् । (५) नृषत् । (६) वरसत् । (७) ऋतसत् । (८) व्योमसत् । (९) अब्जाः गोजाः । (१०) ऋतजाऽद्रिजाः । (११) ऋतम् । (१२) बृहत् ।

सूर्यनमस्कार व्यायामस्य दशभेदाः

(१) अवस्थानम्

प्राक् नमस्कर्ता स्वहस्तपरिमाणेन कीटांशुकस्य (रेशमीवस्त्रस्य) और्णवस्त्रस्य (खादीवस्त्रस्य वा) स्वच्छं समकोणं सपादहस्तमितं वस्त्रमादाय पादौ सङ्गृह्याङ्गुष्ठौ च तदुपर्यन्तिमे भागे स्थापनीयौ । ततः पश्चाच्च पूर्वाभिमुखो भूत्वा पादौ जानुनी च संमेल्यावक्रभावेन सरलेनेत्यर्थः स्थितो भवेत् । अनन्तरश्चानेन प्रकारेण हस्तसम्पुटं कुर्याद्येनाङ्गुष्ठावुरस्पृशन्ताविव स्याताम् । अन्याः चतस्रोऽङ्गुल्यः परस्परं संयुज्याङ्गुष्ठाभ्यां दूर एव स्थापनीयाः । उदरं किञ्चिदाकुञ्च्योरसं बहिष्कृत्य सम्पूर्णं शरीरं विशेषतः कटिं दृढीकृत्याग्रे च पश्येत् । नासाग्रे दृष्टिं निक्षिपेत् । अपि च 'समं कायशिरोग्रीवम्' तिष्ठेत् । सम्भवे सति सर्वाङ्गाकृतिपरिदर्शनाय दर्पणं पुरतस्स्थापयेत् । उपर्युक्तया रीत्या नासाग्रे दृष्टिं निक्षिप्य स्थिते सति 'ॐ ह्रां मित्राय नमः' (जगन्मित्रः) इत्युच्चस्वरेणोच्चारयेत् । पश्चाच्च मुखं निरुध्य 'पूरकम्' अर्थात् नासिकया श्वासं वेगेन कर्षयेत् पश्चाच्च कुम्भकं कुर्यात् । अत एवैष 'अवस्थानम्' नाम सूर्यनमस्कारः पूरककुम्भकप्रधान इति ।

(२) जानुस्पर्शः

श्वासं निरुन्धञ्जानुनी स्थिरीकृत्य नम्रीभूय हस्तपल्लवौ चानेन प्रकारेण भूमौ निपातयेतां येनाङ्गुल्यस्संलग्नास्स्युः, हस्ताङ्गुष्ठौ च पादाङ्गुलीनामग्रत एव स्याताम् । स्वमस्तकेन नासिकया वा जानुनी स्पृशेत् । विचारयेच्च मनस्यनेन तव स्वास्थ्यं शक्तिरायुश्च वर्द्धत इव । अनन्तरं नासिकानिरुद्धश्वासं बहिर्निष्कासयेत् । एवं कुम्भकरेचकप्रधानोऽयं नमस्कारः ।

(३) ऊर्ध्वेक्षणम्

नासिकया श्वासमाकृष्य पादमेकं पृष्ठभागे निक्षिपेत् । तस्य पादस्य जानुपादाङ्गुल्यश्च भूमिं स्पृशन्त इव स्युः, तथा चान्यपादजानुहस्तस्य मध्याद् बहिर्निस्सारयेत् । मस्तकमुपर्युत्थाय पृष्ठदेशं पश्येत् । श्वासं निरोधयेच्च । पूरक-कुम्भकप्रधानोऽयं नमस्कारः ।

(४) तुलितवपुः

श्वासं निरुध्य द्वितीयपादमपि तथैव पृष्ठे कुर्याद्येनाङ्गुष्ठौ जानुनी च परस्परं स्पृष्टे स्याताम् । हस्ताववक्रौ स्याताम् । कटि-शरीर-पृष्ठभागश्चैकपङ्क्तौ स्युः । पादाववक्रीकृत्य समस्तशरीरभारं हस्ताङ्गुलीषु पादाङ्गुलीषु च वहेत् । श्वासं निरोधयेत् । कुम्भकप्रधान एष तुलितवपुर्नाम सूर्यनमस्कारः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(५) साष्टाङ्गम्

श्वासं निरुन्धन् हस्ताङ्गुलीन् पादाङ्गुलींश्च यथावत्स्थितान् जानुनीभूमौ निपातयेताम्, चिबुकेनोरस उन्नतभागस्पर्शं कुर्यादथवा स्पर्शचेष्टां विदध्यात् । उरसो निम्नभागाद् मस्तकाच्चानेन प्रकारेण भूमिस्पर्शं कुर्याद् येन नासिका भूमिस्पर्शं न कुर्यात् । तथैवोदरमपि अन्तराकर्षयेद्येन भूमिस्पर्शो न भवेत् । नितम्बौ उपरि कृत्वा नासिकया निरुद्धश्वासं बहिर्निष्कासयेत् । एष साष्टाङ्गनामा सूर्यनमस्कारो व्यायामः प्रथितः ।

(६) कशेरुसङ्कोचः

पादाङ्गुलीः जानुनी हस्ताङ्गुलीश्च पञ्चमनमस्कारस्थितिवत् करौ सरलौ कुर्यात् । नासिकया श्वासमाकर्षयेत् । उरसमग्रे कृत्वा कटिञ्च गोलाकारं विधायोपरि पश्येत् । यथाशक्ति मस्तकं नम्रीकुर्यात् । श्वासमवरुन्धयेत् । एष पूरककुम्भकप्रधानो नमस्कारः कथितः ।

(७) कशेरुविकसनम्

श्वासनिरोधं कृत्वा चतुर्थनमस्कारस्थितावागच्छेत् । हस्ताङ्गुलीर्विनापसार्यैव हस्तौ तिरश्चीनौ कुर्यात् । मस्तकं नम्रीकुर्यात् पादौ च सरलौ कृत्वा पादमूले भूमौ स्थिरीकुर्यात् । श्वासावरोधं स्थापयेत् । सूर्यनमस्कारोऽयं कशेरुविकसननामकः ।

(८) ऊर्ध्वेक्षणम्

श्वासं निरुध्य हस्तौ सरलौ कृत्वैकं पादमग्रे एवं निधापयेद्येन वर्द्धितपादाङ्गुल्यो हस्ताङ्गुलितलस्य समानान्तर एव भवेयुः । पादो यावन्मितोऽग्रेसरो भविष्यति तदनुकूलो लाभः । पादस्यास्य जानुः हस्तयोरुभयोर्मध्यतोऽग्रे निःसृतो भवेत् । अन्यजानुना पादाङ्गुलीभिश्च भूमिं स्पृष्ट्वा नमस्कारस्थितिवदुपर्यवलोकयेत् । श्वासं निरोधयेत् । इदमूर्ध्वेक्षणं नाम अष्टमो नमस्कारः कुम्भकप्रधानः ।

(९) जानुस्पर्शः

श्वासं निरुध्य द्वितीयनमस्कारस्थितिवत्कुर्यात् । नासिकया श्वासं बहिर्निष्कासयेत् । एष नवमो नमस्कारो रेचकप्रधानः ।

(१०) अवस्थानम्

नासिकया श्वासमाकृष्य प्रथमनमस्कारस्थितावागच्छेत् । यावत्कालपर्यन्तं स्थितेः सुदृढा स्थितिर्न भवति जानुनी अकुटिले स्याताम् । नासिकया श्वासाकर्षणं कुर्यादिति । एष दशमः सूर्यनमस्कारो निगदितः ।

इत्थं दशासनानां समवाये एकस्सम्पूर्णनमस्कारो भवति । एवञ्च पञ्चविंशतिनमस्काराणामेकमावर्तनं भवति ।

प्रथमावर्तनानन्तरं द्वितीयावर्तनस्य प्रथमनमस्कारप्रारम्भे 'ॐह्रीं रवये नमः' इति मन्त्रमुच्चार्य मुखं पिहितं कुर्यात्, ध्वनियुक्तञ्च पूरकं कृत्वा मुखं पिधाय नासिकया श्वसनक्रियां सम्पाद्य दशासनेभ्यो युक्तं द्वितीयं नमस्कारं यथाविहितं कुर्यात् ।

प्रारम्भे सावकाशो नमस्कारो विधेयः, येन ज्ञानं भवेद्यत् कस्मिन्नवयवे विशेषरूपेणाकर्षणं जायते । कस्मिंश्चाकर्षो भूयादिति । तदैव ज्ञानं भविष्यति यत् प्रत्येकावयवेभ्यः पृथक्-

९

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पृथग् व्यायामो भवति । कदापि वेगेन नमस्कारो न विधेयो येन श्वसनक्रियास्खालनं द्रुतं भवेदिति ।

स्त्रीणां कृते सूर्यनमस्कारः

यथा पुरुषाणां सूर्यनमस्कारो हितावहः, स्वास्थ्यप्रदाता चोक्तस्तथैव स्त्रीणामपि सततं शारीरिकस्वास्थ्यप्रदायकः कथितः । अतो यथावसरं यथाकालञ्च बालास्तरुण्यो वृद्धास्स्वामिन्यः सेविकाः कुमार्यो गृहिण्यो दौहृदवत्यः पुत्रवत्यश्च सर्वाः स्त्रियोऽवश्यमेव नमस्कार-व्यायामं कुर्वन्तु । पुरुषाणां कृते त्वन्ये व्यायामाः कदाचित् सुलभास्सन्ति किन्तु स्त्रीभ्यस्तत् सौलभ्यं न । पुरुषा गृहाद्बहिरपि गत्वा यथा व्यायामं कर्तुं शक्नुवन्ति तथा स्त्रियो न । अतो गृहकार्य-व्यायामेन सह स्त्रीभ्यस्सूर्यनमस्कारव्यायाम एव सुलभ उपयुक्तश्च । यत्र विशेषस्थितिषु स्त्रियो व्यायामं न कुर्वन्तु तत्र सूर्यनमस्कारव्यायामोऽपि त्याज्यः । विशेषस्थितयश्च—

(१) रजोवत्यः स्त्रियो व्यायामं न कुर्युः ।

(२) दौहृदलक्षणावस्थायां स्त्रियः चतुर्षु पञ्चसु वा मासेषु नैत्यिकं व्यायामं कुर्युः । अनन्तरं पञ्चषण्मासपर्यन्तं भूमौ साष्टाङ्गं नमस्कारं न कुर्युः । केवलमुत्थायाथवा जान्वोर्बलमाश्रित्यासी-नासनानि कुर्युः । अष्टममासादारभ्याऽऽप्रसूतेः स्थितायामवस्थायामथवासीनोच्चस्वरेण स्पष्टं मन्त्रयुक्तं सूर्यनमस्कारं कथयेयुः । उन्मुक्ते वायौ क्रोशं क्रोशार्धं वा गमनव्यायाममं कुर्युः ।

(३) गृहसरलकार्याणि दौहृदवत्यः कुर्युः ।

(४) प्रसूत्यनन्तरं यथाशक्ति मासत्रयानन्तरं नमस्कारव्यायामं प्रारभ्य क्रमशो वृद्धिं कुर्युरिति ।

नमस्कारप्रयुक्तः प्राणायामविचारः

प्राणायामप्रकरणे साङ्गोपाङ्गरूपेण तद्विचारो विद्यते । अत्र केवलं नमस्कारप्रयुक्त-प्राणायाममभिलक्ष्य विचार्यते । शास्त्रोक्तेन प्राणायामाभ्यासेन सदावाही श्वासोच्छ्वासक्रिया सुचारुरूपेण चलति । यथोचितं श्वासोच्छ्वासावारोग्यायावश्यकौ स्तः । प्राणायामैः रुधिरा-भिसरणं भवति । उरो मांसलं सुपुष्टञ्च भवति । फुफ्फुसदोषा नश्यन्ति । मस्तिष्के सञ्चारो जायते । मज्जातन्तौ स्थिरता समायात्यपि चेन्द्रियदमनशक्तिर्वर्द्धते । वस्तुतस्तु श्वसनोच्छ्वसन एव प्राणाः ।

नमस्काराणामादिनवासनेषु प्राणायामविधिः

आसनानि	प्राणायामः
१—प्रथमासने—पू० कु० २—द्वितीयासने—कु० रे०	प्रथमः प्राणायामः
३—तृतीयासने पू० कुं० ४—चतुर्थासने कुं० ५—पञ्चमासने कुं० रे०	द्वितीयः प्राणायामः
६—षष्ठासने पू० कुं० ७—सप्तमासने—कुं० ८—अष्टमासने—कु० ९—नवमासने—कुं० रे०	तृतीयः प्राणायामः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तृचाकल्पनमस्कारा:

आचम्य प्राणानायम्य ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीसवितृ-सूर्यनारायणप्रीत्यर्थं शक्तिप्राप्त्यर्थञ्च तृचाकल्पविधिना नमस्काराख्यं कर्म करिष्ये ।

(पात्रे जलं गृहीत्वा तन्मध्ये गन्धाक्षतपुष्पाणि क्षिप्त्वा)

ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

अथवा—

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥
प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितञ्च ।
वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकञ्च ॥
प्रातर्भजामि सवितारमनन्तशक्तिं पापौघशत्रुभयरोगहरं परं च ।
तं सर्वलोककलनात्मककालमूर्तिं गोकण्ठबन्धनविमोचनमादिदेवम् ॥[1]

इति ध्यात्वा

(१) ओं ह्रां उद्यन्नद्यमित्रमहः ह्रां मित्राय नमः ।
(२) ओं ह्रीं आरोहन्नुत्तरां दिवं ह्रीं रवये नमः ।
(३) ओं ह्रूं हृद्रोगं मम सूर्य ह्रूं सूर्याय नमः ।
(४) ओं ह्रैं हरिमाणं च नाशय ह्रैं ओं भानवे नमः ।
(५) ओं ह्रौं शुकेषु मे हरिमाणं ह्रौं ओं खगाय नमः ।
(६) ओं ह्रः रोपणाकासु दध्मसि ह्रः ओं पूष्णे नमः ।
(७) ओं ह्रां अथो हारिद्रवेषु मे ह्रां ओं हिरण्यगर्भाय नमः ।
(८) ओं ह्रीं हरिमाणं निदध्मसि ह्रीं ओं मरीचये नमः ।
(९) ओं ह्रूं उदगादयमादित्यः ह्रूं ओं आदित्याय नमः ।
(१०) ओं ह्रैं विश्वेन सहसा सह ह्रैं ओं सवित्रे नमः ।
(११) ओं ह्रौं द्विषन्तं मह्यं रन्धयन् ह्रौं ओं अर्काय नमः ।
(१२) ओं ह्रः यो अहं द्विषतेरधं ह्रः ओं भास्कराय नमः ।
(१३) ओं ह्रां ह्रीं उद्यन्नद्य मित्रमह = आरोहन्नुत्तरां दिवं ह्रां ह्रीं ओं मित्ररविभ्यां नमः ।
(१४) ओं ह्रूं ह्रैं हृद्रोगं मम सूर्य हरिमाणं च नाशय ह्रूं ह्रैं ओं सूर्यभानुभ्यां नमः ।
(१५) ओं ह्रौं ह्रः शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ह्रौं ह्रः ओं खगपूषाभ्यां नमः ।

---

१. श्लोकत्रयमिदं भानोः प्रातःकाले पठेत्तु यः ।
सर्वव्याधिविनिर्मुक्तः परं सुखमवाप्नुयात् ॥ —स्तोत्ररत्नावली

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(१६) ओं ह्रां ह्रीं अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ह्रां ह्रीं ओं हिरण्यगर्भ-मरीचिभ्यां नमः ।

(१७) ओं ह्रूँ ह्रैं उदगादयमादित्यो विश्वेन सहसा सह ह्रूँ ह्रैं ओं आदित्य-सवितृभ्यां नमः ।

(१८) ओं ह्रौं ह्रः द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधं ह्रौं ह्रः ओं अर्क-भास्कराभ्यां नमः ।

(१९) ओं ह्रां ह्रीं ह्रूँ ह्रैं उद्यनद्य मित्रमह आरोहन्नुत्तरां दिवं हृद्रोगं मम सूर्य हरिमाणं च नाशय ह्रां ह्रीं ह्रूँ ह्रैं ओं मित्ररविसूर्यभानुभ्यो नमः ।

(२०) ओं ह्रौं ह्रः ह्रां ह्रीं शुकेषु मे हरिमाणं रोपणाकासु दध्मसि अथो हरिद्रवेषु मे हरिमाणं निदध्मसि ह्रौं ह्रः ह्रां ह्रीं ओं खगपूषहिरण्यगर्भमरीचिभ्यो नमः ।

(२१) ओं ह्रूँ ह्रैं ह्रौं ह्रः उदगादयमादित्यो विश्वेन सहसा सह द्विषन्तं मह्यं रन्धयन्मो अहं द्विषतेरधं ह्रूँ ह्रैं ह्रौं ह्रः ओं आदित्यसवित्रर्कभास्करेभ्यो नमः ।

(२२–२४) ओं ह्रां ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः उद्यनद्य मित्रमह आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य हरिमाणञ्च नाशय । शुकेषु मे हरिमाणं रोपणकासु दध्मसि । अथो हारिद्रवेषु मे हरिमाणं निदध्मसि । उदगादयमादित्यो विश्वेन सहसा सह । द्विषन्तं मह्यं रन्धयन्मो अहं द्विषत्तेरधम् । ह्रां ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः ओं मित्र-रवि-सूर्य-भानु-खग-पूष-हिरण्यगर्भ मरीच्यादित्य-सवित्रर्क-भास्करेभ्यो नमः । इति त्रिः ।

(२५) ओं श्रीसवित्रे सूर्यनारायणाय नमः ।

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥
नमो धर्मविधानाय नमस्ते कृतसाक्षिणे ।
नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥

अनेन तृचाकल्पनमस्काराख्येन कर्मणा भगवान् श्रीसवितृसूर्यनारायणः प्रीयतां न मम ।

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
सूर्यपादोदकं तीर्थं जठरे धारयाम्यहम् ॥

(इति तीर्थं गृहीत्वाचमनं कुर्यात्)

हंसकल्पनमस्काराः

ध्यानम्—ध्येयः सदा..............................॥ इति ।

१—ओं ह्रां हंसः शुचिषदिति मन्त्रेण क्रमशः चतुर्विंशतिनमस्काराः ततः २५-श्रीसवित्रे सूर्यनारायणाय नमः । अन्ते 'आदित्यस्य नमस्कारान्' इत्यादिनाऽऽचमनं कुर्यात् ।

वैदिकर्चेन विना सूर्यनमस्कारः

दशभिरासनैरेकः पूर्णनमस्कारो भवति । समन्त्रकाणामेषां पूरणाय क्षणानामशीति-रपेक्ष्यते । एतादृशपञ्चविंशतिनमस्काराणामेकमावर्तनमष्टक्षणेषु (मिनटेषु) भवति । सप्रणवबीजा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्षरसमन्त्रकनमस्कारेष्वधिकस्समयोऽपेक्ष्यते । सर्वासु शिक्षणसंस्थासु यद्यस्य व्यायामस्य शिक्षाऽनिवार्या भवेत्तदा महाँल्लाभो भविष्यतीति सुनिश्चितम् ।

अतः परं यथाक्रमं दशासनानां विवेचनं भविष्यति । तत्रादावासनपरिगणना श्लोकैः कथ्यते । सूर्यनमस्कारस्य हिन्दीसंस्करणे श्रीधोंडो विट्ठलकुलकर्णी एम्० ए० महोदयैर्विरचिता श्लोकास्सन्ति, किन्तु ते व्याकरणेन छन्दसा च दोषपूर्णाः सन्ति, तानेव परिष्कृत्योपस्थापयामि पुरतः—

अवस्थानं ज [जा] नुस्पर्शो ऊर्ध्वेक्षणमनन्तरम् ।
वपुस्तुलितपूर्वं हि साष्टाङ्गं नमनं तथा ॥
षष्ठः कशेरुसङ्कोचः कशेरोर्विस्तरस्ततः ।
पुनरूर्ध्वेक्षणादीनां व्युत्क्रमः क्रमशो भवेत् ॥
इत्येतैरासनं कुर्यात् नरः सूर्यनमस्कृतिः ॥

अत्र द्वितीयासनस्य नाम कुलकर्णीमहोदयेन 'जनुनासम्' इति निरूपितमेतेन जानुस्पर्शस्य कयापि रीत्या बोधो न भविष्यति न चापि व्याकरणेन सिद्ध्यति । अग्रे कुलकर्णी 'षष्ठं कशेरुसङ्कोचम्' इति लिखितं तदपि न भविष्यति 'सङ्कोच' शब्दस्य पुंल्लिङ्गे शक्तिः । 'सङ्कोच' मित्यस्य भिन्नार्थे शक्तिः । श्लोकानामन्ते कुलकर्णिपाठो विद्यते 'सूर्यस्योपासनं नरः' अत्र विशेषरूपेण किमुत सर्वांशेन नमस्काराणामेव विवृतिरत उपासनमिति पदं न युक्तमित्यलमधिकेन ।

---

१. संस्कृत-हिन्दी कोश (आप्टे) पृ० १०५६ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परमाणुविचारः

पं० श्रीफुलेश्वरपाठकः, राजगोपालसंस्कृतमहाविद्यालयः, अयोध्या ।

अत्रोपस्थापितानां मतानामनुक्रमणिका—

१—श्रीकणभुग्गौतममतम् ।
२—श्रीवेदव्यासमतम् ।
३—बौद्धमतम् ।
४—श्रीकमलाकरभट्टमतम् ।
५—श्रीशङ्कराचार्यमतम् ।
६—श्रुतिमतम्, श्रीरामानुजाचार्यमतञ्च ।
७—सांख्यमतम् ।
८—व्याकरणैकदेशमतम् ।
९—आधुनिकमतम् ।
१०—मनोविज्ञानदर्शनमतम् ।
११—स्वविचारः ।

अथ परमाणुविचारः

परमाणुस्तावत् कः पदार्थः किंस्वरूपः, अत्र विषये विविधानि मतानि सन्ति ।

प्रथमं तावत् काणभुजमतम् अक्षपादमतञ्च निरूपयामि । उभयोर्मते अणुर्गुणः परिमाणविशेषः परमोऽणुर्यस्मिन् असौ परमाणुः, अथवा अणुशब्दो गुणोपसर्जनद्रव्यवाची मतुब्लुगन्तः, तथा च परमश्चासौ अणुः परमाणुः । स च निरवयवो नित्योऽतीन्द्रियः क्रियावान् चतुर्विधः—पार्थिवो जलीयस्तैजसो वायवीयश्च । मनोऽपि परमाणुरूपम् अनन्तसुखाद्युपलब्धिसाधनमिन्द्रियम् ।

आद्यश्चतुर्विधः पार्थिवादिपरमाणुः कस्मान्निरवयव इति साध्यते । तथाहि—तेषां पार्थिवादीनामवयविनामवयवाः सावयवो अवयवारब्धत्वात्; तथा च त्रसरेणुः सावयवः सावयवारब्धत्वात् तदवयवोऽपि सावयवोऽवयवारब्धत्वात् ततश्च यत्र अवयवानां विश्रान्तिः स परमाणुर्निरवयवो नित्यः । तस्य अनित्यत्वे असम्भवे कार्योत्पत्त्या नित्यत्वम् । सावयवत्वे अवयवपरम्पराकल्पनायामनवस्थापातः, अनवस्थाभिया निरवयवत्वम् । चतुर्विधपरमाणवोऽपि परस्परं भिन्ना अनन्ताः सन्तो व्यावर्तकविशेषाद् नाना परमाणवः, एवं वायवीया जलीयास्तैजसाश्च परमाणवः परस्परं भिन्नाः ।

ईश्वरचिकीर्षया क्रियावन्तो मिलितवन्तोः द्व्यणुकादिक्रमेण त्रसरेणवोः महत्परिमाणविशिष्टाः प्रत्यक्षविषया जायन्ते इति सृष्टिक्रमः ।

परमाणुस्तु अतीन्द्रियोऽणुत्वगुणविशिष्टः, न प्रत्यक्षविषयः । कुतः ? प्रत्यक्षं प्रति महत्परिमाणविशिष्टं द्रव्यं विषयतासम्बन्धेन कारणम् । योगिनो मुनीन्द्रा योगजधर्मैर्यद्यपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रत्यक्षीकुर्वन्ति तथापि अस्मदादीन्द्रियैरगम्या एव परमाणवः, अतोऽतीन्द्रियाः। पार्थिवपरमाणुषु पाकजं रूपादिः, जलीयपरमाणुषु न पाकजम्, तदुक्तम्—

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।
तस्य षष्ठतमो भागः परमाणुरुदीरितः॥

इति श्रीपूज्यपादकाणभुजगौतममतम्।

पूज्यचरणः सर्ववेत्ता सर्वपुराणप्रवक्ता भगवान् श्रीवेदव्यासोऽपि परमाणूनां निरवयत्वम् अतीन्द्रियत्वं श्रीमद्भागवते तृतीयस्कन्धे एकादशाध्यायेऽङ्गीकृतवान्। कार्यस्य भूम्यादेः सृष्टि-विषय उक्तवान्—सतो विशेषाणामंशानां यश्च धर्मोऽन्त्यांशो यस्यांशो नास्ति।

निरवयवः कार्यावस्थामप्राप्तः समुदायावस्थां चाप्राप्तः स परमाणुः। तथा च श्लोका भागवतीयाः—

चरमः सद्विशेषाणामनेकोऽसंयुतस्सदा।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः॥
सत एव पदार्थस्य स्वरूपावस्थितस्य यत्।
कैवल्यं परमो महानविशेषो निरन्तरः॥
एवं कालोऽप्यनुमितः सौक्ष्म्यैस्स्थौल्यैश्च सत्तम।
संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः॥
स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतोऽविशेषभुग् यस्तु स कालः परमो महान्॥
अणुर्द्वौ परमाणू स्यात् त्रसरेणुः त्रयः स्मृताः।

अस्य मते परमाणुद्वयं मिलित्वा एकोऽणुः पदार्थो भवति। तत्र तस्मिन्नणौ परमविशेषणं निवेश्यते। परमविशेषणात् अणुपदार्थभागद्वयमध्ये एकस्यैव भागस्य ग्रहणं भवति। स भागो निरवयवः सोऽप्यतिसूक्ष्मतमः काल एव। अस्य मते सर्वं जगद् यत् किञ्चित् परमात्मान एव उत्पद्यते। निरवयवोऽपि परमाणुर्जन्य एव।

एवं पृथिव्यादिविषयेऽपि पार्थिवादिपरमाणूनां जन्यत्वम्। यद्यपि अत्र मते व्यावहारिकं नित्यत्वं परमाणुषु वर्तत एव 'यस्मिंस्तत्त्वं न विहन्यते तन्नित्यम्' इति नित्यलक्षणलक्षितत्वात् कूटस्थनित्यता परमाणुषु नास्ति। कूटस्थनित्यत्वं तु परमात्मन्येव। अतीन्द्रिय एव परमाणु-रस्यापि मते।

बौद्धा अपि परमाणून् स्वीकुर्वन्ति, तेषां मते परमाणुराशिरेव पृथिव्यादिः पर्वतादिश्च, तैरपि परमाणूनां निरवयवत्वमक्षणिकत्वमङ्गीकृतम्।

श्रीकमलाकरभट्टैस्तत्त्वसिद्धान्ते परमाणूनां गणितेन सावयवत्वं साधितम्, इत्यपि नास्माकं प्रतिकूलं परमाणुविषये न कश्चित् नियतः सिद्धान्तो वर्तते, नापि एकतरपक्षपातिनी युक्तिः स्वस्वशास्त्रानुसारेण स्वस्वानुभवेन स्वस्वपरिभाषया यदि दोषस्स्यात् तर्हि न कोपि दोषः।

श्रीशङ्कराचार्योऽपि जगत्कारणत्वखण्डनाधिकरणे परमाणूनां जगत्कारणत्वं निराकृतम्, किन्तु परमाणुखण्डनं न कृतम्, 'परमाणव एव न सन्ति' इति न प्रतिपादितम्। खण्डनप्रकारेण अतीन्द्रिया अतिसूक्ष्मास्सन्ति परमाणवः कार्यरूपा इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र श्रुतिसिद्धान्तमपेक्ष्य परमाणुवादविषये विचार आरभ्यते। 'परमाणुः' इत्यत्र पदद्वयम् परम-अणुः' इति। तत्र परमत्वं च महति विशेषणे 'अणु' विशेषणे वा उभयत्र उत्कर्षत्वं प्रतिपादयति, अतो विशेषीभूतऽणुपदार्थस्तावद् विचार्यते। तथाहि—

'अणोरणीयान् महतो महीयान्' इति श्रुतौ अणोरणीयानित्युक्तम्, तत्र अणुपदार्थः कः ? अति सूक्ष्मो गुणोपसर्जनद्रव्यवाची शब्दः, तस्माद् गुणप्रकर्षे इयसुनि प्रत्यये उत्कर्षत्वम् अणौ प्रतिपाद्यते, तथा च अणीयानित्यस्य अतिसूक्ष्मवान् इति गम्यते।

श्रीरामानुजाचार्यैः अत्र श्रुतौ अणोः अणीयानिति श्रुत्यंशो जीवेषु योजितः, अत एव—

'बालाग्रशतभागस्य शतधा कल्पितस्य च'

इति श्रुतौ सूक्ष्मोंऽशो दिव्यपदार्थश्चित्पदवाच्योऽङ्गीकृतः। श्रीशङ्कराचार्यैरुक्ताभ्यां श्रुतिभ्यां जीवब्रह्मणोरभेदं वदद्भिः जीवस्य स्वरूपं दुर्विज्ञेयं दुर्लक्ष्यमिति प्रतिपादितम्। अणीयानित्यस्य योऽर्थः स एवार्थः परमाणुशब्दस्य; कुतः अणीयानिति शब्दे इयसुन् प्रत्ययार्थं उत्कर्षाधायकः, परमपदोऽप्युत्कर्षाधायकः।

मनोविज्ञानविषयस्सुखदुःखादिमान् अणीयान् जीवः इति श्रीरामानुजाचार्यसिद्धान्तसङ्गृहीतः। अत्र आचार्यमतभेदो न विचार्यते किन्तु शब्दार्थमात्रः। एषां मते नित्यो निरवयवो जीवादिपरः परमापरो वा अणीयान् परमाणुश्च इति श्रुतिसिद्धान्तः स्वबुद्धया वर्णितो नात्राक्षेपस्यापेक्षादृष्टेर्वा प्रयोजनम्।

सांख्यमते बुद्धिसर्गे अष्टसिद्धिमध्ये अणिमगरिमलघिममहिमादिषु अणुत्वव्यवहारो लघुत्वव्यवहारश्च सूक्ष्मे वस्तुनि तात्पर्यम्, तेषां मते अणुत्वं लघुत्वञ्च जन्यमेव।

सांख्यशास्त्रे पञ्चतन्मात्रापदेन परमाणव एव उच्यन्ते पञ्चतन्मात्रा-शब्दतन्मात्रा-स्पर्शतन्मात्रा-रूपतन्मात्रा-रसतन्मात्रा-गन्धतन्मात्रा एताः पञ्चतन्मात्राः परमाणुरूपा अहंकारादुत्पद्यमाना आकाशादिपञ्चभूतानि उत्पादयन्ति। एषां मतेऽपि परमाणूनां पञ्चतन्मात्राणामतीन्द्रियत्वम्। योगशास्त्रेऽपि सांख्यमतातिरिक्तो विचारो नास्ति।

वैयाकरणा अपि परमाणुवादं स्वीकुर्वन्ति। तथा च—

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः॥

इति वाक्यपदीये श्रीमर्तृहरिणोक्तं वैखरीवाङ्निरूपणे वैखरी परश्रवणगोचरा शब्दविशेषरूपा तस्या विषये मतत्रयमुक्तम्—

(क) वायुरेव शब्दः (ख) अणव एव शब्दाः (ग) ज्ञानमेव शब्दः।

अत्र प्रकृतविषये अणूनां शब्दतन्मात्राणां परमाणूनां चरमाणूनां सर्वशक्तीनां परिणामाः शब्दाख्याः परमाणवः 'शब्द'नामानो भवन्तीत्यर्थः। तथाहि—

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः॥
अणवः सर्वशक्तित्वात् भेदसंसर्गवृत्तयः।
छायातपतमश्शब्दभावेन परिणामिनः॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनेन श्रोत्रग्राह्याः प्रत्यक्षविषया शब्दाख्याः परमाणवो विभव उच्चारणविषया नित्या रेडियोयन्त्रेण सर्वत्र श्रूयमाणाः। अनेन परमाणूनां प्रत्यक्षविषयत्वम् आकाशदेशत्वं सर्वदेशवर्तित्वञ्च सूचितम्, न तु अतीन्द्रियत्वम्।

अत्राधुनिकविज्ञानवादिनां परमोत्कर्षंगतानां पाश्चात्त्यानाम्, तन्मतानुयायिनां भारतीयानाञ्च मतानुसारेण परमाणुविचार आरभ्यते, तथा हि—लन्दननगरे मैनचेस्टरविद्यालये कुशलाध्यापकैर्वैज्ञानिककलानिपुणैः डाल्टनमहोदयैः अतिपरिश्रमेण परमाणुः कस्तावत् इति विचारः कृतः। तेषां महोदयानां मतेऽपि परमाणुपदार्थः रसायनशास्त्ररीत्या सूक्ष्मातिसूक्ष्मतमो निरवयवो विभाज्यः परमाणुरिति निश्चितः। तत आधुनिकैर्वैज्ञानिकैर्विद्युत्परीक्षणकुशलैः तत्र परमाणौ बह्वोंऽशा अति सूक्ष्मास्साधिताः। तैः सावयवत्वं साधितम्, तेषां मतेऽपि परमाणुविषये न कश्चित् निश्चितो विचारो वर्तते। तेऽपि परमाणुषु क्रियां स्वीकुर्वन्ति। नैयायिका अपि क्रियावन्त उत्पतनशीलाः परमाणव इति वदन्ति। आधुनिका अपि वैज्ञानिकाः अतीन्द्रिया एव मन्यन्ते; किन्तु यन्त्रद्वारेण प्रत्यक्षमनुभवन्ति।

एवं मनोविज्ञानविषये नाना मतानि वर्तन्ते। तत्रापि परमाणुत्वव्यवहारो भवति। अतो मनोरूपस्यापि परमाणोर्विचारः प्राकृतः। मनस्तावत् सुखदुःखाद्युपलब्धिकारणम् इन्द्रियं परमाणुरूपं निरवयवम् अति चञ्चलप्रकृतिकं क्रियाश्रयमिति भारतीयदार्शनिकाः। वैज्ञानिका अपि मनोव्यापारविषये बहुविचारं कृतवन्तः। स विचारोऽतिसूक्ष्मातिसूक्ष्मतमः, किन्तु मनस्स्वरूपस्य विचारे तेऽपि न पारंगताः। न्यायदर्शने मनोऽतीन्द्रियं नित्यं निरवयवं सुखदुःखाद्युपलब्धिसाधनमिति। वेदान्तादिदर्शनेऽपि मनसश्चतुर्धा विचारः कृतः।

बुद्धिर्निश्चयात्मिका मनस्संकल्पात्मकम् अहंकारोऽभिमानात्मकः, चित्तं चयनशीलमचेतनं परिणामि चक्षुरादीन्द्रियद्वारा विषयाकारेण परिणतं सावयवपदार्थद्रव्यरूपमिति।

अत्र, आधुनिकविज्ञानशून्यो भारतीयसूक्ष्मदर्शिसर्वज्ञमहर्षिप्रतिपादितवस्तुतत्त्वज्ञानरहिताध्यात्मिकज्ञानशून्यः केवलं शब्दज्ञानमात्रपरायणः शब्दद्वारा समालोचयामि कुतः—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥

इति सिद्धान्तमनुसृत्य परमाणुशब्दो नानार्थो निरवयवो नित्यस्सावयवस्सूक्ष्मोऽतीन्द्रिय इन्द्रियग्राह्यो वा न तु एकरूपेण स्थिरः परमाणुः, इति परमात्मानं प्रणम्य विचारोऽवरुद्धः।

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महाभारते तीर्थभावनाविकासः

डॉ० सरयूप्रसादगुप्तः, एम्० ए०, साहित्यरत्नम्, पी–एच्० डी०, सी० के ४३/६ वाराणसी

यथा अस्याः पत्रिकायाः 'वैदिकसाहित्ये तीर्थभावनाविकासः' इति निबन्धे[1] इदं साधितं यत्तीर्थभावनारम्भो जलादेवाभवत्, ततः पश्चाद् नद्यः, नदीतटस्थानानि, नदीसंगमा वनानि च 'तीर्थम्' इति कथ्यते स्म । तथाहि—

(१) महाभारते नद्युद्गमाः (पर्वतप्रपातस्रोतादयः) नदीलोपस्थानम् (विनशनम्) पुनः प्रकटनस्थानम् (उद्भेदः) समुद्रसङ्गमः समुद्रतटमपि 'तीर्थम्' इत्युच्यते स्म ।

(२) महात्मभिः सेवितान्युपर्युक्तस्थानानि, तैः सेविता आश्रमाः, कुण्डानि, पाठशालाः, यज्ञस्थलानि, कूपाः, सरोवराः, तपोभूमयोऽपि तीर्थशब्देन व्यवह्रियन्ते स्म । उपर्युक्तानि तथ्यानि महाभारतग्रन्थेन सप्रमाणं साधयितुं शक्यन्ते—

यास्तु लोके महानद्यस्ताः सर्वास्तीर्थसंज्ञिकाः ।
तासां प्राक्स्रोतसः श्रेष्ठास्संगमश्च परस्परम् ॥

तासामुभयतः कूलं तत्र तत्र मनीषिभिः ।
देवैर्वा सेवितं देवि तत्तीर्थं परमं स्मृतम् ॥

समुद्रश्च महातीर्थं पावनं परमं शुभम् ।
तस्य कूलगतास्तीर्था महद्भिश्च समाप्लुता ॥

स्रोतसां पर्वतानां च योषितानां महर्षिभिः ।
अपि कूलं तटाकं च सेवितं मुनिभिः प्रिये ॥

तत्तु तीर्थमिति ज्ञेयं प्रभावात् तु तपस्विनाम् ।
तथाप्रभृति तीर्थत्वं लभेल्लोकहिताय वै ॥

एवं तीर्थं भवेद् देवि तस्य स्नानविधिं शृणु । (अनु० पर्व, अ० १४५)

तीर्थानां देवैः सह सम्बन्धः—

महाभारताज्ज्ञायते यद् येषां देवानां यज्ञास्तपांसि वा येषु स्थानेष्वभवन्, तेषां स्थानानां सम्बन्धस्तैर्देवैः सहाभवत्, तथा तेषां भक्त्या स्नानदानतर्पणान्यभवन् तानि तीर्थान्यपि तेषां देवानां नामभिः प्रसिद्धान्यभवन् ।

मूर्तिपूजाबीजम्—

कालान्तरेण तेषां देवानाम्, साङ्केतिकचिह्नानाम्, यज्ञपात्राणाम्, वाद्यानाम्, यज्ञवेदीनाञ्च दर्शनं तेषु स्थानेषु भवितुमारभत ।

---

१. अयं निबन्धः सारस्वत्याः सुषमायाः २८ वर्षे ३-४ अङ्कयोः प्रकाशितः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मूर्तिपूजातीर्थानि

कालान्तरेण मनसि स्थितानां देवानां स्वरूपानुसारेण मूर्तीनां निर्माणस्यारम्भोऽभवत्। यथा वासुदेवः कृष्णः श्यामवर्ण आसीत् तेन तस्य मूर्त्तिः श्यामेनैव प्रस्तरेण निर्मिता। तस्मिन् विष्णुशक्तेरारोपेण चतुर्भुजविष्णुमूर्तिर्वासुदेवस्य मूर्त्तिर्ज्ञायते स्म। अन्यदेवानामप्येवमेव मूर्त्तयो निर्मिता अभवन्। कालान्तरेण मूर्तिभिरेव तीर्थपरिचयोऽभवत्। गौरीमहादेवयोर्मूर्त्तय एकत्रैव प्राप्यन्ते।

यद्यपि मूर्त्तिपूजा देवालयानां प्रतिष्ठा च सिन्धुतटीयसभ्यतायां प्राप्येते, तथापि पारसीका इव वैदिका अपि ते न स्वीचक्रुः, किन्तु उत्तरवैदिकयुग आर्यानार्यमिश्रणेनार्येष्वपि देवमूर्तिपूजा पूजापाठयोश्च भावना प्रचलन्ती आसीत्। अवैदिकदेवानां नागयक्षकुबेरस्वामिकार्तिकेयेत्यादीनां देवालयेषु पूजायाः सार्वजनिकी प्रथा प्रचलन्त्यासीत्। वैदिकदेवानाम्—इन्द्र-ब्रह्म-सवितृ-वरुण-विष्णु-रुद्र-सोमाग्नि-यम-रुद्रपत्नीनां तीर्थानि सर्वप्रथमं प्राप्यन्ते स्म। महाभारततीर्थतालिकाना-मध्ययनेनेदमपि ज्ञायते यत् सर्वप्रथमं वासुदेवस्य (विष्णोः) मूर्त्तयो द्वारिकायां बदरिकाश्रमे स्थापिता आसन्। ततः पश्चादुपर्युक्तवैदिकदेवानां मूर्त्तयस्तीर्थानि शोभन्ते स्म।

अवैदिकदेवानां तीर्थानि

उत्तरवैदिकसाहित्येषु वर्णिता वामनवाराहेत्यादीनामवताराणां कल्पनाप्यनार्यमूला इति ज्ञायते। एवमेव बोध्यते यद् वैदिककालादेव आर्यानार्यमिश्रणारम्भो भवन्नासीत्। ऋग्वेदे हिंसकजन्तूनां सर्पप्रभृतीनां वृक्षोलूखलमूशलेत्यादीनाञ्च सूक्तानामध्ययनेनाऽपि इमा धारणाः प्रकटितास्सन्ति। अतो महाभारते वामनवाराहनागयक्षयक्षिणीवृक्षाणां तीर्थानि लभ्यन्ते।

काश्चिन्नवीना अनार्यभक्तिभावनाश्च

धर्मसूत्रेषु प्राचीनस्मृतिष्वपि वैदिकदेवैः सह नाग-यक्ष-प्रेत-पिशाच-ग्रह-नक्षत्र-मासर्तु-संवत्सर-काल-मातृकेत्यादीनां नामभिः श्राद्धतर्पणविधानानि वर्णितानि सन्ति, अत इदं ज्ञायते यद्धि वैदिककाले वैदिकधर्मस्यैकः प्रतियोगी धर्मः प्रचलन्नासीत्। यस्मिन्नुपर्युक्तदेवानां मान्यता-प्रदानाय नवीनभावना लभ्यते। या भावना अनार्येष्वपि नासीत्। धनपतिकुबेरस्य 'वैश्रवण' इति नाम्ना तर्पणं भवति स्म।

तपःप्रधानस्य मुनिसम्प्रदायस्य सांस्कृतिकधाराया यज्ञप्रधानस्यर्षिसम्प्रदायस्य सांस्कृतिक-परम्परया सह समन्वयेन मुनीनां तपस्थलान्यपि तीर्थानि स्वीकृतानि। मुनिसम्प्रदाये ऋषि-सम्प्रदायादपि तपस्याया अधिकतरभावनायाः कारणाद् वैदिकसम्प्रदाये इयं भावनागच्छत्। उपर्युक्तनवीनदेवानां तीर्थान्यपि महाभारते पुराणेषु च विकसितानि।

जैनतीर्थभावनाविकासः

इदं ज्ञायते यद् वैदिकयज्ञेषु हिंसाभावनाया विरोधे वैदिककालारम्भादेवैको विरोधी सम्प्रदायो हिंसाप्रचारे संलग्न आसीत्। अस्मिन् विरोधिनि सम्प्रदाये चतुर्विंशतिस्तीर्थङ्करा अभवन्। तेषामन्तिमो महावीरस्वामी गौतमबुद्धस्य सामयिक आसीत्। स हिंसोन्मूलने सफलोऽभवत्। पुराणानि ऋषभदेवम् अवतारमिवामन्यन्त; अत ऋषभतीर्थस्यान्येषाञ्च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जैनतीर्थानां यात्रारम्भोऽपि सञ्जातः। वनेषु योगिनस्तपस्विनश्च मांसाहारं नाकुर्वन्। यवनेतिहासकारः 'हिरोडोटसः' (४५० ईशवीयाब्दात् पूर्वम्) इदृशं लिखति।

तीर्थेषु औपनिषद्भावना

हिंसामयकर्मकाण्डविरोधे ज्ञानकाण्डस्यारम्भोऽभवत्। फलतो वैदिकयज्ञं प्रति पुरातनास्थया सहैकः प्रतियोगी दृष्टिकोणोऽपि प्रचलन्नासीत्, किन्तु सार्वजनिकरूपेण सा नादृता, तथापि च समाजस्यैको वर्गस्तत्त्वचिन्तने संलग्नोऽभवत्। ईदृशानाम् ऋषीणां मुनीनाञ्चाश्रमाः, विद्यालयाः, चरित्रस्थलानि च 'तीर्थम्' इति कथितानि।

पूजापाठभावना

उत्तरवैदिककाले देवाः पितरश्च जलेन भोजनेन च तर्प्यन्ते स्म। मनुस्मृतिरपि तु यज्ञान् देवपितृतर्पणसाधनानि आमनुते स्म। शनैः शनैः पुष्पफलाक्षतधूपसुगन्धादयः श्राद्धतर्पणादयोऽपि प्रयुक्ताः, तथा केषाञ्चिन्मन्त्राणां पाठोऽपि प्रचलित आसीत्, अतस्तीर्थेषु पूजापाठयोः प्रथाऽप्यचलत्।

लिङ्गं योनिश्च (अवैदिकम्)

महाभारतस्यान्तिमकालिकायां तीर्थानुक्रमण्यां पुलस्त्यस्य लिङ्गयोन्योः पूजाया आरम्भो मन्यते। मोहनजोदड़ोस्थानस्योत्खनने स्वस्तिकनन्दीपदशक्तीनाञ्च मूर्तयः प्राप्ताः, अतो लिङ्गयोन्योः पूजाऽपि प्राचीना। संसारस्यान्यदेशेषु-एशियामाइनर-मिश्रफिनीशिया-यूनान-मेसोपोटामियादेशेषूत्खननेषु सिन्धुतटीयसभ्यता ह्युद्घाटिताऽस्ति। नैतावदपि संसारस्यान्यदेशेषु योरपामेरिकाश्यामकम्बोडिया-अफगानिस्तानेत्यादिष्वपि लिङ्गानि प्राप्यन्ते स्म, किन्तु महाभारतीयतीर्थेषु लिङ्गपूजा केवलम् एकत्रैव प्राप्यते। निराकारेश्वरस्य तस्य शक्तेश्च प्रतीकयोः समादरभावनासीत्।

ईदृशं महाभारतस्य तीर्थानुक्रमणीषु आर्षानार्षमूलकभावनानां मिश्रणमस्ति, यस्य विकासः पुराणेषु प्राप्यते।

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघुग्रन्थमाला–२३

महावैयाकरणश्रीमद्भट्टोजिदीक्षितविरचितः

गोत्रप्रवरभास्करः

(गोत्रप्रवरनिर्णयः)

सम्पादकः

श्रीउमाशङ्करत्रिपाठी
व्याकरण-धर्मशास्त्राचार्यः, विद्यावारिधिः (पी-एच्. डी.)
अनुसन्धानसहायकः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी–२२१००२ (उ० प्र०)
वै० सं० २०३१

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भूमिका

गोत्रप्रवरावबोधार्थं निर्णयसिन्धु-स्मृतिचन्द्रिका-विधानपारिजातादयोऽनेके ग्रन्था विरचिता-स्सन्ति, यत्र स्थाने स्थाने ऋष्यादिविषयका भेदा दृश्यन्त एव। अतो महावैयाकरणेन भट्टोजिदीक्षितेन सुबोधार्थं कृतस्य "गोत्रप्रवरभास्करः" नामकस्य लघुकायस्य ग्रन्थस्य प्रकाशन-मत्यावश्यकमिति समीक्ष्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य निदेशकैः डॉ० भागीरथप्रसाद-त्रिपाठि-'वागीशशास्त्रि'महोदयैस्तत्सम्पादनकार्यं मह्यं प्रदाय विश्वविद्यालयस्यास्य 'सारस्वती सुषमा' पत्रिकायां तं प्रकाशयित्वा लोकस्योपकारो महान् कृतः। ग्रन्थस्यास्य सरलतयावगमाय भूमिकायामस्यां गोत्रप्रवरसरणिरपि प्रदत्ता विद्यते। दीक्षितकृतिष्वेषा त्रिंशदुत्तरशततमा कृतिः। पञ्चदशोत्तर-सप्तदशशततमे (१७१५ सं०) संवत्सरे भाद्रपदशुक्लाष्टम्यां प्रतिलिपि-रस्या जातेति ग्रन्थान्ते विद्यमानायाः पुष्पिकातोऽवगम्यते।

अत्रानुसन्धानसंस्थाने विश्वविद्यालयस्यास्य सरस्वतीभवनग्रन्थालयाच्चत्वारि हस्तलिखित-पुस्तकानि संगृह्य तेषां क–ख–ग–घेति कृतोपनामिकासु १३२४६ संख्याक (क), १३३९६ संख्याक (ख), ४।१६९ संख्याक (ग), १२०६६ संख्याक (घ) मातृकासु घमातृकां शुद्धामाधृत्य अन्याभिस्तिसृभिर्मातृकाभिः सम्मेलनं शुद्धपाठं च कृत्वा यथास्थानं टिप्पण्योऽपि प्रदत्ताः सन्तीति।

अत्र ग्रन्थे कुत्रचित्—वत्सा विदा आर्ष्टिषेणाश्चेति, अन्यत्र भार्गवौर्वजामदग्न्येति पाठप्रकार उपलभ्यते, स च पाठो यथास्थिति वर्तत इति।

ग्रन्थान्ते—

भट्टोजिभट्टरचितो गोत्रप्रवरनिर्णयः।
गुणगृह्यैर्बुधैः सोऽयमादरेण विभाव्यताम्॥
गोत्रप्रवरसन्देहतमःप्रावृतचेतसाम्।
मोदं तनोतु विदुषां गोत्रप्रवरभास्करः॥

इत्यङ्कितश्लोकेन, तथा ख–पुस्तकान्ते 'इति भट्टोजिदीक्षितविरचितो गोत्रप्रवरभास्करः समाप्तिं वव्राज, इत्युल्लेखेन चायं गोतप्रवरनिर्णयात्मकः 'गोत्रप्रवरभास्करः' नामको ग्रन्थो निर्णीयते। चतुर्मातृकामुखपृष्ठेषु 'गोत्रप्रवरनिर्णयः' इत्युल्लिखितेन 'गोत्रप्रवरनिर्णयः' इतिनामापि ग्रन्थः प्रतीयते, अतो नामद्वयेन ग्रन्थनामद्वयस्योल्लेखः कृतो विद्यते।

ग्रन्थोऽयं निर्णयसिन्धु-स्मृत्यर्थसार-मनुस्मृति-स्मृतिचन्द्रिका-विधानपारिजात-आपस्तम्बधर्म-सूत्रग्रन्थानां साहाय्येन सम्पादितो विद्यते।

ग्रन्थविषयः

यद्यपि महर्षिणा पाणिनिना "अपत्यं पौत्रप्रभृति गोत्रम्" (४।१।१६२) सूत्रेण पौत्र-प्रभृतीनां गोत्रत्वं स्वीकृतम्, तथापि दीक्षितेन पुत्रप्रभृतीनां ग्रहणं यथा स्यादिति पारिभाषिकं गोत्रलक्षणमत्र ग्रन्थे प्रदर्शितम्। तद्यथा—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"सप्तर्षयोऽगस्त्याष्टमं तदपत्यं च गोत्रम्" । इति ।

तथा चामरे—

सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायस्सन्तानो वर्णाः स्युर्ब्राह्मणादयः ॥ इति ।
(अमरः २।७।१४)

सप्तर्षयश्चोक्ता ब्रह्मपुराणे—

अत्रिर्वसिष्ठो भगवान् कश्यपश्च महानृषिः ।
गौतमोऽथ भरद्वाजो विश्वामित्रस्तथैव च ॥
तथैव पुत्रो भगवानृचीकस्य महात्मनः ।
सप्तमो जमदग्निश्च ऋषयस्साम्प्रतं दिवि ॥
(ब्र० पु० ५।३४-३५)

एवमेव ग्रन्थे प्रवरलक्षणमपि कृतम् । तद्यथा—

"प्रव्रियन्ते होत्रध्वर्युभ्यामुत्कीर्यन्त इति प्रवराः" इति । अत्र प्रोपपदाद् वृञ् वरणे धातोः "ऋदोरप्" (३।३।५७) इति कर्मणि अप् प्रत्ययः ।

'अध्वर्यूद्गातृहोतारो यजुस्सामर्ग्विदः क्रमात्' इत्यमरोक्तत्वाद् होता ऋग्वेदज्ञोऽध्वर्युश्च यजुर्वेदज्ञः कथ्यते । आभ्यां य उत्कीर्यन्ते विस्तीर्यन्ते ते प्रवरा गणा वा भवन्ति । इत्थं च समानप्रवरया समानगोत्रया च सह विवाहो नेष्यते । तत्र भृगुगणेष्वङ्गिरोगणेषु च प्रवरसमानता पञ्चप्रवराणां त्रिषु, त्रिप्रवराणां च द्वयोर्गृह्यते । अतः पञ्चप्रवरेषु त्रिप्रवरसमानत्वात् त्रिप्रवरेषु च द्विप्रवरसमानत्वाच्च नोद्वाहः । तथा शेषगणेष्वेकप्रवरसमानत्वात् केवलमेक एव प्रवरो विवाहे वर्ज्यः । इत्थमेव ग्रन्थेऽत्र परिभाषोक्ता—

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वार्यते ॥ इति ।

एतत्परिभाषानुसारं प्रवराः (गणाः) कुलक्रमागता उपदिष्टाः, ये च ऊनपञ्चाशत्-संख्याकाः (४९) सन्ति ।

तथा च श्रीधराचार्यकृते स्मृत्यर्थसारेऽप्युक्तम्—

अथाऽत्र गोत्रप्रवरनिर्णयो वर्ण्यतेऽञ्जसा ।
जमदग्निभरद्वाजविश्वामित्रात्रिगौतमाः ॥
वसिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः ।
एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते ॥
म्रियमाणतया वाऽपि सत्तया वाऽनुवर्तनम् ।
एकस्य दृश्यते यत्र तद् गोत्रं तस्य कथ्यते ॥
समानमुनिभूयस्त्वमेकप्रवरतामपि ।
समानप्रवरत्वं च द्वेधा बौधायनोऽब्रवीत् ॥
मुनिप्रणीतप्रवरैरूनपञ्चाशता वयम् ।
अनन्तान्यपि गोत्राणि वर्गीकृत्याऽभिदध्महे ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र "अर्शआदिभ्योऽच्" (५।२।१२७) सूत्रेण मतुबर्थोऽज्विधानात् 'प्रवराः' पदेन प्रवरवन्तः (गणवन्तः) इत्यर्थो ग्राह्यः, यत ऊनपञ्चाशत्संख्याकानाम् ऋषीणां भृग्वाद्यपत्यत्वाद् गोत्रत्वं तेषाम्, अत एव गोत्रप्रवरविवेचने निर्णयसिन्धौ "ऋषेरिदमार्षम् प्रवरः" । प्रवरमञ्जर्यां बौधायनः—

विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
अत्रिर्वसिष्ठः कश्यप इत्येते सप्त ऋषयः ॥

सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद् गोत्रम् । माधवीये स्मृत्यन्तरे—

पञ्चार्षे त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
भृग्वङ्गिरोगणेष्वेव शेषेष्वेकोऽपि वारयेत् ॥

शेषगोत्रेषु एकोऽपि समानः प्रवरो विवाहं वारयेदित्यर्थः" इत्युक्तम् ।

अत्र भृगूणाम् १. वत्साः, २. विदाः, ३. आर्ष्टिषेणाः, ४. यस्काः, ५. मित्रयवः, ६. वैन्याः, ७. शुनकाश्चेति सप्त गोत्रगणाः प्रदर्श्यन्ते यत्राद्यास्त्रयो जामदग्न्याः, शेषाश्चत्वारः शुद्धभृगवः कथ्यन्ते । ते च सर्वे दीक्षितकृत्यनुसारं सौविध्यर्थं निम्नाङ्कितया निर्मितगोत्रप्रवर-सरण्याऽवधेयाः ।

गोत्रप्रवरसरणिः

भृगवः (ऐषां गोत्रगणाः सप्त)

|

जामदग्न्याः (त्रिसंख्याकाः)

१. वत्साः	२. विदाः	३. आर्ष्टिषेणाः
भार्गवाः, च्यावनाः, आप्नवानाः और्वाः, जामदग्न्याः (पञ्च प्रवराः)	भार्गवाः, च्यावनाः, आप्नवानाः, और्वाः, विदाः, (पञ्च प्रवराः)	भार्गवाः, च्यावनाः, आप्नवानाः, आर्ष्टिषेणाः, अनूपाः (पञ्च प्रवराः)
अथवा—	अथवा—	अथवा—
भार्गवाः, और्वाः, जामदग्न्याः (त्रयः प्रवराः)	भार्गवाः, और्वाः, जामदग्न्याः (त्रयः प्रवराः)	भार्गवाः, आर्ष्टिषेणाः, अनूपाः (त्रयः प्रवराः)

एषां त्रयणां वत्सादीनां जामदग्न्यानां परस्परमविवाहः ।

निर्णयसिन्धौ वत्सानां त्रिषु प्रवरेषु वैकल्पिकेषु 'भार्गवच्यावनाप्नवानेति वा' इत्येको विकल्पोऽपि दत्तः । तथा विदानां पञ्चप्रवरेषु 'विदाः' इत्यस्य स्थाने वैदा इति, एवं वत्साः, विदा द्वावेवेमौ जामदग्न्यौ ।

[अश्वलायनश्रौतसूत्रे—आम्नातानाम् (उपदिष्टानाम्) जामदग्न्यानां पञ्च प्रवराः । ते च १–भार्गवाः, २–च्यावनाः, ३–आप्नवानाः, ४–और्वाः, ५–जामदग्न्या इति । गोत्रैक्यात् प्रवरैक्याच्च एषां परस्परमविवाहः] किन्त्वयमधिकः पाठः केवलं ख–पुस्तके विद्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ग्रन्थान्तरेऽज्जामदग्न्याः—

वत्साः	वत्सपुरोधसौ	वैजवनिमथितौ
भार्गवाः, च्यावनाः, आप्नवानाः (त्रयः प्रवराः)	भार्गवाः, च्यावनाः, आप्नवानाः वात्साः, पौरोधसाः (पञ्च प्रवराः)	भार्गवाः, च्यावनाः, आप्नवानाः, वैजवाः, नैमथिताः (पञ्च प्रवराः)

एषां प्रवरसाम्याज्जामदग्न्यैः सहाविवाहः ।

शुद्धभृगवः (चतुःसंख्याकाः)

४. यस्काः	५. मित्रयवः	६. वैन्याः	७. शुनकाः
भार्गवाः, वैतहव्याः, सावेदसाः (त्रयः प्रवराः)	भार्गवाः, दैवोदासयः वाध्र्यश्वाः (त्रयः प्रवराः)	भार्गवाः, वैन्याः, पार्थाः (त्रयः प्रवराः)	शौनकाः गार्त्समदा वा (एकः प्रवरः) अथवा— भृगुः, गृत्समदः (द्वौ प्रवरौ) अथवा— भार्गवाः, शौनहोत्राः, गार्त्समदाः; भार्गवाः गार्त्समदा शौनका वा (त्रयः प्रवराः)

एषां चतुर्णाम् (शुद्धभृगूणाम्) परस्परं विवाहः ।

क्वचिदधिकं गणद्वयम्—

१. वेदविश्वज्योतिषः	२. शाठरमाठराः
भार्गवाः, वैदाः, वैश्वज्योतिषः (त्रयः प्रवराः)	भार्गवाः, शाठराः, माठराः (त्रयः प्रवराः)

निर्णयसिन्धौ शुद्धभृगुषु 'मित्रयवः' इत्यस्य स्थाने मित्रयुवेति लिखितम् । तथा तेषां मित्रयूनां त्रिषु प्रवरेषु 'दैवोदासयः' इत्यस्य स्थाने दिवोदासेति लिखितम् । एवं तेषां त्रिषु प्रवरेषु "भार्गवच्यावनदिवोदासेति वा; वाध्र्यश्वेत्येको वा" इति द्वौ विकल्पावपि प्रदत्तौ । इदमप्युल्लिखितं यद् यस्कादीनां स्वगणं त्यक्त्वा सर्वैर्विवाहः । तदुक्तं स्मृत्यर्थसारे—

यस्का मित्रयुवा वैन्याः शुनकाः प्रवरैक्यतः ।
स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः ॥ इति ।

भृगोः सप्त गणा निर्णीताः

—०—

अङ्गिरसां षोडश गोत्रगणाः सन्ति । तत्र गौतमाङ्गिरसां सप्त गोत्रगणाः, भरद्वाजाङ्गिरसां चत्वारो गोत्रगणाः, तथा केवलाङ्गिरसां पञ्च गोत्रगणा आसते, ते च प्रदर्श्यन्ते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथाङ्गिरसः (षोडश गोत्रगणाः)

गौतमाङ्गिरसः (सप्त गोत्रगणा बौधायनमतेन)

१	२	३	४	५	६	७
आयास्याः	शरद्वन्तः	कौमण्डाः	दीर्घतमसः	कारेणुपालयः	वामदेवाः	औशनसाः
आङ्गिरसाः,	आङ्गिरसाः,	आङ्गिरसाः,	आङ्गिरसाः,	आङ्गिरसाः,	आङ्गिरसाः,	आङ्गिरसाः,
आयास्याः,	गौतमाः,	औतथ्याः,	औतथ्याः,	गौतमाः,	गौतमाः,	औशनसाः,
गौतमाः	शारद्वताः	काक्षीवताः,	काक्षीवताः,	कारेणुपालाः	वामदेवाः	गौतमाः
(त्रयः प्रवराः)	(त्रयः प्रवराः)	गौतमाः,	गौतमाः,	(त्रयः प्रवराः)	(त्रयः प्रवराः)	(त्रयः प्रवराः)
		कौमण्डाः	दीर्घतमसाः			
		(पञ्च प्रवराः)	(पञ्च प्रवराः)			

सूत्रान्तरेषु अन्ये सप्त गौतमाङ्गिरस उक्ताः । ते चेत्थम्--

आपस्तम्बसूत्रे--(१) औचथ्यगौतमाः

आङ्गिरसाः, औचथ्याः, गौतमाः
(त्रयः प्रवराः)

(२) औशिजाः

आङ्गिरसाः, औशिजाः, काक्षीवताः
(त्रयः प्रवराः)

लौगाक्षिसूत्रे--(३) आयास्यौशिजगौतमाः ।

आङ्गिरसा, आयास्याः, औशिजाः, गौतमाः, काक्षीवताः (पञ्च प्रवराः)

आश्वलायनसूत्रे--

(४) रहूगणाः	(५) सोमराजकयः	(६) बृहदुक्थ्याः	(७) कक्षीवन्तः
आङ्गिरसाः, राहूगण्याः, गौतमाः (त्रयः प्रवराः)	आङ्गिरसाः, सोमराज्याः, गौतमाः (त्रयः प्रवराः)	आङ्गिरसाः, बार्हदुक्थ्याः, गौतमाः (त्रयः प्रवराः)	आङ्गिरसाः, औचथ्याः, गौतमाः औशिजाः, कक्षीवताः (पञ्च प्रवराः)

सर्वेषामेषां गौतमानां परस्परमविवाहः, गोत्रैक्यात् प्रायेण प्रवरैक्याच्च ।

निर्णयसिन्धौ गौतमाः दश--१. आयास्याः, २. शरद्वन्ताः ३. कौमण्डाः, ४. दीर्घतमसः, ५. औशनसाः, ६. कारेणुपालयः, ७. राहूगणाः, ८. सोमराजकाः, ९. वामदेवाः, १०. बृहदुक्थाः । क्वचिदधिकं गणद्वयम् (क) उतथ्याः, (ख) औशिजा इति । एषां गौतमानामविवाहः ।

एवमेव चतुर्भरद्वाजानां षट्केवलाङ्गिरसां च प्रवरादिविवेचनमग्रे करिष्यते । गौतमभरद्वाजाभ्यामपि गौतमाङ्गिरसो भरद्वाजाङ्गिरस एव ग्राह्याः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भरद्वाजाङ्गिरसः (चत्वारो गोत्रगणाः)

८. भरद्वाजाः	९. रौक्षायणाः	१०. गर्गाः	११. कपयः
आङ्गिरसाः, वार्हस्पत्याः, भारद्वाजाः (त्रयः प्रवराः)	आङ्गिरसाः, वार्हस्पत्याः, भारद्वाजाः, वान्दनाः मातवचसाः (पञ्च प्रवराः)	आङ्गिरसाः, वार्हस्पत्याः, भारद्वाजाः, गार्ग्याः सैन्याः (पञ्चप्रवराः) अथवा— भारद्वाजाः, सैन्याः, गार्ग्याः (त्रयः प्रवराः) अथवा— आङ्गिरसाः, सैन्याः, गार्ग्याः (त्रयः प्रवराः) अथवा— आङ्गिरसाः, तैत्तिराः, कापिभुवाः (त्रयः प्रवराः)	आङ्गिरसाः, आमहीयवाः औरुक्षयसाः, (त्रयः प्रवराः) अथवा— आङ्गिरसाः, वार्हस्पत्याः, भारद्वाजाः, (त्रयः प्रवराः) अथवा— आङ्गिरसाः, वार्हस्पत्याः, कापयाः (त्रयः प्रवराः)

चतुर्णामेषां भारद्वाजानां परस्परमविवाहः, गोत्रैक्यात् प्रायेण प्रवरैक्याच्च ।

निर्णयसिन्धौ भरद्वाजाः चत्वारः—१. भरद्वाजाः, २. गर्गाः, ३. ऋक्षाः, ४. कपयश्चेति । भरद्वाजानां सर्वेषां परस्परमविवाहो निर्णीयते । भरद्वाजाङ्गिरसां चतुर्षु गोत्रगणेषु यत् 'रौक्षायणाः' इत्युक्तं तत्र निर्णयसिन्धौ 'ऋक्षाः' इत्युल्लिखितम् ।

केवलाङ्गिरसः (पञ्च गोत्रगणाः)

१२. विष्णुवृद्धाः	१३. कण्वाः	१४. हरिताः	१५. रथीतराः	१६. मुद्गलाः
आङ्गिरसाः, पौरुकुत्स्याः, त्रासदस्यवाः (त्रयः प्रवराः)	आङ्गिरसाः, आनमीढाः, काण्वाः (त्रयःप्रवराः) अथवा— आङ्गिरसाः, घोराः, काण्वाः (त्रयःप्रवराः)	आङ्गिरसाः, आम्बरीषाः, यौवनाश्वाः (त्रयः प्रवराः) अथवा— मान्धात्राः, आम्बरीषाः, यौवनाश्वाः (त्रयःप्रवराः)	आङ्गिरसाः, वैरूपाः, राथीतराः (त्रयः प्रवराः) अथवा— आङ्गिरसाः, वैरूपाः, पार्षदश्वाः (त्रयः प्रवराः)	आङ्गिरसाः, भार्म्यश्वाः, मौद्गल्याः (त्रयःप्रवराः) अथवा— ताक्ष्याः, भार्म्यश्वाः, मौदगल्याः (त्रयः प्रवराः)

पञ्चानामेषां केवलाङ्गिरसां स्वस्वगणं हित्वाऽन्यैः सह विवाह इष्टः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निर्णयसिन्धौ केवलाङ्गिरसः षट्—१. हारिताः, २. कुत्साः, ३. कण्वाः, ४. रथीतराः, ५. मुद्गलाः, ६. विष्णुवृद्धा इति । एषां स्वगणं विहाय सर्वैर्विवाहो भवतीत्युक्तम् ।

क्वचिदन्येऽपि केवलाङ्गिरसः । ते यथा—

१—कुत्साः

आङ्गिरसाः, मान्धातारः, कौत्साः (त्रयः प्रवराः)

आश्वलायनेन हरितकुत्सपिङ्गशङ्खदर्भभैमगवानां सर्वप्रवरसाम्योक्तत्वादेषां हरितैः सहाविवाहः ।

२—पृषदश्वाः

आङ्गिरसाः, पार्षदश्वाः, वैरूपाः (त्रयः प्रवराः)

अथवा

अष्टादंष्ट्राः, पार्षदश्वाः, वैरूपाः (त्रयः प्रवराः)

एषां प्रवरद्वयसाम्याद् रथीतरैः सहाविवाहः ।

अङ्गिरसः षोडश गोत्रगणा निर्णीताः ।

—०—

अथात्रयः (चत्वारो गोत्रगणाः)

१. आद्यात्रयः	२. गविष्ठिराः	३. वाद्भूतकाः	४. मुद्गलाः
आत्रेयाः, आर्चनानसाः, श्यावाश्वाः (त्रयः प्रवराः)	आत्रेयाः, आर्चनानसाः, गाविष्ठिराः (त्रयः प्रवराः) अथवा आत्रेयाः, गाविष्ठिराः, पौर्वातिथाः (त्रयः प्रवराः)	आत्रेयाः, आर्चनानसाः, वाद्भूतकाः (त्रयः प्रवराः)	आत्रेयाः, आर्चनानसाः पौर्वातिथाः (त्रयः प्रवराः)

चतुर्णामेषामत्रीणां परस्परमविवाहः ।

ग्रन्थान्तरे—

१. अतिथयः	२. धनञ्जयाः	३. सुमङ्गलाः
आत्रेयाः, आर्चनानसाः, आतिथाः (त्रयः प्रवराः)	आत्रेयाः, आर्चनानसाः, धानञ्जयाः (त्रयः प्रवराः)	अत्रयः, सुमङ्गलाः, श्यावाश्वाः (त्रयः प्रवराः)

अत्रिवंशा निर्णीताः ।

—०—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ कश्यपाः (त्रयो गोत्रगणाः)

- १. निध्रुवाः
  - काश्यपाः, आवत्साराः, नैध्रुवाः (त्रयः प्रवराः)
- २. रेभाः
  - काश्यपाः, आवत्साराः, रैभ्याः (त्रयः प्रवराः)
- ३. शण्डिलाः
  - काश्यपाः, आवत्साराः, शाण्डिल्याः (त्रयः प्रवराः)
  - अथवा— काश्यपाः, आवत्साराः, दैवलाः (त्रयः प्रवराः)
  - अथवा— काश्यपाः, आवत्साराः, आसिताः (त्रयः प्रवराः)
  - अथवा— शाण्डिलाः, आसिताः, दैवलाः (त्रयः प्रवराः)
  - अथवा— काश्यपाः, आसिताः, दैवलाः (त्रयः प्रवराः)
  - अथवा— दैवलाः, आसिताः (द्वौ प्रवरौ)

त्रयाणामेषां कश्यपानां परस्परमविवाहः ।

निर्णयसिन्धौ कश्यपानां पञ्च गोत्रगणाः—१. निध्रुवाः, २. कश्यपाः, ३. शाण्डिलाः, ४. रैभाः, ५. लौगाक्षय इति ।

कश्यपानां त्रयो गोत्रगणा निर्णीताः ।

—०—

अथ वसिष्ठाः (चत्वारो गोत्रगणाः)

- १. वसिष्ठाः
  - वासिष्ठाः (एकः प्रवरः)
- २. कुण्डिनाः
  - वासिष्ठाः, मैत्रावरुणाः, कौण्डिन्याः (त्रयः प्रवराः)
- ३. उपमन्यवः
  - वासिष्ठाः, ऐन्द्रप्रमदाः, आभरद्वसवः (त्रयः प्रवराः)
- ४. पराशराः
  - वासिष्ठाः, शाक्त्याः, पाराशर्याः (त्रयः प्रवराः)

एषां चतुर्णां वसिष्ठानां परस्परमविवाहः ।

निर्णयसिन्धौ 'जातूकर्ण्याः' इति पञ्चमगोत्रगणान् संगृह्य पञ्च वसिष्ठा वर्णिता । तथा चतुर्थेषु पाराशरगणेषु 'शाक्त्याः' इत्यस्य स्थाने 'शाक्याः' इत्युल्लिखितम् ।

वसिष्ठगणा निर्णीताः

—०—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ विश्वामित्राः (दश गोत्रगणाः)

(१) कुशिकाः, — विश्वामित्राः, देवराताः, औदलाः (त्रयः प्रवराः)

(२) रोहिताः, — विश्वामित्राः, अष्टकाः, रौहिताः (त्रयः प्रवराः) अथवा— विश्वामित्राः, माधुच्छन्दसाः, अष्टकाः (त्रयः प्रवराः) अथवा— विश्वामित्राः, अष्टकाः (द्वौ प्रवरौ)

(३) रौक्षकाः, — वैश्वामित्राः, रौक्षकाः, रैवणाः (त्रयः प्रवराः) अथवा— वैश्वामित्राः, गाथिनाः, रैवणाः (त्रयः प्रवराः)

(४) कामकायनाः, — वैश्वामित्राः, दैवश्रवसाः, दैवतरसाः (त्रयः प्रवराः)

(५) धनञ्जयाः — वैश्वामित्राः, माधुच्छन्दसाः, धानञ्जयाः, (त्रयः प्रवराः) अथवा— वैश्वामित्राः, माधुच्छन्दसाः, अघमर्षणाः, (त्रयः प्रवराः)

(६) कताः — वैश्वामित्राः, कात्याः, आत्किलाः (त्रयः प्रवराः)

(७) अजाः — वैश्वामित्राः, माधुच्छन्दसाः, आजाः (त्रयः प्रवराः)

(८) अघमर्षणाः — वैश्वामित्राः, आघमर्षणाः, कौशिकाः (त्रयः प्रवराः)

(९) पूरणाः — वैश्वामित्राः, पौरणाः (द्वौ प्रवरौ)

(१०) इन्द्रकौशिकाः — वैश्वामित्राः, ऐन्द्रकौशिकाः, (द्वौ प्रवरौ)

एषां दशानां विश्वामित्राणां परस्परमविवाहः ।

क्वचित् त्वन्येऽपीमे विश्वामित्रा उक्ताः—

(१) अजाः — वैश्वामित्राः, आश्मरथ्याः, वान्धुलाः (त्रयः प्रवराः)

(२) कुशिकाः — वैश्वामित्राः, आश्मरथ्याः, बान्धुलाः (त्रयः प्रवराः)

(३) हर्यश्वाः — विश्वामित्राः, गाथिनाः, रैणवाः (त्रयः प्रवराः)

(४) वेणवः — विश्वामित्राः, गाथिनाः, वैणवाः (त्रयः प्रवराः)

(५) शालङ्कायनः — वैश्वामित्राः, शालङ्कायानाः, कौशिकाः (त्रयः प्रवराः)

(६) रौहिणाः — वैश्वामित्राः, माधुच्छन्दसाः, रौहिणाः (त्रयः प्रवराः)

(७) कथकाः — वैश्वामित्राः, काथकाः, क्राथकाः (त्रयः प्रवराः)

(८) साहुलाः — वैश्वामित्राः, साहुलाः, माहुलाः (त्रयः प्रवराः)

(९) हिरण्यरेतसः — वैश्वामित्राः, हैरण्यरेतसाः, (द्वौ प्रवरौ)

(१०) सुवर्णरेतसः — वैश्वामित्राः, सौवर्णरेतसाः, (द्वौ प्रवरौ)

(११) कपोतरेतसः — वैश्वामित्राः, कापोतरेतसाः, (द्वौ प्रवरौ)

(१२) घृतकौशिकाः — वैश्वामित्राः, घृतकौशिकाः (द्वौ प्रवरौ)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निर्णयसिन्धौ विश्वामित्राणां दशगणेषु द्वितीयगणे 'रोहिताः' इत्यस्य स्थाने 'लोहिताः' तथा चतुर्थगणे 'कामकायनाः' इत्यस्य स्थाने च 'कामायनाः' इत्युल्लिखितं विद्यते ।

विश्वामित्रगणा निर्णीताः ।

—०—

अथागस्तयः (चत्वारो गोत्रगणाः)

१. इध्मवाहाः — आगस्त्याः, दार्ढच्युताः, ऐध्मवाहाः (त्रयः प्रवराः)

२. साम्भवाहाः — आगस्त्याः, दार्ढच्युताः, साम्भवाहाः (त्रयः प्रवराः)

३. सोमवाहाः — आगस्त्याः, दार्ढच्युताः, सौमवाहाः (त्रयः प्रवराः)

४. यज्ञवाहाः — आगस्त्याः, ढार्ढच्युताः, याज्ञवाहाः (त्रयः प्रवराः)

अथवा—

आगस्त्याः

(एकः प्रवरः)

चतुर्णामेषामगस्तीनां परस्परमविवाहः ।

कात्यायनसूत्रे—

१—पुलस्त्यपुलहक्रतवः — आगस्त्याः, माहेन्द्राः, मायोभुवाः (त्रयः प्रवराः)

२—पौर्णमासाः — आगस्त्याः, पौर्णमासाः, पारणाः (त्रयः प्रवराः)

३—दर्भवाहाः — आगस्त्याः, दार्ढच्युताः, दार्भवाहाः (त्रयः प्रवराः)

४—शुकहंसाः — आगस्त्याः, हैमचर्वयः, हैमोदकाः (त्रयः प्रवराः)

५—पाणिकाः — आगस्त्याः, वैनायकाः, पाणिकाः (त्रयः प्रवराः)

अगस्तिगणा निर्णीताः

—०—

तदेवं परिगणनात्—भृगवः ७, अङ्गिरसः १६, वक्ष्यमाणेषु द्व्यामुष्यायणेषु सङ्कृती-नामङ्गिरसां गणः १, अत्रयः ४, कश्यपाः ३, वसिष्ठाः ४, विश्वामित्राः १०, अगस्तयः ४, तथा संकलनया ७ + १६ + १ + ४ + ३ + ४ + १० + ४=४९ ऊनपञ्चाशद् गोत्रगणाः सन्ति ।

अथ द्व्यामुष्यायणाः

अमुष्य अपत्यानीति आमुष्यायणाः । अत्रादस्-शब्दादपत्येऽर्थे नडादिभ्यः फगिति सूत्रेण फक्प्रत्यये "आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च" वार्तिकेन षष्ठीविभक्तेरलुकि आयनेयीति फस्यायनादेशे आमुष्यायणशब्दसिद्धिर्भवति । द्वयोरामुष्यायणा इति षष्ठीतत्पुरुषाद् द्व्यामुष्यायणा दत्तकाः पुत्रा भवन्तीति । ते च यथा—

१—देवराताः — विश्वामित्राः, दैवराताः, औदलाः (त्रयः प्रवराः)

२—शौङ्गशैशिरयः — आङ्गिरसाः, बार्हस्पत्याः, भारद्वाजाः, कात्याः, आत्कीलाः (पञ्च प्रवराः)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथवा—

आङ्गिरसाः, बार्हस्पत्याः, भारद्वाजाः, शौङ्गाः, शैशिराः (पञ्च प्रवराः)

अथवा—

आङ्गिरसाः, कात्याः, आत्कीलाः (त्रयः प्रवराः)

अथवा—

भारद्वाजाः, कात्याः, आत्कीलाः (त्रयः प्रवराः)

एषां विश्वामित्रभरद्वाजाभ्यां नोद्वाहः ।

३—कताः

विश्वामित्राः, कात्याः, आत्कीलाः (त्रयः प्रवराः)

एषामपि विश्वामित्रभरद्वाजाभ्यामविवाहः ।

४—कपिलाः

आङ्गिरसाः, बार्हस्पत्याः, भारद्वाजाः, वान्दनाः, मातवचसाः (पञ्च प्रवराः)

एषामपि विश्वामित्रभरद्वाजाभ्यां सहाविवाहः ।

५—वामरथ्याः

आत्रेयाः, वामरथ्याः, पौत्रिकाः (त्रयः प्रवराः)

एषाम् अत्रिविश्वामित्राभ्यां सहाविवाहः ।

६—धनञ्जयाः

वैश्वामित्राः, माधुच्छन्दसाः, धानञ्जयाः (त्रयः प्रवराः)

एषामप्यत्रिविश्वामित्राभ्यां नान्वयः ।

७—जातूकर्ण्याः

वासिष्ठाः, आत्रेयाः, जातूकर्ण्याः (त्रयः प्रवराः)

एषामत्रिवसिष्ठाभ्यां सहाविवाहः ।

८—सङ्कृतयः

आङ्गिरसाः, गौरिवीताः, साङ्कृत्याः (त्रयः प्रवराः)

अथवा—

शाक्तपाः, गौरिवीताः, साङ्कृत्याः (त्रयः प्रवराः)

एषां स्वगणस्थैस्तथा वसिष्ठैः काश्यपैश्च न सम्बन्धः ।

ननु केवलाङ्गिरसामिव एषां स्वगणस्थैः सह विवाहाभावात् केवलाङ्गिरोमध्ये पाठः कर्तव्य इति चेन्न, फलाभावात् ।

९—पूतिमाषाः

आङ्गिरसाः, गौरिवीताः, साङ्कृत्याः (त्रयः प्रवराः)

अथवा—

शाक्तपाः, गौरिवीताः, साङ्कृत्याः (त्रयः प्रवराः)

१०—लौगाक्षयः

काश्यपाः, आवत्साराः, वासिष्ठाः (त्रयः प्रवराः)

अथवा—

वासिष्ठाः, आवत्साराः, काश्यपाः (त्रयः प्रवराः)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एषामपि सङ्कृतिवत् स्वगणस्थैस्तथा
वसिष्ठैः कश्यपैश्चाविवाहः ।

अथ दत्तकानां श्राद्धकरण-रिक्थग्रहणविषयकं विवेचनम्

अत्राद्यतनानामपि दत्तकानामुत्पादकपितुः परिगृहीतृपितुश्चोभयसगोत्रैर्नोद्वाहः, उत्पादक-परिगृहीत्रोरुभयोः सगोत्रत्वात् । उभयसगोत्रत्वेऽपि दत्तकपुत्रः परिगृहीतुरेव गोत्ररिक्थे भजते, नोत्पादकस्य । तथा च मनुराह—

गोत्ररिक्थे जनयितुर्न हरेद् दत्रिमः क्वचित् ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥
(मनु० ९।१४२)

मनोरयमभिप्रायः—दत्रिमः (दत्तकः) पुत्र उत्पादकपितुर्गोत्ररिक्थे (गोत्रधने) न भजते, अर्थात् परिगृहीतुरेव स ते गृह्णाति । यतः पिण्डो गोत्ररिक्थानुगो भवति, अतो जनयितुः पिण्डश्राद्धाद्यपि कर्तुमशक्यो भवतीति । मनुवचने 'दत्रिमो जनयितुर्गोत्ररिक्थे न हरेत्' इत्यत्र 'गोत्ररिक्थे' इत्यस्येदं तात्पर्यं यद् दत्तकस्य जनयितृगोत्रत्वाद् यथा तद्धनाग्राहकत्वम्, तथैव तत्सगोत्रकन्यकाया अप्यग्राहकत्वम् । अत एव मनुनोक्तम्—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥
(मनु० ३।५)

'असगोत्रा च या पितुः' इत्यत्र पितृग्रहणस्योक्तमेव प्रयोजनं स्मृतिचन्द्रिकायाः संस्कार-काण्डे देवणभट्टेनापि प्रदर्शितम् । तद् यथा—

"तथा च मनुः—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

या परिणेतुर्मातुश्च सपिण्डा न भवति, या परिणेतुः पितुश्च न सगोत्रा सा च विवाह-कर्मणि प्रशस्तेत्यर्थः ।

ननु च माता दानसमकालमेव पितृसापिण्ड्यं तद्गोत्रं च हित्वा पतिसापिण्ड्यं तद्गोत्रं च प्रतिपद्यते, तत् कथम् 'असपिण्डा च या मातुः' इति । तदुक्तम्—

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके । इति ।

पतिसपिण्डैरेव पत्न्यास्सापिण्ड्यम्, न स्वपित्रादिभिरित्यभिप्रायः । सत्यम् । नास्ति मातु-स्स्वपित्रादिभिस्सह सापिड्यं यदि तस्यास्त्यागपूर्वकं विवाहस्स्यात् । त्यागे हि स्वत्वनिवृत्तिवत् सापिड्यसगोत्रत्वयोरपि निवृत्तिः । अनेनैवाभिप्रायेणोक्तम्—

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके । इति ।

अत एव दत्तपुत्रादेस्त्यागेनैव पितृगोत्रादिनिवृत्तिस्सिद्धा । अन्यथा 'असगोत्रा च या पितुः' इत्यत्र पतिग्रहणमनर्थकं स्यात् । उक्तं च गोत्रादिनिवृत्तिर्मनुना—गोत्ररिक्थे जनयितुः.....।' एवं च पुत्रिकाया विवाहो नैव प्रदानपूर्वक इति न तत्र सापिण्ड्यसगोत्रत्वयोर्निवृत्तिः ।" इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनेनैवाशयेन अनन्तभट्टविरचिते विधानपारिजाते तृतीयस्तबकेऽप्युक्तम्—

द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाहः शुङ्गशैशिरयोस्तथा ॥
असम्प्रज्ञातबन्धूनामाचार्यप्रवराः स्मृताः ।
पक्षे चास्मिन् विवाहोऽपि सगोत्रैः सह नेष्यते ॥ इति ।

तथा च आपस्ताम्बधर्मसूत्रे सगोत्रविवाहनिषेधप्रकरणे द्वादशपुत्रविवेचने "पुत्राभावे यः प्रत्यासन्नः सपिण्डः ॥२॥" इति सूत्रस्योपरि उज्वलायां व्याख्यायां हरदत्तेन—दत्तः पूर्वमेवोक्तः, इत्युक्तम् । तत्र पैठीनसिः "अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण द्व्यार्षेयेण जातास्ते असङ्गतकुलीना द्व्यामुष्यायणा भवन्तीति" इति पैठीनसेरुक्तिरपि जनयितृपरिगृहीतृगोत्रद्वय-विवाहनिषेधे प्रमाणमस्ति ।

ग्रन्थस्यास्य सम्पादनकर्मणि पं० श्रीरामगोविन्दशुक्लमहोदयैरपेक्षितः समुपयुक्तपरामर्शो दत्तः । तथा प्रकाशनकर्मणि श्रीमद्भिः परमेश्वरपाण्डेयैः श्रीमनुदेवभट्टाचार्यैश्च प्रकाशनानुरूपता-प्रदाने महान् सहयोगो दत्तः । अथ च प्रकाशनाधिकारि—डॉ० हरिश्चन्द्रमणित्रिपाठिभिः पत्रिकायां त्वरितप्रकाशनेन जनदृष्टिगोचरीकृतोऽयं ग्रन्थः । अतः सहयोगिनः सर्वे धन्यवादार्हा इति शम् ।

काश्याम्
नागपञ्चमी
वै० सं० २०३३
(३१–७–७६)

उमाशङ्करत्रिपाठी
अनुसन्धानसहायकः,
अनुसन्धानसंस्थानम्,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणिका

विषयनाम	पृष्ठसंख्या
(क) भूमिका	
१. ग्रन्थविषयः	१
२. गोत्रप्रवरसरणिः	३
भृगुगोत्रगणाः	,,
३. ग्रन्थान्तरे अजामदग्न्याः	४
४. अङ्गिरसां गोत्रगणाः	,,
५. गौतमाङ्गिरसः	५
६. भरद्वाजाङ्गिरसः	६
७. केवलाङ्गिरसः	,,
८. अथात्रयः	७
९. अथ कश्यपाः	८
१०. अथ वसिष्ठाः	,,
११. अथ विश्वामित्राः	९
१२. अथागस्तयः	१०
१३. अथ द्वयामुष्यायणाः	,,
१४. अथ दत्तकानां विवेचनम्	१२
(ख) ग्रन्थप्रारम्भः	
१. प्रवरार्थंस्तद्भेदाश्च	१७
२. विदानां प्रवराः	,,
३. आर्ष्टिषेणानां प्रवराः	,,
४. वत्सपुरोधसयोः प्रवराः	१८
५. शुद्धभृगवः	,,
गौतमाङ्गिरोगणाः	,,
भरद्वाजाङ्गिरोगणाः	१९
केवलाङ्गिरोगणाः	,,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयनाम		पृष्ठसंख्या
६.	रहूगणानां प्रवराः	१९
७.	गर्गाणां प्रवराः	,,
८.	कपीनां प्रवराः	,,
९.	कुत्सानां प्रवराः	२०
१०.	अथात्रिगणः	,,
११.	शण्डिलानां प्रवराः	,,
१२.	विश्वामित्रगणाः	,,
१३.	वसिष्ठगणाः	,,
१४.	साहुलानां प्रवराः	२१
१५.	अगस्तयश्चत्वारः	,,
१६.	कात्यायनसूत्रोक्तप्रवराः	,,
१७.	द्व्यामुष्यायणाः	२२
१८.	देवरातानां प्रवराः	,,
१९.	कपिलानां प्रवराः	,,
२०.	वामरथ्यधनञ्जयादीनां प्रवराः	,,
२१.	विशेषः	,,
२२.	गोत्रप्रवरमञ्जरीकारवचनम्	२३
२३.	आपस्तम्बधर्मसूत्रव्याख्यामतम्	,,
२४.	ग्रन्थसमाप्तिः	,,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ गोत्रप्रवरभास्करः

(गोत्रप्रवरनिर्णयः)

म० म० श्रीमद्भट्टोजिदीक्षितविरचितः

पं० श्रीयुत उमाशङ्करत्रिपाठी, व्याकरण-धर्मशास्त्राचार्यः विद्यावारिधिः,
अनुसन्धानसहायकः, अनुसन्धानसंस्थाने ।

सप्तर्षयोऽग[1]स्त्याष्टमास्तदपत्यं च गोत्रम् । प्रव्रियन्ते होत्रध्वर्युभ्यामुत्कीर्यन्त इति प्रवराः । समानप्रवरां समानगोत्रां च नोद्वहेत् ।

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिपु द्वयोः ।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वार्यते ॥ इति परिभाषा ।

यामधिकृत्य प्रवरा आम्नातास्ता[2]दृशा गणा ऊनपञ्चाशत् । तथाहि—

भृगूणां[3] सप्त अन्तर्गणाः । तत्र त्रयो जामदग्न्याः । वत्सा विदा आर्ष्टिषेणाश्चेति । तत्र वत्सानां पञ्च प्रवरा इति । भार्गवच्यावनाप्नवानौर्वजामदग्न्येति । त्रयो वा, भार्गवौर्वजामदग्न्येति ।

विदानां पञ्च प्रवराः । भार्गवच्यावनाप्नवानौर्वविदेति[4] । त्रयो वा, भार्गवौर्वजामदग्न्येति ।

आर्ष्टिषेणानां पञ्च प्रवराः । भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति । त्रयो वा, भार्गवार्ष्टिषेणानूपेति ।

एषां त्रयाणां परस्परमविवाहः ।

[5][आश्वलायनश्रौतसूत्रे भार्गवच्यावनाप्नवानौर्वजामदग्न्येति पञ्च प्रवराः । जामदग्न्या आम्नातास्तैरपि गोत्रैक्यात् प्रवरैक्याच्च न विवाहः]

आर्ष्टिषेणानां केवलभा[6]र्गवेति स्मृत्यर्थसारादिमतेऽपि विदवत्साभ्यां सह प्रवरसाम्यादविवाह इति फलं तुल्यमेव । एते पञ्चार्वत्तिनः । ग्रन्थान्तरे, ये त्वजामदग्न्या वत्सास्तेषां त्र्यार्षेया एव । भार्गवच्यावनाप्नवानेति । [7]वत्सानां त्र्यार्षेयाः प्रवराः । भार्गवच्यावनाप्नवानेति ।

---

१. अगस्त्याष्टमम् इति घ. पुस्तके ।
२. तादृशगणाः इति ख. ग. पुस्तकयोः ।
३. सप्ताह गणाः इति ख. पुस्तके ।
४. विदेति स्थाने जामदग्न्येति क. ख. पुस्तकयोः ।
५. अयमधिकः पाठः ख. पुस्तके ।
६. भार्गवेति स्थाने भार्गवच्यावनेति पाठः ख. पुस्तके ।
७. अवत्सानाम् इति पाठः ख. पुस्तके ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वत्सपुरोधसयोः पञ्चार्षेयाः । भार्गवच्यावनाप्नवानवात्सपौरोधसेति । वैजव[1]निमथितयोः पञ्चार्षेयाः । भार्गवच्यावनाप्नवानवैजवनै[2]मथितेति । एतेषां परस्परं जामदग्न्यैश्च न विवाहः, प्रवरसाम्यात् ।

चत्वारश्शुद्धभृगवः । यस्का मित्रयवो वैन्याः शुनकाश्चेति ।

यस्कानां त्रयः प्रवराः । भार्गववैतहव्यसावेदसेति ।

मित्रयूनां त्रयः प्रवराः । भार्गवदै[3]वोदासिवाध्र्यश्वेति । एको वा । वाध्र्यश्वेति ।

वैन्यानां त्रयः । भार्गववैन्यपार्थेति ।

शुनकानामेकः । शौनकेति, गार्त्समदेति वा । द्वौ वा । भृगुगृत्समदेति । त्रयो वा । [4]भार्गवशौनहोत्रगार्त्समदेति । भार्गवशौनकगार्त्समदेति वा । एषां चतुर्णां परस्परं [5]विवाहोऽस्ति, पूर्वोक्तैस्त्रिभिश्च [6]वक्ष्यमाणैश्च ।

क्वचित्तु अधिकं गणद्वयमुक्तम् ।

वेदविश्वज्योतिषां त्र्यार्षेयाः प्रवराः । भार्गववैदवैश्वज्योतिषेति ।

शाठरमाठराणां भार्गवशाठरमाठरेति ।

भृगोः सप्त वंशा निर्णीताः ।

आङ्गिरसां तु षोडश ।

तत्र गौतमाङ्गिरसां सप्त । १—आयास्याः, २—शरद्वन्तः, ३—कौमण्डाः, ४—[7]दीर्घतमसः, ५—कारेणुपालयः, ६—वामदेवाः, ७—औशनसश्चेति ।

तत्र आयास्यानां त्रयः प्रवराः । आङ्गिरसायास्यगौतमेति ।

शरद्वतां त्रयः । आङ्गिरसगौतमशारद्वतेति ।

कौमण्डानां पञ्च प्रवराः । आङ्गिरसौ[8]तथ्यकाक्षीवतगौतमकौमण्डेति ।

दीर्घतमसां पञ्च । आङ्गिरसौतथ्यकाक्षीवतगौतमदीर्घतमसेति । त्रयो वा, आङ्गिरसौतथ्यदीर्घतमसेति ।

कारेणुपालानां त्रयः । अङ्गिरसगौतमकारेणुपालेति ।

वामदेवानां त्रयः । आङ्गिरसगौतमवामदेवेति । आङ्गिरसवामदेव्यवार्हदुक्थ्येति वा ।

औशनसानां त्रयः । आङ्गिरसौशनसगौतमेति । एते बौधायनोक्ताः सप्त गौतमाः । सूत्रान्तरेष्वन्येऽपि सप्तोक्ताः । तथा हि—

आपस्तम्बसूत्रे औचथ्यगौतमास्तेषां त्रयः । आङ्गिरसौचथ्यगौतमेति ।

औशनसानां त्रयः । आङ्गिरसौशिजकाक्षीवतेति ।

लौगाक्षिसूत्रे आयास्यौशिजगौतमास्तेषां पञ्च आङ्गिरसायास्यौशिजगौतमकाक्षीवतेति ।

---

१. निमिथिलयोः इति क. पुस्तके ।

२. नैमिथिकेति इति क. पुस्तके ।

३. दैवोदासव्याघ्रश्चेति ख. पुस्तके ।

४. भार्गवशौनहोत्रगार्त्समदेति, अयमधिकः पाठः केवलं ग. घ. पुस्तकयोः ।

५. विवाहो नास्ति इति ख. पुस्तके ।

६. वक्ष्यमाणैश्च—अयमंशो नास्ति ग. पुस्तके ।

७. दीर्घतपसः—इति क. पुस्तके ।

८. औतथ्यस्थाने औचथ्य इति ग. पुस्तके ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आश्वलायनसूत्रे[1] रहूगणानां त्रयः। आङ्गिरसराहूगण्यगौतमेति।

सोमराजकीनां त्रयः। आङ्गिरससोमराज्यगौतमेति।

बृहदुक्थ्यानां त्रयः। आङ्गिरसबार्हदुक्थ्यगौतमेति।

कक्षीवतां पञ्च। आङ्गिरसौ[2]चथ्यगौतमौशिजकाक्षीवतेति।

गौतमानां सर्वेषां परस्परमविवाहः गोत्रैक्यात्, प्रायेण प्रवरैक्याच्च।

भरद्वाजाङ्गिरसश्चत्वारः। भरद्वाजा रौक्षायणा गर्गाः कपय इति। तत्र भरद्वाजानां त्रयः। आङ्गिरसबार्हस्पत्यभारद्वाजेति।

रौक्षायणानां पञ्च प्रवराः। आङ्गिरसबार्हस्पत्यभारद्वाजवा[3]न्दनमातवचसेति। त्रयो वा। आङ्गिरसवा[4]न्दनमातवचसेति।

गर्गाणां पञ्च। आङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यसैन्येति। त्रयो वा। भारद्वाजसैन्यगार्ग्येति। आङ्गिरससैन्यगार्ग्येति वा। आङ्गिरसतैत्तिरकापिभुवेति वा।

कपीनां त्रयः प्रवराः। आङ्गिरस-आमहीयव-औरुक्षयसेति। आङ्गिरसबार्हस्पत्यभारद्वाजेति वा। आङ्गिरसबार्हस्पत्य[5]कापयेति वा।

एषां चतुर्णां भारद्वाजानां गोत्रैक्यात् प्रायेण प्रवरैक्याच्च नान्वयः।

केचित्तु आमहीयवौरुक्षयसप्रवरस्य कपेर्विष्णुवृद्धादिवत् केवलाङ्गिरसत्वं स्वीकृत्य भरद्वाजैः सहान्वयमिच्छन्ति। तन्नादर्तव्यम्। गोत्रप्रवरमञ्जरीप्रयोगपारिजातस्मृत्यर्थसारादिबहुग्रन्थविरोधात्।

केवलाङ्गिरसस्तु पञ्च। विष्णुवृद्धाः कण्वा हरिता रथीतरा मुद्गलाश्चेति।

विष्णुवृद्धानां त्रयः प्रवराः। आङ्गिरसपौरुकुत्स्यत्रासदस्यवेति।

कण्वानां त्रयः। आङ्गिरस-आजमीढ-काण्वेति। आङ्गिरसघोरकाण्वेति वा।

हरितानां त्रयः। आङ्गिरस-आम्बरीष-यौवनाश्वेति। मान्धात्राम्बरीषयौवनाश्वेति वा।

रथीतराणां त्रयः। आङ्गिरसवैरूपराथीतरेति। आङ्गिरसवै[6]रूपपार्षदश्वेति वा।

मुद्गलानां त्रयः। आङ्गिरसभा[7]र्म्यश्वमौद्गल्येति। तार्क्ष्यभार्म्यश्वमौद्गल्येति वा।

विष्णुवृद्धादीनां पञ्चानामपि केवलाङ्गिरसां स्वस्वगणं हित्वा[8] अन्यैः सह विवाहोऽस्ति। क्वचित्तु[9] अन्येऽपि केवलाङ्गिरसः पठ्यन्ते।

---

१. राहु इति ख. ग. पुस्तकयोः।
२. औचथ्यस्थाने औतथ्य इति ख. पुस्तके।
३. वान्दनमातृवचसेति क. पुस्तके। वादनमातवचसेति ग. पुस्तके। वादन्तमातवसेति ख. पुस्तके।
४. अत्र तृतीय (३.) टिप्पणीवत्।
५. कापिभुवेति ख. पुस्तके।
६. वैरूप-स्थाने वैरूप्य इति ख. पुस्तके।
७. भार्म्यश्विमौद्गलेति ख. पुस्तके।
८. भित्त्वा इति क. पुस्तके।
९. कैश्चित्तु इति ख. पुस्तके।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथा[१] कुत्सानां त्रयः । आङ्गिरसगान्धातृकौत्सेति । एषां हरितैरविवाहः, हरित-कुत्सपिङ्गशङ्खदर्भभैमगवानामित्याश्वलायनेन सर्वप्रवरसाम्योक्तेः ।

पृषदश्वानां त्रयः । आङ्गिरसपार्षदश्ववैरूपेति । अष्टादंष्ट्रपार्षदश्ववैरूपेति वा । एषां रथीतरैरविवाहः, प्रवरद्वयसाम्यात् ।

इत्थमङ्गिरसां षोडशगणा निर्णीताः ।

अथात्रिगणः । अत्रेश्चत्वारो भेदाः । [२]आद्यात्रयो गविष्ठिरा वाद्भूतका मुद्गलाश्चेति । तत्राद्यात्रीणां[३] त्रयः प्रवराः । आत्रेया[४]र्चनानसश्यावाश्वेति । गविष्ठिराणां त्रयः । आत्रेयार्चनानसगाविष्ठिरेति । आत्रेयगाविष्ठिरपौर्वातिथेति[५] वा । वाद्भूतकानां त्रयः । आत्रेयार्चनानसवाद्भूतकेति । मुद्गलानां त्रयः । आत्रेयार्चनानसपौर्वातिथेति[६] ।

एषां चतुर्णां परस्परमविवाहः ।

क्वचित्तु अतिथीनां त्रयः । आत्रेयार्चनानसातिथेति[७] । धनञ्जयानां त्रयः । आत्रेयार्चनानसधानञ्जयेति । सुमङ्गलानां त्रयः । अत्रिसुमङ्गलश्यावाश्वेति ।

अत्रिवंशा निर्णीताः ।

कश्यपानां त्रयो भेदाः । निध्रुवरेभशण्डिलेति । निध्रुवाणां त्रयः । काश्यपावत्सारनैध्रुवेति । रेभाणां त्रयः । काश्यपावत्साररैभ्येति ।

शण्डिलानां त्रयः । काश्यपावत्सारशाण्डिल्येति । काश्यपावत्सारदैवलेति वा । काश्यपावत्सार-आसितेति वा । शाण्डिलासितदैवलेति वा । काश्यपासितदैवलेति वा । द्वौ वा, दैवलासितेति ।

एषां त्रयाणां कश्यपानां परस्परं नोद्वाहः ।

वसिष्ठानां चत्वारो भेदाः । वसिष्ठाः कुण्डिना उपमन्यवः पराशरा इति ।

वसिष्ठानामेकः प्रवरः । वासिष्ठेति । कुण्डिनानां त्रयः । वासिष्ठमैत्रावरुणकौण्डिन्येति । उपमन्यूनां त्रयः । वासिष्ठेन्द्रप्रमदा[८]भरद्वस्विति । पराशराणां त्रयः । वासिष्ठशाक्त्यपाराशर्येति ।

एषां चतुर्णां वसिष्ठानां परस्परमविवाहः ।

अथ विश्वामित्राः । ते दश । १—कुशिकाः, २—रोहिताः, ३—रौक्षकाः[९], ४—कामकायनाः[१०], ५—धनञ्जयाः, ६—कताः, ७—अजाः, ८—अघमर्षणाः, ९—पूरणाः[११], १०—इन्द्रकौशिकाश्चेति ।

---

१. तथा—इति तु नास्ति ख. पुस्तके ।
२. आद्यास्त्रयः इति ख. पुस्तके ।
३. तत्रात्रीणाम् इति ग. पुस्तके, तत्र आद्यानां त्रयाणाम् इति ख. पुस्तके ।
४. आर्चनस इति ग. पुस्तके ।
५. पौर्वतिथ्येति ख. पुस्तके ।
६. आत्रेयार्चनानसमौद्गलेति वा पाठोऽयमधिकः ख. पुस्तके ।
७. आतिथ्येति ख. पुस्तके ।
८. आमरद्वस्विति स्थाने औपमन्येति ख. ग. पुस्तकयोः ।
९. रौक्षायणाः इति ख. पुस्तके ।
१०. कामलायनाः इति क. पुस्तके ।
११. पूरण्याः इति क. पुस्तके ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र कुशिकानां त्रयः। विश्वामित्रदेवरातौदलेति। रोहितानां त्रयः। विश्वामित्राष्टकरौहितेति। विश्वामित्रमाधुच्छन्दसाष्टकेति वा। द्वौ वा। विश्वामित्राष्टकेति। रौक्षकाणां त्रयः। वैश्वामित्ररौक्षकरैवणेति। वैश्वामित्रगाथिनरैवणेति वा। कामकायनानां त्रयः। वैश्वामित्रदैवश्रवसदैवतरसेति। धनञ्जयानां त्रयः। वैश्वामित्रमाधुच्छन्दसधानञ्जयेति। वैश्वामित्रमाधुच्छन्दसाघमर्षणेति वा। कतानां त्रयः। वैश्वामित्रकात्यात्किलेति[1]। अजानां त्रयः। वैश्वामित्रमाधुच्छन्दसाजेति। अघमर्षणानां त्रयः। वैश्वामित्राघमर्षणकौशिकेति। पूरणानां द्वौ। वैश्वामित्रपौरणेति। इन्द्रकौशिकानां द्वौ। वैश्वामित्रैन्द्रकौशिकेति।

एषां दशानां परस्परमविवाहः।

[2]क्वचित्त्वन्येऽप्युक्ताः।

अजानां कुशिकानां च त्रयः। वैश्वामित्राश्म[3] रथ्यवान्धुलेति।

हर्यश्वादीनां त्रयः। विश्वामित्रगाथिनरैणवेति[4]। वेणूनां त्रयः। विश्वामित्रगाथिनवैणवेति। शालङ्कायनानां त्रयः। वैश्वामित्रशालङ्कायनकौशिकेति। रौहिणानां त्रयः। वैश्वामित्रमाधुच्छन्दसरौहिणेति। कथकानां त्रयः। वैश्वामित्रकाथकक्राथकेति।

[5]साहुलानां त्रयः। वैश्वामित्रसाहुल[6]माहुलेति।

हिरण्यरेतसां द्वौ। वैश्वामित्रहैरण्यरेतसेति।[7]
सुवर्णरेतसां द्वौ। वैश्वामित्रसौवर्णरेतसेति।
कपोतरेतसां द्वौ। वैश्वामित्रकापोतरेतसेति।
[8]घृतकौशिकानां द्वौ। वैश्वामित्रघृतकौशिकेति।

[9]अगस्तयश्चत्वारः। इध्मवाहाः, साम्भवाहाः, सोमवाहाः, यज्ञवाहा इति।

इध्मवाहानां त्रयः। आगस्त्यदार्ढच्युतैध्मवाहेति। एको वा। आगस्त्येति। साम्भवाहानां त्रयः। आगस्त्यदार्ढच्युतसाम्भवाहेति। सोमवाहानां त्रयः। आगस्त्यदार्ढच्युतसौमवाहेति। यज्ञवाहानां त्रयः। आगस्त्यदार्ढच्युतयाज्ञवाहेति। एषां चतुर्णां परस्परमविवाहः।

कात्यायनसूत्रे तु पुलस्त्यपुलहक्रतूनां त्रयः। आगस्त्यमाहेन्द्रमायोभुवेति। पौर्णमासादीनां त्रयः। आगस्त्यपौर्णमासपारणेति। दर्भवाहानां त्रयः। आगस्त्यदार्ढच्युतदार्भवाहेति।

---

१. आत्मात्कीलेति ख पुस्तके, उत्कीलेति ग. पुस्तके।
२. केचित्तु क. पुस्तके।
३. आश्वरथ्य ख. पुस्तके, अश्मरथ ग. पुस्तके।
४. रैवणेति ख. ग. पुस्तकयोः।
५. मुद्गलानाम् ख. पुस्तके, बाहुलानाम् क. पुस्तके।
६. मौद्गलेति ख. पुस्तके।
७. हिरण्यरेतसेति क. ख. पुस्तकयोः, विश्वामित्रहिरण्यरेतसेति ग. पुस्तके।
८. घृतकौशिकायनानाम् क. पुस्तके।
९. अगस्त्याः ख. ग. पुस्तकयोः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शुकहंसादीनां त्रयः । आगस्त्यहैम[1]चर्विहैमोदकेति । पाणिकादीनां त्रयः । आगस्त्यवैनायकपाणिकेति ।

तदेवं भृगवः सप्त । अङ्गिरसः षोडश । द्व्यामुष्यायणेषु वक्ष्यमाणाः सङ्कृतयोऽप्यङ्गिरसः, त एके । अत्रयश्चत्वारः । कश्यपास्त्रयः । वसिष्ठाश्चत्वारः । विश्वामित्रा दश । अगस्तयश्चत्वारः ।

इत्थमेकोनपञ्चाशद् गणा निर्णीताः ।

अथ द्व्यामुष्यायणाः ।

देवरातानां त्रयः प्रवराः । वैश्वामित्रदैवरातौदलेति । एषां विश्वामित्रजमदग्निभ्यां नान्वयः । [2]परस्परं चैवम् । [3]शौङ्गशैशिरीणां पञ्च । आङ्गिरसबार्हस्पत्यभारद्वाजकात्यात्कीलेति । आङ्गिरसबार्हस्पत्यभारद्वाजशौङ्गशैशिरेति वा । त्रयो वा । आङ्गिरसकात्यात्कीलेति । भारद्वाजकात्यात्कीलेति वा । एषां विश्वामित्रभरद्वाजाभ्यां न सम्बन्धः ।

कतानां त्रयः । विश्वामित्रकात्यात्कीलेति । एषामपि विश्वामित्रभरद्वाजाभ्यां नान्वयः ।

[4]कपिलानां पञ्च । आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातवचसेति । एषामपि विश्वामित्रभरद्वाजाभ्यां नान्वयः ।

वामरथ्यानां त्रयः । आत्रेयवामरथ्यपौत्रिकेति । एषामत्रिविश्वामित्राभ्यां नान्वयः ।

धनञ्जयानां त्रयः । वैश्वामित्रमाधुच्छन्दसधानञ्जयेति । एषामप्यत्रिविश्वामित्राभ्यां नान्वयः ।

जातूकर्ण्यानां त्रयः । वासिष्ठात्रेयजातूकर्ण्येति । एषामत्रिवसिष्ठाभ्यां नान्वयः ।

सङ्कृतीनां त्रयः । आङ्गिरसगौ[5]रिवीतसाङ्कृत्येति । [6]शात्तपगौरिवीतसाङ्कृत्येति वा ।

एषां स्वगणस्थैस्तथा वसिष्ठैः कश्यपैश्च न सम्बन्धः । एषां केवलाङ्गिरोमध्यपाठस्य फलं चिन्त्यम् ।

पूतिमाषाणां सर्वं सङ्कृतिवत् ।

लौगाक्षीणां त्रयः । काश्यपावत्सारवासिष्ठेति । वासिष्ठावत्सारकाश्यपेति वा ।

विशेषः—

इदं त्ववधेयम् । इदानीन्तनानामपि दत्तकानां द्वयोरपि पित्रोः सगोत्रैरविवाहः । गोत्ररिक्थे जनयितुर्न भजेद्कृत्रिमः सुतः—इति मनुवचनाद् दत्तस्योत्पादकगोत्रसम्बन्धाभावेऽपि पितृसगोत्रत्वप्रयुक्तप्रतिषेधात् । असगोत्रा च या पितुरित्यत्र पितृग्रहणस्य ह्येतदेव प्रयोजनं स्मृतिचन्द्रिकादौ स्थितम् । नन्वेवं दत्तस्य पुत्रपौत्रादीनां गोत्र[7]द्वयविवाहनिषेधो न[8] लभ्येतेति चेन्न ।

---

१. हैमचार्व ख. पुस्तके ।

२. परस्परम् इत्यस्य स्थाने पनस्यानाम् क. ख. पुस्तकयोः, पनसानाम् ग. पुस्तके ।

३. शौङ्गशैशिराणाम् क. ख. पुस्तकयोः ।

४. कपीनाम् ग. पुस्तके ।

५. गौरिवीति ग. पुस्तके, गौरवीत ख. पुस्तके ।

६. शात्तपस्थाने शाक्त्य ग. पुस्तके, शातप ख. पुस्तके ।

७. गोत्रद्वये ग. पुस्तके ।

८. न लभ्यत इति ग. पुस्तके ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्रापि पारिजातोदाहृतवच[1]नान्तरात् [2]तल्लाभात् । अत एव दत्तस्य देवरातस्य द्व्यामुष्यायणेषु गणनं संगच्छते ।

गोत्रप्रवरमञ्जरीकारोऽप्याह—एवं पुत्रिकापुत्रदत्तक्रीतपुत्रादीनामपि द्वयोरपि गोत्रयोरविवाह इति । न चैवं "गोत्ररिक्थे" इति मनुवचनस्य निर्विषयत्वं शङ्क्यम्, आर्षेयवरणाभिवादनादिषु श्राद्धदेवतात्वे च जनकगोत्रनिवृत्त्यर्थत्वात् तस्येति दिक् ।

आपस्तम्बधर्म[3] (सूत्र) व्याख्यायामुज्वलायां हरदत्तकृतायां पैठीनसिः—अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेयेण जातास्तेऽसंहताः कुलीना द्व्यामुष्यायणा भवन्तीति ।

इति द्व्यामुष्यायणवर्गः ।

[4]भट्टोजिभट्टरचितो गोत्रप्रवरनिर्णयः ।
गुणगृह्यैर्बुधैः सोऽयमादरेण [5]विभाव्यताम् ॥
गोत्रप्रवरस[6]न्देहतमःप्रावृतचेतसाम् ।
मोदं तनोतु विदुषां गोत्रप्रवरभास्करः ॥

॥ शुभमस्तु ॥ ग्रन्थ संख्या १३० ॥ संवत् १७१५ समय भादौ सुदि ८ ।

—०—

१. वचनान्तरलाभात् ग० पुस्तके ।
२. विधानपारिजाते—
द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाहः शुङ्गशैशिरयोस्तथा ॥
असम्प्रज्ञातबन्धूनामाचार्यप्रवराः स्मृताः ।
पक्षे चास्मिन् विवाहोऽपि सगोत्रैः सह नेष्यते ॥ इत्युक्तेः ।
३. धर्मसूत्रव्याख्यायाम् ख. पुस्तके ।
४. भट्टोजिदीक्षितकृतो ख. पुस्तके ।
५. च गृह्यताम् ख. पुस्तके ।
६. सन्देहे ख. पुस्तके ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्जीकरणसंख्या—६९८१।५७

सारस्वती सुषमा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते ।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति ।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते । तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये ।

७. 'कुलसचिव, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी-२२१००२ (उ०प्र०) इति सङ्केतेन ('बैंकड्राफ्ट' अथवा 'पोस्टल आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम् ।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी—२२१००२ (उ० प्र०) इति सङ्केतेन विधेयः ।

प्रकाशकः—सञ्चालकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,
वाराणसी-२२१००२ (उ० प्र०)
मुद्रकः—तारा प्रिंटिंगवर्क्स, कमच्छा, वाराणसी ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुसंग्राह्याः केचन वेद-वेदाङ्गग्रन्थाः

क्रमसंख्या ग्रन्थनाम	मूल्यम्
१. **शुक्लयजुर्वेदकाण्वसंहिता**—संहितेयं खलु सायणभाष्यसमलङ्कृता साम्प्रतं मुद्रित-प्रायैव। ग्रन्थरत्नमिदं विविधैः पद-पाठ-टीकागतसन्दर्भसन्निवेश-विशिष्टैः टिप्पण्यादिभिः, अथ च विदुषा श्रीचिन्तामणिमिश्रमहोदयेन विरचितया गवेषणाप्रधानभूमिकया विविधैः परिशिष्टैश्च समेधित-मस्ति—	००
२. **अथर्ववेदे शान्तिपुष्टिकर्माणि**—श्रीमत्या डॉ० मायामालवीयया वैदिकवाङ्मयस्यानु-शीलनं कृत्वा विरचितो विविधाभिरानुसन्धानिकफलश्रुतिभिः प्रतिष्ठापितश्चायं गवेषणाप्रबन्धः—	८.००
३. **बौधायनशुल्बसूत्रम्**—[बोधायनाचार्यप्रणीतम्]। मुद्रितप्रायोऽयं ग्रन्थः श्रीव्यङ्क-टेश्वरदीक्षितविरचितया बोधायनशुल्बमीमांसाख्यया व्याख्यया, अथ च श्रीद्वारकानाथयज्वप्रणीतया बौधायनशुल्बसूत्रव्याख्यानाख्यया टीकया प्रभूतैः संवादात्मकैः रेखाचित्रैश्च सनाथीकृतः—	
४. **बृहत्संहिता**—[भागद्वयात्मिका] श्रीवराहमिहिराचार्यप्रणीता। ग्रन्थोऽयं श्रीभट्टोत्पल-विवृतिविभूषितः, अथ च विमर्शात्मकेनोपोद्घातेन समुल्लसितः।	
प्रथमभागस्य मूल्यम्–	१८.००
द्वितीयभागस्य मूल्यम्–	२०.००
५. **स्कन्दशारीरकम्**—सामुद्रिकशास्त्रमधिकृत्य केनाप्यज्ञातनाम्ना विदुषा प्रणीतोऽयं ग्रन्थोऽज्ञातनाम्न्या टीकया पुरस्कृतोऽस्ति, अस्मिन् हि खलु ग्रन्थे शरीरस्थरेखापरीक्षणद्वारा सुकृतदुष्कृतयोरिष्टप्राप्तिसाधनयोर्भृशं विवेचनम् उपलभ्यते। पुस्तकमिदं गवेषणाप्रधानैः भूमिका-टिप्पणादि-विविधपरिशिष्टैर्नूनं स्वीयं महत्त्वं भजते—	१५.००
६. **अर्वाचीनं ज्योतिर्विज्ञानम्**—ग्रन्थोऽयं विदुषा श्रीरमानाथसहायमहोदयेन विनिर्मितः खल्वाधुनिकगवेषणापद्धत्या प्राच्यभारतीयगणितशास्त्राधुनिकभौतिक-शास्त्रयोरत्र तुलाबोधकं परीक्षणं कृतम्—	१२.००
७. **परिभाषेन्दुशेखरः**—[हैमवतीसंवलितः] वैयाकरणमूर्धन्यपण्डितश्रीयागेश्वरशास्त्रि-कृतया 'हैमवती' व्याख्यया समुल्लासितः। ग्रन्थरत्नमिदं सम्पूर्णानन्द-संस्कृतविश्वविद्यालयीयनव्यव्याकरणविभागीयैः 'उपाचार्य'(रीडर)-पदमलङ्कुर्वद्भिः श्रीकालिकाप्रसादशुक्लमहोदयैः विविधपाठभेद-टिप्पणी-परिभाषापाठानुक्रमणी-वर्णानुक्रमसूची-परिभाषाव्याख्यातृकृत-परिभाषापाठभेदप्रभृतिभिरुपादेयगवेषणामूलकभूमिकादिभिरुपस्कृतः—	४९.००

प्रकाशकः—निदेशकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी–२२१००२
मुद्रकः—मुद्रणालय-व्यवस्थापकः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी–२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri